सर्वसिद्धांतसौरभम्

(The Vision and Voice of Indian Philosophy)

1. सांख्यः – योगः

'साधन रहस्य' 'सर्वसिद्धांतसौरभादि'
बहुग्रंथकर्तारः

'बापट्लः' 'भीमुनिपट्टनम' च
श्री रामकृष्णाश्रमाणाम् संस्थापकः

परमहंस परिव्राजकाचार्याः
श्री अनुभवानंद स्वामिनः

अनुवादकर्ता
डा० टी. वी. राघवाचार्याः, एम.ए., पीएच.डी.

श्री अनुभवानंद ग्रंथमाला
बापट्ला - 522 101
गुंटूर् जिला

SARVA SIDDHANTA SOURABHAM (Sanskrit - VolumeI)
(The Vision and Voice of Indian Philosophy)
By Sri Anubhavananda Swamiji

PUBLICATION No. **043**

प्रथम मुद्रणम् : **1995**

"This Book is published with the Financial Assitance from 'TIRUMALA TIRUPATI DEVASTHANAMS' under their scheme Aid to publish Religious Books."

© अस्य सर्वोऽधिकारा स्वायत्तीकृताः।

All Rights reserved. No part of theis book may be reproduced or transmitted in any form or by any means, electronic, or mechanical, including photocopying recording; or by any information storage without permission from the PUBLISHER.

मूल्यम् : रु.50/-
Library Edition Rs. 80/-

PLACED ON THE SHELF
Date............

प्राप्ति स्थानम् :
1.श्री अनुभवानंद ग्रंथमाला,
बापट्ला - 522 101,
गुंटूर जिला, आंध्रप्रदेश:

2.स्वामी अनुभवानंद योग केंद्रम्,
भीमुनिपट्टणम् - 531 163,
विशाखपट्टणम् जिला, आंध्रप्रदेश:

SRI VENKATESWARA CENTRAL LIBRARY & RESEARCH CENTRE
Acc. No ....
Date............
TIRUPATI.

SRI ANUBHAVANANDA GRANDHAMALA (Bapatla) and SWAMI ANUBHAVANANDA YOGA KENDRA (Bheemunipatnam) popularising and propagating Spiritual books and Devotional Audio cassettes in several languages [illegible] the guidence and enlightment of SEEKERS OF TRUTH.

Typesetting and Printing:
SPAA Offset Colour Prints,
Visakhapatnam - 16.
Phone : 547600.

ॐ

उपोद्घात:

भारतदेशः मनोविकासदायकानां सकलकलानां निलयः इति, हृदये मनसः मेलनं कृत्वा, तत्त्वशास्त्ररहस्यानि परिशोध्य, ज्ञात्वा, समाचरणेन निश्चल निर्विकारपरब्रह्मानुसंधानकारिणां महापुरुषाणां स्थानमिति अनादिकालात् सुप्रशस्तम्। The philosophy of a country is the cream of its culture and civilization देशस्य संस्कृतीनागरिकतानां नवनीततुल्यं तत्त्वशास्त्रमिति प्रोफेसर् सतीशचंद्रछटर्जी महाशयेनोक्तरीत्या मानवानां हृदयविकासाय हृदयविशालतायाः हृदयप्रशांततायाः आवश्यकं तत्त्वशास्त्रं। तादृशं तत्त्वशास्त्रं शिरसि धृत्वा, प्रापंचिकजीवनात् पारमार्थिकजीवनपर्यन्तं मानवत्वस्य माधवत्वसिद्धेः पर्यन्तं, जीवत्वस्य शिवत्वसिद्धेः पर्यन्तं, साधकः सिद्धइव परिणामपर्यन्तं आवश्यकानां विषयाणां संपूर्णप्रदाता भारती एव। भौतिकविषयविज्ञानेन भौतिकजीवने यदाकदापि अशांतिरेव इति ज्ञात्वा, मनसा तान्विषयान् अवांछन्, अभौतिकात्मविज्ञानसंपन्नाः भूत्वा, आध्यात्मिकान्तरिक्षे धृवतारेव प्रकाश्य, स्थिराः भूत्वा, शांतिसंधातारः भूत्वा, मानवानां मानवत्वं, भक्तानां भक्तितत्त्वं, साधकानां साधनविधानानि च बोधनं कृत्वा, तेषु तेषु विषयेषु तेषां आदर्शप्रायः भूत्वा, स्वस्व नाम्नां प्रकटनमपि न कृत्वा, वैराग्यनिधयः भूत्वा, पारमार्थिकज्ञान संपत्प्रदातृणां तेषां पुण्यमूर्तीणां ऋणात् मोचनं साध्यं वा? भगवत्सृष्टिं अदर्शयन् स्वदृष्टिं सृष्टिकर्तरि उपस्थाप्य, सूक्ष्मबुध्या सृष्टिरहस्यानि ज्ञात्वा, सृष्टिदोषः नेति, मानवानां दृष्टिदोषं ज्ञात्वा, तानि परमरहस्यानि जनानां ज्ञापयितुं देशदेशांतरेषु खंडखंडांतरेषु संचारग्रंथालया इव पादसंचारं कृत्वा, बहुप्रयासैः प्रचारं कृतवतां महनीयानां तुल्याः के? सर्वचराचरजीवकोटि अपि शांतिसौभाग्यैः वर्धन्तामिति, मानसिकस्थिरत्वं लभ्यन्तामिति, हृदय शांतिः सिद्ध्यतामिति संकल्पितवंतः अस्माकं महर्षयः स्वस्वतपश्शक्त्या संपादितं विज्ञानधनं निस्वार्थबुद्ध्या परंपरया प्रसादितवंतः इत्यत्र नास्ति संदेहः। सा आध्यात्मिकज्ञानवाहिनी पवित्रातिपवित्रया गुरु शिष्यपरंपरया तदानीमारभ्य अद्यावधि गंगाप्रवाह इव साधकानां हृदयक्षेत्रेषु प्रविश्य, तत्र प्रशांतिं प्रसादयति खलु।

तादृशेषु महत्सु अग्रगण्यः सांख्यसिद्धांत कर्ता कपिलाचार्यः। 'सांख्यस्य वक्ता कपिलः परमऋषिः पुरातनः' इति महाभारते, 'कपिलो

नाम सिद्धेशः' इति भागवते, 'कपिलेन महात्मना' इति रामायणे, 'सिद्धानां कपिलो मुनिः' इति भगवद्गीतायां च श्री कपिलमुनिचंद्रः अतिप्राचीन इति, परमऋषिवरेण्य इति, सांख्यसिद्धांतकर्तेति च बहुधा प्रकीर्तितः। 'आदिविद्वान्' इत्युक्तः कपिलमुनिवरः सृष्ट्यादौ स्वायंभुव मन्वंतरे प्रादुर्भूतवानिति सुस्पष्टम्। तदानीं मोक्षप्राप्तेः विवेकवैराग्यैः तप माचर्य, गम्यं प्राप्त्वा, तस्मिन् ब्रह्मानंदे अवगाहयन्तः लोकशांत्यै स्वस्व जीवितानि निस्स्वार्थेन समर्पितवंतः ते महन्तः स्वस्व शारीरकविषयान् विसृज्य निराडंबरेण प्रचारप्रबोधैः देशेषु संचरितवंतः। अधुना पारमार्थिकतायाः लोपेन, त्यक्तितत्वविस्मरणेन आडंबराणां दासाः भूत्वा, संप्रदायान् त्यक्त्वा, धन संपादनध्येयेन संदेशान् विहाय, प्रजानां संदेहान् जानयंतः संघे प्रचारं कुर्वंति संघप्रबोधकाः। अहो कीदृशभेदः? शास्त्रज्ञानानुभवज्ञानयोः भेदं पश्यंतु।

प्रपंचे विद्यमानेऽपि 'भगवान् कुतो ह वा इमाः प्रजा प्रजायंत' इति 'लोकस्य का गतिः?' इति च उपनिषत्सु यथा पृष्टः तथा अनेकासु प्रश्नपरंपरासु मनसः मथनं कृत्वा, शोध्य, प्रपंचः केन निर्मितः? इति ज्ञातव्यः इति स्थिरसंकल्पेन प्रप्रथमततः सांख्यसिद्धांतं प्रतिपादितवान् श्री कपिल महर्षिः। अत एव 'सांख्यंतु कपिलेन तु' इति, 'कपिलो नाम सांख्य शास्त्रप्रवर्तकः' इति च श्री कपिलऋषिवरेणनिर्मितः अयं सांख्यसिद्धांतः इत्युक्तः। अयं प्रपञ्चः निर्मितः खलु। यथा मृदा घटः, सुवर्णेन आभर णानि निर्मितानि तथैव प्रपंचोऽपि कैश्चित्पदार्थैः निर्मितः इति, तानि 24 तत्वानीति निर्धारितवान्। 'तत्वानि चतुर्विंशत्तेन सांख्यं प्रकीर्तितं' चतुर्विंशति संख्यकानां तत्वानां प्रतिपादितत्वात् अयं सिद्धांतः सांख्यसिद्धांत इत्युक्तः। प्रकृतेः चतुर्विंशति तत्वानि परिशील्य, तानि भौति कानीति प्रतिपाद्य, 25 तमं तत्त्वं पुरुषः ग्राह्यते इति, अत एव 'शुद्धा त्मतत्वविज्ञानं सांख्यमित्यभिधीयते' इति शुद्धात्मतत्वविज्ञानमेव सांख्यमिति प्रख्यातम्। अपि च 'पंचविंशति तत्वज्ञो.....मुच्यते नात्र संशयः' इति सांख्यकारिकायां उक्तम्। अनेन सांख्यसिद्धांतानुसारेण पंचविंशतितत्वेषु चतुर्विंशति तत्वानि मात्रमेव स्वीकृत्य, सिद्धांतराद्धांतौ कुर्वंति। पंचविंशति तमं तत्वं पुरुषं सम्यक् न जानंति इति वक्तुं शक्यते। पुरुषग्रहणेन आत्यन्तिकदुःखस्य निवृत्तिः खलु। पुरुषज्ञानं तु बहुकष्टम्।

अस्य सृष्टेः कारणं मूलप्रकृतिः, प्रकृतेः महत् नाम बुद्धिः, बुद्धेः

अहंकारः, अहंकारात् शब्दस्पर्शरूपरसगंधतन्मात्रपंचकं, श्रोत्रत्वक्चक्षुजिह्वा घ्राणमिति ज्ञानेंद्रियपञ्चकं, वाक्पाणिपादपायूपस्थाः इति कर्मेंद्रियपंयकं, मनश्चेति षोडशमुद्भूतम्। पञ्चतन्मात्रेभ्यः पृथिव्यप्तेजोवाय्वाकाशाः इति पंचमहाभूतानि जातानि। आदृत्य सर्वाणि चतुर्विंशतितत्वानि। पंचविंशतितमं तत्वमित्युक्तः पुरुषः पूर्वोक्तेभ्यः चतुविंशतितत्वेभ्यः अतीतः नित्यश्च।

पूर्वोक्तरीत्या प्रकृति रहस्यानि उक्त्वा, 'प्रकृतेर्वियोगो मोक्षः' इति, 'ज्ञः पुरुषः' सर्वस्य प्रकृतेः अधिष्टाता पुरुषः चेतनः नित्यः, साक्षी, सर्वव्यापकः, द्रष्टा, उदा सीनः इति चोक्त्वा, तस्य पुरुषस्य ज्ञानमेव कैवल्यमिति 'वेदादि शास्त्राध्ययनात् पंचविंशति तत्वानांज्ञानं प्राप्य मोक्षं याति' इति सांख्यविवरणम्। इतः अनेके सिद्धांतविशेषाः अस्मिन् संति।

अनंतरं योगसिद्धांतप्राशस्त्यमुद्दिश्य विचारयामः। मानवः आशा जीवः। ताभि आशाभिः अस्मिन् लोके एव न, परलोकेऽपि सुखंवांछति। सर्वेषामपि आनंदान्वेषणं सहजमेव खलु। तथापि लौकिकजीवनमेव शाश्वतमिति भावनया तदर्थं प्रयत्नमेव हास्यास्पदम्। इच्छाः अधिकाश्चेत्, अशांतिरपि अधिकं भवति। इच्छानां मूलभूतः मनः। अत एव मनो निग्रहः आवश्यकः। योगसूत्रग्रंथस्य सारांशोऽपि 'योगश्चित्तवृत्तिनिरोधः' इत्येव। अत एव 'योगात्संजायते ज्ञानम्' इति त्रिशिखिब्राह्मणोपनिषद्वच्च नम्।

बाह्यप्रकृतिः बाधाकरा इति मानवस्य भावः। बाह्यप्रकृतेः आत्मनः विद्यमानः संबंधः पवित्रः इति ज्ञातश्चेत् सर्वदा प्रशांतिरेवेति विषयं विस्मरति मानवः। मानवस्यांतः प्रकृतिः दुष्टसंस्कारैः असुरप्रवृत्तिनां निलयश्चेत् जगत्सर्वं दुःखभूयिष्टं भवति। सा अंतः प्रकृतिरेव शुद्ध संस्कारैः दैवसंपदः निलयश्चेत्, बाह्याभ्यंतरयोः प्रशांतिरेव। 'मन एव मनु ष्याणां कारणं बंधमोक्षयोः' इति रहस्यं ज्ञात्वा मुनिपुंगवः पतंजलिः मनो निग्रहाय, मनसः निर्मलत्वसंपादनाय यमनियमाद्यष्टांगमार्गाणि उक्त्वा, मानवप्रशांतजीवनस्य कारणभूतो भवति। तस्य जीवितं पश्यामः।

'तत्र कापि ददृशो मुंनिकन्या गोणिकेति' गोणिका नाम एका मुनिकन्या गोनर्ददेशे तीव्रतपमाचरति। 'जन्म तापसकुले परिशुद्धे शीलं' तापसकुलसंजाता शीलवती सा 'प्राज्ञमर्पय सुतं मम' इति प्रतिदिनेऽपि सूर्यभगवंतं प्रार्थयन् अर्घ्यं ददाति। तदानीं समाधिनिष्टागरिष्ठः, लोक संहर्ता, भक्तवशंकरः शंकरः तां पवित्रमूर्तिं वीक्ष्य, तस्याः तपसः वैरा

ग्यस्य, पवित्रतायाश्च संतुष्य, लोकोद्धरणाय आदिशेषं तस्याः पुत्ररूपेण प्रसादितवान्। भगवदाज्ञया सः भास्कराय अर्घ्यप्रदान समये गोणिकायाः अंजलिमध्ये सूक्ष्मरूपेण प्रविश्य, अर्घ्यजलपातनसमये जलेन सह पृथिव्या मपतत्। तं दृष्ट्वा मोदेन सा तपस्विनी 'प्रांजलेः पतित इति पतंजलिः' इति नामकरणं कृतवती। स एव अस्माकं योगसूत्रग्रंथकर्ता पतंजलि महर्षिः। मानवानां मनोवाक्कायान् त्रिकरणशुद्धीकरणाय सः महनीयः अतीवकृषिं कृतवान् इति वक्तव्यम्। अत एव 'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन। योऽपाकरोत्तं प्रवरं मुनीनां पतंजलिं प्रांजलिरानतोऽस्मि॥' योगरूपेण योगसूत्राणि, चित्तस्य, पदद्वारेण व्याकरण महाभाष्यं वचसः, वैद्ये चरकवार्तिकं शरीरस्य च प्रसाद्य, मनोवाक्काय दोषान् दूरीकृतवंतं पतंजलि योगिवरं नमामीति वचनं अधिकं आनंद दायकम्।

'हिरण्यगर्भो योगस्य वक्ता नान्यः' इति याज्ञवल्क्यस्मृतिः। अपि च उपनिषत्सु केचन उपनिषदः अस्य योगसिद्धांतस्य विशिष्टतां स्पष्ट यन्ति। ग्रंथपठनात् केवल शास्त्राध्ययनादिभिः अनुभवः न सिद्धयति। अनु ष्ठानादेव अनुभवः सिद्ध यति इति योगसूत्राणां निर्णयः। सत्यमेव खलु। जीवः मानवो भूत्वा, मानवः साधको भूत्वा, साधकः सिद्धो भवितुं योग शास्त्रमेतदत्यावश्कम। अस्मात् योगात् समाधिसंस्थितयः सिद्धयन्तीति श्री पतंजलेः वचनम्। अपि च मानवस्य असर्वज्ञत्वात् अष्टांगेषु ध्यानमेकमंग रूपेणोक्त्वा, तस्य ध्यानस्य सर्वप्रपंचशासकः ईश्वरः ध्येयः इति चोक्त्वा ईश्वरः प्रणवस्वरूप इति निरूप्य, सगुणनिर्गुणसमन्वयं कृतवान्।

एतानि योगसूत्राणि पतंजलिऋषेः प्रणीतत्वात् 'पातंजलयोगसूत्रा णीती प्रख्यातानि। अस्मिन् ग्रंथे चत्वारः पादाः 195 सूत्राणि च संति। तत्र प्रथमः समाधिपादः, द्वितीयः साधनपादः, तृतीयः विभूतिपादः, चतुर्थः कैवल्य पादः।

'अथ योगानुशासनं' इति सूत्रेणारभ्य 'योगश्चित्तवृत्तिनिरोधः' इत्युक्त्वा, 'अभ्यासवैराग्याभ्यां तन्निरोधः' इति 'तस्यापि निरोधे सर्वनि रोधान्निर्बीजसमाधिः' इति च मुख्यविषयाः प्रथमे समाधिपादे उक्ताः।

'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः' इत्यारभ्य, साधनगम्यं समाधिं संसूच्य, 'यमनियमासनप्राणायामप्रत्याहारधारणध्यानसमाध्यष्टा वंगानि' इत्युक्त्वा, 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपेण यमेन बाह्यसंबं

ान्, शौच संतोषतपस्वाध्यायेश्वरप्रणिधानरूपनियमेन अंतःकरणशुद्धिं शरीर ृत्वस्य, चित्तैकाग्रतायाः आसनानि चोक्त्वा, यावदावश्यकं तावत् नाडी- ारिशुद्धतायाः प्राणायामं चोक्त्वा, अनेकसाधनविधानानि उक्तानि द्वितीये माधि पादे।

पुनः धारण ध्यान समाधिविधानानि, इन्द्रियनिग्रहोपायः, तत्फलितं, प्रज्ञातासंप्रज्ञातसमाधीनां लक्षणानि, अनेके सिद्धयश्चोक्ताः तृतीये विभूति ादे। चतुर्थे कैवल्यपादे जन्मादिसिद्धयः, वासनाक्षयः जीवन्मुक्ति स्थितिः, कैवल्यं स्वरूपप्रतिष्टा' इति अंतिमे कैवल्यस्वरूपं चोक्तानि।

अपि च सांख्यसिद्धांतानुसारेण योगसिद्धांतेऽपि पुरुषप्रधानयोः त्ववरणं कृतम्। संसारः, संसारकारणं, संसारनिवारणोपायः, मोक्षः, सृष्टि ाषयः, साधनविषयाः, समाधिरहस्यानि, कैवल्यस्थितिश्च उक्ताः। अस्मिन् ाास्त्रे उक्तरीत्या अन्यत्र कुत्रापि नोक्ताः इत्यत्र नातिशयोक्तिः। अपिचाने ानि भौतिकविज्ञानरहस्यानि विपुलीकृतानि अस्मिन् ग्रंथराजे। सांख्य सिद्धांते प्रकृतिविषयाः एव उक्ताः। ईश्वरप्रस्तावना न कृता। अतः योग सिद्धांते प्रकृतेः आधारभूतेति, शासनकर्तेति च ईश्वरप्रशंसा कृता।

अद्यावधि 'सर्वसिद्धांतसौरभमेतत् आंध्र, आंग्ल (The vision and voice of Indian Philosophy) हिंदी, कन्नड, संस्कृत भाषासु प्रक टितम्। अस्य ग्रंथस्य संस्कृतानुवादकेभ्यः श्रीमद्भ्यः डा. तट्टा विजय ाघवाचार्येभ्यः इतोधिकानि भक्तिज्ञानानि प्रदातु भगवान्।

अस्य ग्रंथस्य प्रकाशनाय 10,000 रूप्यकाणि द्रव्यसाहाय्यं कृतवद्भ्यः तिरुमलतिरुपतिदेवस्थानकार्यनिर्वहणाधिकारिभ्यः कार्तज्ञ्यमावि ष्करोमि।

माताजी त्यागीशानंदपुरी

ॐ

श्री शारदारामकृष्णाभ्यां नमः

सर्वसिद्धांतसौरभम्

मुखप्रबंधः

अस्माकं मातृभूमिः

I would have you day by day, fix your eyes upon the greatness of our country, until you become filled with the love at her, and when you are impressed by the spectacle of her glory, reflect that it has been acquired by men, who knew their duty and had the courage to do it. संपूर्णदेशभक्त्या निमग्नो यावत् भवति, तावत्पर्यंतमस्याः मातृभूम्याः औन्नत्ये प्रतिदिनेऽपि भवतां दृष्टिप्रस रणं ममाभीष्टम्। तदा उत्कृष्टं तेजोवंतं दृश्यं भवतां हृदयेषु उद्भूतेसमये स्वस्वविध्युक्तधर्मान् ज्ञात्वा, निर्वहणायोचितैः धैर्यस्थैर्यवद्भिः व्यक्तिभिः तत्संपादितमिति मन्तव्यमिति प्राचीनग्रीक्देशस्य तत्त्वज्ञः (Piracles) पिर किल्स् उक्तवान् 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति आर्योक्तेः अधिकाभिमानेन मातृभूमिं मनसि आराध्य, अनंतरं उक्तरीत्या जन्मभूमेः सर्वतोमुखाधिक्यतां सक्रम परिशोधनाविधानेन ज्ञात्वा, India I loved before I came away. Now the very dust of India has become holy to me, the very air is now to me holy, it is now the holy land the place of pilgrimage , the tirtha.[1] अहम् अत्रागमनात्पूर्वं भारतभूमौ प्रेम्णासम्। इदानीं भारतदेशस्य धूलिरेव परमपावनः इति मन्ये। तस्यदेशस्य वायुरेव दिव्यः। इदानीं मम यात्रास्थलमिव, तीर्थमिव च विराजते इति, पाश्चात्यदेशेषु भारतीयाध्यात्मिकविज्ञानडिंडिमस्य ध्वनिं श्रावयित्वा, स्वपर देशयोः भेदं ज्ञात्वा, मातृदेशोन्मुखोभूत्वा, विवेकानंदः आदर्शकवचनमुक्त वान्। Hearken unto me. Ye children of immortality, all ye who once dwelt in abodes of divine, I have known the supreme person, the one whose light shines forth from beyond the darkness.[1] पूर्वं परमधामवासिनः अमृततनयाः! मां व्रजत।

अंधकारं छेदनात्। अत्यंतसौन्दर्यतेजसा प्रकाशयन्तं परमपुरुषं जाने इति, स्वस्व दिव्याध्यात्मिकानंदतेजोपुंजैः मानवानाम् अज्ञानांधकारविच्छेदनादीक्षा दक्षैः सर्वत्याग मूर्तिभिः महर्षिगणैश्च, परमाध्यात्मिकप्रकाशप्रसाराणामवरोध कानां शक्तिनां निवारणेन, धर्मदेवतामुन्नतस्थाने प्रतिष्ठितुं 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारता। अभ्युत्थानमधर्मस्य तदाऽत्मानं सृजाम्यहम्॥' '...धर्म संस्थापनार्थाय संभवामि युगे युगे॥' (भ.गी.4-7,8) इति उक्त रीत्या, बद्धकंकणहस्तैः, अवतारवरेण्यैः आराध्यदेवताभिश्च अनवरतमाध्या त्मिकवातावरणवासनावाहिन्याः शीतलेन भारतीयेषु संप्रसारयन् ब्रह्मजिज्ञा सूनां आत्मानंदमाधुर्य रसान् प्रसाद्य, तन्मयान् कृत्वा, ज्ञानप्रदाता इति कीर्तिमंतं हिमनगं शिरो भूषणमिव धृत्वा, ज्ञानसंपद्विभूतिप्रकाशेन प्रवक्त इव परिव्राजकत्वमवलंब्य, देशपर्यटने आश्रितानां ज्ञानभक्तिभिक्षाप्रदात्री गंगा यमुनादिपुण्यनदीहार संशोभि तः सन्, अनादिकालात् अद्यावधि अविच्छिन्न लीलासर्वप्रपंचस्याध्यात्मिक गुरुस्थानमलंकृत्य, अस्माकं भारतदेशस्य प्राची नाधुनिकतत्त्वपरिशीलनं कृत्वा मनसा ज्ञात्वा, हृदयस्योद्वेगेन, पुलकितशरीरो भूत्वा, गद्गदगात्रो भूत्वा, स्तब्धचित्तो भूत्वा, तस्याः चरणयुगळस्य वंदनं यः न करिष्यति सः भारतीयः इति वक्तुं न शक्यते। अनादिकालादा रभ्य केवल भौतिकविज्ञानसंजनितसुखसंपद्भिरेव न संतृप्तो भूत्वा, 'लोकस्य का गतिः?'(छां.उ.1.8.7) 'ये यं प्रेते विचिकित्सा मनुष्येस्ती त्येके नायमस्तीति चैके'(कठ.उ.1.2.20) 'भगवान् कुतो ह वा इमाः प्रजाः प्रजायंत'(प्र.1.3) इत्यादि असंख्याकसंदेहानामन्वेषणेन नित्यानंदविभू तिना विराजिता भारती। If there is one place on the face of earth, where all dreams of living men have found a home from the very earliest days where man began the dream of existence, it is India.[2] मानवस्य जीवितस्वप्नस्यारब्ध प्राचीनकालात् मानवानां सर्वेषा माशयानां प्राप्तेः प्रपंचे सर्वत्रापि अर्हः भारतदेशस्यैववर्तते इति Romain Rolland, रोमेन् रोला India has always been a nation of Philosophers[3] हिंदूदेशं सर्वदा तत्त्वविदुषां निलयमिति माक्सुमुल्लर् इत्यादिभिः बहुभिः पाश्चात्यपंडितप्रकाण्डैः सहस्रधा प्रशंसिता इत्यत्राश्चर्य मेव नास्ति।

पूर्वम् - आधुनिकं च

तादृश परमपवित्रचरित्रात्मकं भारतमातृस्वरूपं समग्रं ज्ञातंचेत्

one has to travel far in time and space to have glimses of what she was and what she said[4] भारतं पूर्वं कथमासीत्? किमुक्तमिति विषयानामव गाहनाय देशकालयोः बहुदूरपयनं करणीयम्। The discovery of his past opened before man a new world of knowledge. It made him concious of his own heritage and inspired him[5] तस्य भूतकालविषयग्रहणं दृक्पथे एकं विनूत्नं ज्ञानं प्रदर्शयति। तत् तस्य परंपरागतं तत्त्वं विज्ञाप्य उत्साहयति। तस्मादेव विवेकानंदोपि But out of the past is built the future. Look back, therefore, as far as you can drink deep of the eternal fountains that are behind, and after that look forward, march farword, and make India brighter, greater, much higher than She ever was.[6] भूतकालात् संजनितः भविष्यत्कालः। तस्मात् यावत्पर्यन्तं शक्तिरस्तितावत्पर्यन्तं गतं पश्यतु। गतनित्यस्रवेभ्यः आनंदमास्वादयतु। ततः दूरं पश्यतु, अधिगच्छतु। पूर्वकालादपि भारतभूमिं तेजसा, उन्नतेन प्रकाशयतु इति उद्भोधनं कृतवान्। A great past ought to be followed by a greater future[7] उत्कृष्टतमं प्राचीनतां अधिकतरोन्नत भविष्यत् अनुसरिष्यतीति वदन् अरविंदः। You must know your past and recover it for the progress of your future[7] भवतः पूर्वचरितं ज्ञातव्यम्। भवतः भविष्यदभिवृद्धेः तस्य पुनरु द्धरणं करणीयमिति बोधितवान्। अपि च The whole past history of the world would be darkness to him and not knowing what those who came before him had done for him, he would probably care little to do anything for those who are to come after him[8] तथा प्रपंचस्य पूर्वचरितस्याज्ञानिनः सर्वमप्यंधकारमेव। आत्मनः पूर्वजनेः कृतस्योपका रस्याज्ञानात् तदनंतरजनेभ्यः किमपि कार्यं कर्तुमस मसमर्थोस्यात् इति पंडितानामुपदेशः।

तथा चेत्, निश्शब्दे, अनाद्यनंते, नित्यनिर्मंत्रणभूतकालवैभव चिंतने एव कालयापनं कुर्वन्, philosophy is essentialy concerned with the present.[9] तत्त्वशास्त्रं संपूर्णं वर्तमाननिबद्धमिति तत्त्वविदुषां वाक्यानां श्रवणेन, कार्याचरणदीक्षारहितचित्तास्संतश्चेत् न समुचितम्। It is not life, unless we can find the vital link between it and the

present[10] नूत्नतया तत् असंयोगितश्चेत् निर्जीवमेव भवति। सत्यस्य दृ स्थितमिति गोचरेऽपि, तत् सूक्ष्मपरिशीलनस्य अतिसन्निहितेन The past i with us, and that we are and that we have, comes from the past we are its products and we live immersed in it.[10] अस्मासु अंतर्ग गतम्। वयं, अस्मात्सर्वं च तस्मात् जनितं तस्य कार्याणि भूत्वा, व तस्मिन् वसामः इति पंडित जवहरलाल् नेहू महो दयस्य वाक्यानुसारे तत् अस्मासु ऐक्यं इति स्पष्टम्। तस्मात् If India forgets them sh will no longer remain India and much that has been made he our Joy and Pride will cease to be[10] भारतदेशं प्राचीनपुरुषा विस्मरिष्यति चेत्, भारतभूमिरिति नाम्ना वक्तुमनर्हा। आत्मानंददायकानि गर्वकारणानि सर्वाणि अपि अदृश्यानि स्युः इति नेहूपंडितस्य समुच्चि तोपदेशः। तस्मात् मूढतया पूर्वस्याराधनेन कर्मप्रवृत्ति मपि अविहाय, गत निरुपयोगकरमिति द्वेषं अविहाय, वर्तमानभविष्यत् कालयोः उपर्युक्तविध नेन तदनूदितमेव मुख्यकर्तव्यम्। To combine it with the present and extend it to future to break from it where it cannot be united, to so make all this the pulsating and vibrating material for thought and action - that is life.[10] भूतवर्तमानकालयोः विषयानामनुसंधानेन भविष्यत्कालविषयसम्मेलनेन, तस्मिन् समन्वये अनुपयुक्तान् तिरस्कुर्वन् भावनाचरणाभ्यां सर्वं सजीवसचेतन कार्यमेव कर्तव्यम्। तदेव जीवनं इति नेहूपंडितः उद्बोधितवान्।

The philosophy of a country is the cream of it's culture and civilization[11] देशस्य संस्कृतेः नागरिकतायाश्च तत्त्वशास्त्रं नवनीत मित्युक्तरीत्या, भारतदेशस्यौन्नत्यं अनादिगुरुपरंपरागताध्यात्मिकविद्यायाः वैभवमूलेन व्यक्तं भवति। भारतदेशस्य आध्यात्मिकविद्या एव मूलप्राण मिति सत्यं स्पष्टम्। तन्महिमातिशयेन India is the only country which has known God.[12] भारतावनी एकैव भगवंतं ज्ञातवतीति, The repository of noblest spiritual tradition[13] दिव्यातिदिव्य आध्यात्मिक संप्रदायस्याकरमिति, The greatest spiritual force of the world[14] प्रपंचे अत्युन्नताध्यात्मिकशक्तिरिति, The beating heart of the world[15] प्रपं चस्य हृदयस्थनमिति, The leader of the human evolution[16] मानव परिणामस्याधिनेतेति, The head of the world[16] प्रपंचस्य शिरः इति,

The mother of the world[17] जगन्मातेति च प्रख्यात्या, जगद्विदितया India is not for herself but for God - for the whole world[18] स्वार्थ. पररहिततया ईश्वरनिमित्तं, लोकसंग्रहणाय च स्थित्वा, भारति अलौकिक यशोनिधानेन प्रकाशते।

भारतदेशं - भौतिकविज्ञानं च

तथापि It is absurd to talk as though India produced nothing but Sadhus, Yogis, Mahatmas, Philosophers and the like. The life of India has displayed itself in all activities.[19] हिंदू देशं केवलं साधून्, योगिन्, महात्मनः, तत्त्वविदश्च मात्रं प्रसादितवती इत्युक्ते असमुचितम्। भारतीयजीवनं सर्वतोमुखशक्तिभ्यः प्रदर्शितवती। In mathematics the anccient Indians made some epock-making discoveries notably that of the zero sign, of the decimal place-value system, of the use of minus sign and the use of algebra of letters.[20] गणितशास्त्रे '0' शून्यस्योपयोगः, संख्यानां स्थानानुसारेण उपयोगस्य प्राप्तेर्विधानं, सांकेतिकगणितपद्धतिश्च इत्यादि अद्भुतांशान् प्राचीनभारतीयाः कृतवंतः। एतत् दशसंख्यामानं ऋग्वेदकाले एव भारता वन्यामुपयुक्तमिति प्रमाणानि सन्ति इति नेहूपंडितः उक्तवान्। नवमशता ब्दकालीनः पारशीकपंडितः Al Jahize आल् जहीज् अपि भारतीयगणित शास्त्रविशिष्टतां स्तुवन्, Hindus excel in astrology, mathematics, medicine and in various other sciences हैंदवः ज्योतिष, गणित, वैद्य मित्यादि विविधशास्त्रेषु अग्रगण्याः इति उक्तवान्। अनेकविज्ञानानामाधार भूत्यां भारत्यां प्रस्तुतकाले प्रपंचे अधिकतया उपयुज्यमानाः 1,2,3....0 पर्यंताः संख्याः संस्कृतसंख्या रूपानुनिर्मिताः इति, अपि च Gravitation was known by the Indians thousands of years before Newton was born.[21] न्यूटन् जननात् अनेकसहस्रवर्षेभ्यः पूर्वमेव भारतीयानां गुरुत्वशक्तिज्ञानमासीदिति विवेकानंदः उक्तवान्। प्रख्याततत्त्वशास्त्रज्ञः Will Durant विल् ड्युरेंट्, महाशयः सर्व मानवकोटिसमूहस्य भारतभूमिः मातृभूमिरिति संस्कृतमेव भाषानां सर्वासां जननीति, तत्त्वशास्त्रस्य माता इति, Mother through Arabs, of much of our mathematic, Mother through the Buddha of the ideals embodied in Christianity, Mother through the village community of self-

government and democracy.[22] अरब्देशीयानां द्वारा अस्माकं गणितशास्त्रे अधिक भागस्य बुद्धात् क्रैस्तवमतादर्शानां, ग्राम पंचायितीं आरभ्य स्वराज्यप्रजाराज्यानां च हिंदूमाता एव जननी इति वदन्, तथापि असंतृप्त्या Mother India is in many ways the mother of us all.[22] अपि च बहुविधैः अस्माकं सर्वेषामपि माता भारती इति स्तुवन्, सर्व ज्ञानप्रदात्र्याः भारतांबायाः पादपद्मसन्निधाने सः प्रणामं समर्पितवान्। भूगर्भात् बहिर्गतयोः, 5000 वर्षेभ्यः पूर्वमिति निश्चितयोः मोहंजदरो, हरप्पानगरयोः नागरिकतावैभवं परिशीलितं चेत् तस्य औन्नत्यं स्पष्टं स्यात्, ढिल्लीनगरसमीपे एकमुन्नतमयस्थंभमस्तीति, तत् शीतोष्णयोः अपरिणामवत् तत् दृष्ट्वा आधुनिकशास्त्रज्ञाः आश्चर्यं प्रदर्शयंति इति नेह्रू पंडितः उक्तवान्।[23]

एतादृश भूगोलसंबंधविषयाः एव न प्राचीनभारतीयाः स्वस्व कुशाग्रबुद्धीः खगोळेऽपि प्रसार्य, The motion of the moon and the sun were carefully observed by the Hindus.[24] सूर्यचंद्रयोः गमनमागमनं च हैन्दवाः सूक्ष्मतया परिशीलितवंतः इति, चंद्रकळापरिणामग्रहणं निर्दुष्टमिति कोल् ब्रूक् उक्तवान्। नवमशताब्दीकः Yaqubi याकूबी इति पर्षिया पंडितोऽपि Hindus are more exact in astronomy and astrology than any other people. सर्वैः इतरदेशीयेभ्यः भारतीयाः ज्योतिष, खगोळशास्त्रयोः निर्दुष्टतया संतीति प्रस्तौति। तस्मा त We find that of all the nations the Hindus alone had well nigh accurately determined the rate of the precision of the equinoxes.[25] प्राचीन देशीयेषु भारतीयाः मात्रमेव अतिसक्रमरीत्या अयनगमनविधानं ज्ञातवंतः इति बाल गंगाधरतिलक् पंडितः सगर्वमुक्तवान्। पतंजलिमहर्षिकृतानि योगसूत्राणि दृष्टानि चेत्, 'भुवनज्ञानं सूर्ये संयमात्' (3.16) इ तेन कारणेन चतुर्दश भुवनानां ज्ञानं सिद्ध्यतीति सूचितवान्। तस्य भाष्यकर्ता व्यासदेवः तेषां भुवनानां वैशाल्यादिविवरान् उक्तवान्। तथैव 'चंद्रे ताराव्यूहज्ञानं' (3.27) इति, 'धृवे तद् गतिज्ञानं' (3.28) इति च खगोळरहस्यानि सूत्रप्रायेण पतंजलिमुनिवरेण्यः विवृतवान्। आधुनिकभौतिकशास्त्रस्याधारभूतस्य पदार्थस्य नित्यतवं अस्माकं पूर्वऋषीश्वराणां सुविदितमिति श्री रामकृष्णानंदस्वामि वदति[26] About cosmology and all the pertains to it and you will find how wonderfully they are in accordance with the

latest discoveries of modern science and where there is disharmony, you will find that it is modern science which lacks and not they[27] भूतसृष्टिः, तेषां विषयाश्च आधुनिकविज्ञानशास्त्रे परिशील नांशानामद्भुतानुसरणे कथमिति भवंतः जानंति। कुत्रापि वैरुध्यमस्ति चेत्, आधुनिकविज्ञानलोपादेव, न तु प्राचीनमहर्षिणां लोपः ज्ञातं भवंतः जानं तीति विवेकानंदः पाश्चात्यपंडितसभासु प्रकटितवान्। तथैव मनोधर्म शास्त्रेपि भारती निगूढा खलु। कपिलस्य सृष्टिविधानं, पतंजलेः मानसिक परिणाम रहस्यं, कणादस्य अणुवादः, गौतमस्य तर्ककौशलं, जैमिनेः शब्द नित्यता, कर्मरहस्यानि, व्यासस्य जीवब्रह्मणोः परमार्थौ च विशालदृक्पथ भौतिकविज्ञानवरेण्यस्यापि आश्चर्यमानंदं च संजनयंति। तस्मादेव They were in touch with the latest discoveries of science and religion.[28] प्राचीन भारतमहर्षियः अत्याधुनिकभौतिकशास्त्रस्य, मतस्य विनूत्न रहस्यानि विदितवंतः इति वेर्नन् आर्नाल्ड् इति प्रख्यातकविः सुष्टु प्रति पादितवान्।

भारती - विज्ञानप्रदात्री

उपर्युक्तरीत्या असमानसर्वतोमुखसंस्कृतीसंपदं सृष्ट्वा, अभिवृद्धिं च कृत्वा, अनुभूयमाना सती त्यागप्रधानभूता भारतजननी सर्वमानवकल्याण मेवाकांक्षयन् प्रेमैकस्वरूपिणी भारती आश्रितानामनाश्रितानां च विज्ञान भिक्षां प्रसाद्य, अस्मात् प्रापंचिकसुखपंकिलात् उद्धर्तुं गुरुतरसहकारिणी भूत्वा, अनादिकालद्विराजते इति प्राक्प्रतीचीपंडितलोकस्य सुविदितमेव। ग्रीक्, ईजिप्ट् च मात्रं Egypt herself in the earlier antiquity, received her laws, her social institutions, her arts and her sciences from India. अतिप्राचीनकाले अस्माकं निबंधनानि, सांघिक व्यवस्थाश्च कलाः, भौतिकशास्त्रं च भारतदेशात् गृहीतवत्यौ इति दिव्य ज्ञानसंघस्य स्थापका ब्लावट्क्सी Madame Blavatsky विदुषीमणिः स्वस्याः Secret Doctrine इति ग्रंथे उक्तवती। पाश्चात्यतत्त्वशास्त्रस्यादि पुरुषेषु मुख्य तमः Plato प्लेटो नाम ग्रीक्देशीयः स्वस्य गुरोः Socretes सोक्रटीस् महाशयस्य मरणानंतरं हिंदूदेशमागत्य, तत्त्वशास्त्रमधीतवान् इति ज्ञायते। सोक्रटीस् कालेऽपि भारतीयब्राह्मणगुरुवर्याः बहवः Athens पट्टणे बोधनं कृतवंतः इति विदितम्। अपि च क्री.पू.550 संवत्सरकालीनः Pythogoras पैथोगरस् इति सुप्रसिद्धशास्त्रज्ञः हिंदूसंप्रदायान् भारतदेशे अधीतवान्

इति वादः। सः पृथ्विगुरु इति ब्राह्मणतत्त्वज्ञः इति, बोधनार्थं ग्रीक्देशं गतवानिति केषांचन वादः।[29] तत्पूर्वमपि The Greeks before the time of Pythogoras travelled into India for instruction ग्रीक्देशीयाः विज्ञानार्थं हिंदूदेशं गच्छंतीति Voltaire वोलटेर् इति पाश्चात्य वैज्ञानिकः वदति। भूगर्भात् उपलब्धानां चारित्रकसूचनानामनुसारेण दृष्टश्चेत्, क्री. पू. दशमशताब्देऽपि भारतविज्ञानवाहिनी पाश्चात्येषु प्रवहितवती इति व्यक्तं भवति। एतान् विषयान् प्रख्यातपरिशीलनादक्षाः पंडिताः विलियं जेम्स् (William James)[30] (M.Winternitz) एम्. विंटर्निट्ज इत्यादयः असंख्याकविज्ञानपराः अंगीकृतवन्तः।[31]

भौतिकविज्ञानम् - तत्त्वशास्त्रम्

तत्त्वतः Man is a rational animal मानवः बुद्धिमान् जंतुः इति प्राचीन ग्रीक् तत्त्वज्ञः Aristotle आरिष्टोटल्, इति Man is a thought adventurer[32] मानवः भावान्वेषीति D.H. Lawrence डि.हेच्. लारेन्स् महोदयेनोक्तरीत्या अनादिकालात् मानवः प्रकृतिसिद्धं सर्वं आत्मनः परिशीलनादृष्ट्या विचारयति। तादृशं मानवस्य आश्चर्यकरं दृष्टिं बाह्यप्रकृतेः स्थूल विषयपरिशीलने एव प्रसारितवान् चेत्, सः भौतिकशास्त्रस्याभिवृद्धिं कृत्वा, ताः भौतिकशक्तीः स्वस्व नित्यजीवनस्य उपयुक्तां करोति। तथा विना स्वदृष्टीन् प्रकृतिं भोग्यं कुर्वन्, अनुभूयमानस्य आत्मानि, नाम जीवात्मनि प्रकृतेः पालके ईश्वरे च केंद्रीकृतवान् चेत्, शुद्धचैतन्यस्वरूपं, प्रकृतिदूरं स्वस्व नैजं ज्ञात्वा आनंददायकं कैवल्यमाप्नोति। मानवः केवलं प्रकृति दृष्टिमेव परिशीलयन्, अनवरतं प्रकृतेः स्मरणत्वात् 'यद् भावं तद् भवति' इत्युक्तरीत्या, प्रकृतेः बद्धो भूत्वा, प्रकृतेः अतीतव्यक्तिरपि प्रकृति स्वरूपेण परिणमन्, तज्जनिते सुखदःखद्वंद्वचक्रे बद्धो भूत्वा, परिभ्रमन्, तस्मात् विमुक्तेरुपायज्ञानेन निबद्ध्यते। तथा नास्ति चेत् शुद्धचेतनदृष्ट्या स्वस्व रूपानुसंधाने भ्रांतिं त्यक्तवा आनंदमाप्नोति।

अस्मिन् मार्गद्वये समुचितं किमिति वादः अस्ति। प्रकृतेः रहस्यग्राहको विज्ञानी, तान् सर्वोपयुक्तेनाचरन् प्रपंचस्य सहकारि भवतीति केषांचन वादः। भौतिकशास्त्रफलितानि सर्वमानवव्यक्तानीति, आध्यात्मिकविषयाः न तु सर्वसाध्याः इति च तेषां संदेहः। तथापि भौतिकशास्त्रफलितानि पश्यन्, आस्वादयन्, रमन् च इतरेषामपि प्रसादयंतं 'आत्मानं' मात्रं

विस्मरणं चिंतनीयम्। सर्वान् सृजन्, पोषयन्, नाशयन् एतासु नित्यलीलासु आनंदवाहिन्यां प्लवन्, सर्वसूत्रधारिं, विचित्रादृश्यनाटकं परमात्मानं न जानाति जीवात्मा। विचारकरमिदं जीवानाम्। यादृश शक्तैरभावश्चेत्, एषा सर्वजडप्रकृतिः निष्फला स्यात्, तादृश भावातीतशक्तौ अस्माकं दृष्टयः अनिमग्नाश्चेत्, अज्ञानमेव। तस्मान् उपयुक्तेन पदार्थेन मोदनीयं वा, तस्य कर्तारं दृष्ट्वा मोदनीयं वा इति प्रश्नः।

भोग्यस्य उपयुजमाने विधाने प्रत्यक्षेन द्वौ मार्गौ स्तः। प्रथमः सक्रमः। द्वितीयः अक्रमः। स्वस्य भोग्यमानां प्रकृतिं अक्रममार्गे उपयुक्तं चेत्, जगतः एव विपत् स्यात्। सक्रममार्गे उपयुक्तं चेत्, सर्वसंक्षेमकरम्। तस्मात् तयोः सक्रमाक्रमोपयोगविधानयोः फलितानि विशदीकृत्वा, विधि निषेधयोः बोधने नैतिकविधानं, धर्मनिरतिश्च अत्यावश्यके स्याताम्। प्रकृतेः शक्तिग्रहणाभावेन लोपाभावेपि, अक्रमोपयोगेन महारिष्टदायिकं स्यात्। तस्मादेव सर्वजीवसृष्टिकर्ता ईश्वरः, जीवानामन्योन्यश्रेयोभिलाषया 'तत् श्रेयोरूपमत्यसृजत धर्मं...तस्माद् धर्मात्परं नास्ति'(1.4.14) अद्भुतं धर्मम् असृजत् इति, तस्मात् धर्मात् उत्तमं नास्तीति च बृहदारण्यकोपनिषत् ज्ञापयति। भौतिकविज्ञानशास्त्रज्ञेषु अग्रगण्यः ऐन्स्टीन् अपि The fate of the human race was more than ever dependent on it's moral strength today. The way to Joyful and happy state is through renunciation and self limitation everywhere. I am absolutely convinced that no wealth in the world can help humanity farward. The example of great and pure characters is the only thing that can produce fine ideas or noble deeds.[33] अद्य मानव जातेः श्रेयः पूर्वात् स्वस्यनैतिकशक्तौ वर्तते। सर्वत्र त्यागः स्वार्थ परिमिति रेव सुखसंतोष परिस्थितेः उपायः। मानवजातिः पुरोगमनाय धनमसमर्थमिति ममाभिप्रायः। उत्तमानां महतामादर्श एव पवित्रभाव जालानां, दिव्यकार्याणां च उत्पत्तेः प्रधान इति प्रस्फुटं उक्तवान्। तस्मात् प्रस्फुटतया सर्व व्याप्ताः प्रकृतिशक्तयः न। तेषामुपयोजक आत्मधर्म एव इति स्पष्टं भवति। भौतिकविज्ञानफलितेभ्यः। आत्मज्ञानफलिततान्येव त्रयमधिमतया अनुभवन् वर्धामहे इति विदतिम्। भौतिकविज्ञानी प्रकृति रहस्यानि मानवानां ज्ञाप्य, सद्विनियोगेन मानवानां यथा उपकरोति, तत्पू

र्वमेव सहस्राधिकतया आत्मतत्त्वज्ञानी आत्मधर्मान् विज्ञाप्य, सर्वैः मानवैः प्रकृतितशक्तीनां सद्विनि योगत्वं प्रबोध्य महोपकारि भवति। तत् यावत् प्रस्फुटम्, एतदपि तावत् प्रस्फुटम् अधिकं च। तत् यावत् अनुभवनीयं एतदपि तावदेव। तत् सर्वेषां मानवानां यथालभ्यं, तस्मादपि अधिकमुप लभ्यमेतत्। अपि च सर्वेषां सन्निहितं भवति।

भौतिकविज्ञानम् - अशक्तता

सूक्ष्मतया पर्यालोचनं कृतं चेत्, भौतिकविज्ञानमपि किंचित्पर्यंत मेव। तदनंतरं अगम्यगोचरे अद्भुतानंतत्वे परिभ्रमति। एतद्विषयम् अस्माकं दृक्पथस्य आनीय, नेहूपंडितः It was obvious that therewas a great unknown region all around us, and science with it's magnificient achievements, knew little enough about it. अस्माकं परिवृत प्रदेशे अखंडमगोचरतत्त्वमस्ति। आत्मनः अद्भुतैः असाधारणसाधनैः तत्त्वं किंचिदपि न जानाति भौतिकविज्ञानं इत्युक्तवान्। सत्यं खलु। गेलीलियो (Galilio) कोपर्निकस् (Copernicus) इत्यादयः खगोळशास्त्रज्ञाः सूर्यस्य परिवृते ग्रहानां भ्रमणं विदितवंतः, स्वतंत्राभावेन किमर्थं भ्रमंति? सूर्ये विद्यमाना आकर्षणशक्तिरेव कारणमिति उक्तवंतः। उन्नतग्रहानां परिसरप्रदे शेषु विद्यमाना शक्तिः परिवृतं वातावरणं वर्तुलाकारेण करोति, तस्मात् सूक्ष्मग्रहाः स्थूलग्रहानां समीपे परिभ्रमंतीति ऐन्ष्टीन् (Einstien) सिद्धांतः। गुरुत्व (Gravity) रेलेटिविटि सिद्धांतयोः (Law of Relativity) द्वयोः उन्नतग्रहे विद्यमाना शक्तिः सामान्या एव। सा शक्तिः किमर्थं स्थातव्या? एतेषु ग्रहेषु चलनशक्तिः किमर्थमुत्पन्ना? केन संभवः? इत्यादयः विषयाः इदानीमपि अनिर्धारिताः एव। अपि च एतेषां सर्वग्रहाणामाधारेण अणौ अंतर्गतानि (Electron, Proton, Nutrons) एलेक्ट्रान्, प्रोटान्, न्यूट्रान् शक्तिबीजानि, तेषां लक्षणरहितेभ्यः (Cosmic Showers) कास्मिक् षवर्स् इत्येतेभ्यः कथमुत्पन्नानि? कास्मिक्षवर्स् ग्रहमंडलांतरालात् कांतिवेगेन नाम तृटिकाले 1,86,300 मैल्स् वेगेन किमर्थं गच्छंति? कस्मादुद्भवः? It is still one of unsolved riddles of science[34] तदिदानीमपि शास्त्रज्ञा नामनिर्धारितसमस्यैवेति प्रख्यात वि. जार्जि गामौ (George Gamou) स्प ष्टीकृतवान्। पुनः प्रोटान् न्यूट्रान् द्वयोः ऐक्यं Nuclie न्यूक्लियै इत्यु च्यते। अगोचरशक्त्या, स्नेहभावेन स्थिते समये, तद्विरुद्धशक्तिमंतः 'एल

क्द्रान्स्' तय प्रदक्षिणं कुर्वंति। ग्रहाः अपि तथैव सूर्यप्रदक्षिणं कुर्वंति। आश्चर्यकरे अस्मिन् विधाने परिभ्रमणं किमर्थं? मध्यस्ता Cohesive forces इति परस्परापेक्षिका शक्तिः का? किमर्थं तत्रास्तीति आंग्ल शास्त्रज्ञेन जे.जे. थाम्सन् पंडितेन गृहीता। एलक्ट्रिक् शक्तिः कुत्रास्ति? तस्य कारणं किम्? तेजोप्रसारस्य कारणमित्युक्त Light ether कांति प्रसर णकारणाकाशः which so far had nothing but the name नाममात्रावशिष्टो भूत्वा, सामान्यपदार्थ लक्षणस्य दूरे स्थित्वा, शास्त्रज्ञानां समस्यारूपेण वर्तते। तस्मिन् अणुनिर्माणमपि अभावमेव। अनिर्वचनीयं तत्त्वं space अंतरालमिति शास्त्रज्ञाः संतृप्तिं प्राप्तवंतः। तथैव एतेभ्यः 'न्यूक्लियस्' अवयवेभ्यः cells सेल्स् इत्युक्तां जीवकणानि कथं जनितानि? अचेतनात् चेतनं संभवति वा? चेतनमचेतने अंतरं वा? तेषु जीवकणेषु प्रथमतः अविद्यमानाः लिंगभेदरूप chromosomes क्रोमोसोम्स् कथमुत्पन्नाः? तस्य कारणं किम्। तस्य जीवकण स्य अशन, परिणाम, संख्याभिवृद्धिशक्तयः कथमुत्पन्नाः?

अनेन प्रकारेण विचारयामश्चेत् science भौतिकविज्ञानशास्त्रं शनैः शनैः स्वस्याशक्तितां जानाति। तथापि धैर्येण तानि रहस्यानि ज्ञातुं यत्नं करोति। तथापि तस्य यत्नं पदार्थेषु Why? किमर्थमिति, विषयपरिशीलनं विहाय, How? कथम्? इति विषये एव स्वचातुर्यस्य प्रसरितत्वात्, जीवितरहस्यज्ञानस्याशक्ता भवति। कर्तृत्व, भोक्तृत्व, अहंकार, ममकारा दिभिः लक्षणैः सहितं जीवतत्त्वमजानन् Science ignored the ultimate purposes and looked at the fact alone - science had told us nothing about the purpose in life.[35] परमादर्शेषु लक्ष्यं न स्थाप्य, भौतिक विज्ञानशास्त्रं यथातथोक्तं विषयमेव द्रष्टुं वांछति। जीवनोद्देशमुद्दिश्य किंचि दपि न स्पष्टीकृतमिति, perhaps science has been too narrow in it's approach to life, and has ignored many vital aspects in it.[35] प्रायशः भौतिकविज्ञानशास्त्रं जीवनस्थितीन् संकुचितमकरोदिति मंतव्यम्। तस्मात् जीवने अनेकमुख्यविषयाः न ज्ञाता इति नेहूपंडितः उक्तवान्। अस्माकमिन्द्रियैः गृहीतं मात्रमेव जीवितपरमार्थः न। तस्मात्, भौतिक विज्ञानशास्त्रं भौतिकविषयज्ञाने एव संतुष्टत्वात्, जगति सुखजीवनविधानस्य

aim only when it conduces to the growth of man into his higher possibilities, when all his expressions converge towards a greater than his present life in the Ignorance.[36] यथार्थतः यदा स्व स्य प्रस्तुताज्ञजीवितादपि उन्नतस्थितेः स्वस्य सर्वप्रवृत्तीः ऐक्यं भवति। यदा स्वस्य उत्कृष्टावकाशानां मानवाभिवृद्धेः अवकाशाः संति, तदानीमेव संस्कृतेः परमादर्शः सिद्ध्यति। तादृ शशक्तिः भौतिकशास्त्रे न दृश्यते खलु।

तत्त्वज्ञानस्यावश्यकता

भौतिकशास्त्रसहायजनितसुखप्रपंचे अधिकतया अभिवृद्धिः कृतेऽपि, मृत्युः, अकस्मात्संघटनाः, दोषः, अनित्यता, क्षणिकत्वमित्यादयः Ultimate Situations[37] मानवातीत संघटनाः अस्मान् अनुसरन् अस्माकम शक्ततां प्रकटयन्ति खलु । तेभ्यः विमुकत्यर्थं अवकाशाय परिशील्य विमुक्तेः यत्नमेव तत्वार्थदृष्टिः। तस्मादेव बाह्यस्य सुवर्णात्मके प्रपंचे जीवस्य दुःखं दृष्टवा, If all the mountains were books and all the lakes ink and all the trees pens, still they would not suffice to dipict the misery.[38] पर्वतानि सर्वाणि ग्रंथाः भूत्वा, सरांसि मषी भूत्वा, वृक्षाः सर्वेपि लेखिन्यः भूतेऽपि प्रपंचे स्थितं दुःखं वर्णितुमसाद्य मिति जाकोब् बोह्मि इति अनुभवज्ञः उक्तवान्। प्रपंचस्थं दुःखं दृष्टवा, तरुणो पायाय सर्वं त्यक्त्वा, जगतः उद्धारकः गौतमबुद्धोऽपि Running from birth to death, from death to birth we have shed, on this long way, truely more tears than water contained within the four great oceans[39] जननात् मृत्युः, मृत्योः जन्मेति परिभ्रमन् सुदीर्घे अस्मिन् प्रयाणे चतुस्समुद्रेषु बिद्यमाना जलादपि अधिकाश्रुधाराः यथार्थतः अस्माभिः त्यक्ताः इति उक्तवान्।

प्रपंचस्य यथार्थतां ज्ञात्वा, प्रचीनभारतीयऋषिवरेण्याः अस्मिन् भौतिकप्रपंचे आधाराभावेन Though we may be weak and erring mortals, living a brief and uncertain span of life, yet there is something of the stuff of the immortal God in us.[40] वयं दुर्बलाः, दुष्टाः, अल्पाश्च भूत्वा, अनिर्धारितं जीवितं अनुभवामः। तथापि अस्मासु

अमृतं भगवत्तत्वमधिकमिति नेह्रूपंडितेन उक्तरीत्या, There is infinitely worthier subject than all these trees and stones and even all these stars, there is the mind of man. What is man, and what can he become.[41] वृक्षाः, वम्लीकानि, नक्षत्राणि इत्यादि विषयेभ्यः अत्युत्कृष्टविषयः कः? मानवः मनोवान् खलु। मानवः कः? किं स्यात् इत्यादि विषयाः योचनार्हाः इति सोक्रटीसतः पूर्वमेव ज्ञात्वा, भौतिकशास्त्र स्य परमावधिरेव तत्त्वशास्त्रमिति रहस्यं विदित्वा 'भोगायतनं शरीरं' (न्या. सू. 1.1.9) भोगायाधिष्ठानं शरीरमिति, तदभावे जगदेव नास्तीति, तथापि 'देहो देवालयप्रोक्तो' इति श्रुतिवचनविधानेन तस्य जीवस्य आश्रयस्थान मिति च आश्रयाश्रयीभावसंबंधेन तयोः अन्यत्वे सिद्धे, तीव्रजिज्ञासया 'न खलु नित्यं किंचिज्जायते म्रियते वा'(न्या.सू.4.1.7) जनितस्य मृतस्य च अनित्यत्वात् जननमरणाभ्यां सर्वदृश्यपदार्थाश्च नश्वरा इति 'तत्रात्मा सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञः सर्वानुभावी'(न्या.सू.1.1.9) आत्मा एव सर्वदृक् भोक्तादिलक्षणलक्षितं चेतनं इति ज्ञात्वा, अज्ञमानवानामपि प्रबोधितवंतः।

तत्त्वज्ञानं - मतानुष्ठानं च

तथपि शुष्कतत्वविचारणे कालयापनस्य नेच्छया Philosophy is the study of the nature of experience as a whole[42] तत्त्वशास्त्रस्य सुपूर्णानुभवतत्त्वविचारणत्वात् Mainly all enlightened life led with far-sight, fore-sight and in-sight[43] तस्य मुख्यतः दूर, ऊर्ध्व, अंतर्दृ ष्टिभिः सह दिव्यजीवनविधानमेवेति तस्मादेव Self comprehension of Reality.[44] परमार्थतत्त्वं स्वस्वरूपेण व्यक्तं स्यात्, तस्मात् तदाश्रयेण, स्वस्वनित्यजीवनेषु समन्वयं कृतवंतः। ईश्वरमुद्दिश्यास्माकं काऽपि भावना तात्विकेन विद्यमानेऽपि, अस्माकं जीवने अप्रतिबिंबितः चेत्, व्यर्थमेव स्यात्। तादृश समन्वयमेव नाम तत्वार्थबोधक तत्वशास्त्रस्य, तत्वार्थानुभवा नुष्ठानस्य मतजीवितस्य च ऐक्येन मानवलोकस्य विकासः स एव पर मार्थप्रकाशः। तस्मादेव भौतिकविज्ञानात् बलीयं तत्वशास्त्रम्। तस्मादपि अनुभवप्रसादकं मतं मुख्यम्। Of all the forces that have worked and are still working to mould the destinies of the human races none certainly, is more potent than that manifestation which we

call religion[45] मानवस्य अवधिनां निर्मातारसु सर्वेतरशक्तिषु मतात् प्रत्यक्षं शक्तिमंतं अन्यद् किमपि नास्ति इति विवेकानंदः उक्तवान्। तथापि पूर्वोक्तरीत्या भौतिकविज्ञानशास्त्रं मुख्यविषयान् विस्मरति सति, तान् विचारयन् तत्वशास्त्रं कालक्रमेण शुष्कजीवने आसीत्। मतानि नित्य जीवितरीतिषु नियाम्य, तत्वार्थनामनुसंधानेन मानवानीकस्य संघटितेपि तत्र तत्र काठिन्यं प्राप्तम्। तथापि तत्वशास्त्रमतयोः बाह्यविषयदूरत्वात् तत्र दोषाः सुलभसंस्करणीयाः भवंति। तत् द्वयमेव मानवानां महासभ्यताः दत्वा वर्धनमकरोत्। केवल अंतदृष्टिजनितात्मानंदसंपद्भिरेव न। बाह्य दृष्ट्या, अज्ञमानवलोकस्य, पवित्रसांघिकजीवितविधानं बोध्य, ब्रह्मपथस्य मार्गं मदर्शयत्। तस्मात् प्रपंचशांतिसौख्ययोः भौतिकविज्ञानशास्त्रादपि धार्मिकप्रबोधकतत्वशास्त्र, मतजीवितान्येव मुख्यकारणानीति स्पष्टं भवति। तस्मात् मानवानां कल्याणकांक्षिणी भारतमाता, पूर्वोक्तरीत्या भौतिकजीवन ; धाने आवश्यकानां विज्ञानानां कृषिं कृत्वा, बहुविधैः प्रपंचस्योप युक्तेऽपि, एतेभ्यः सर्वेभ्यः अत्यंतावश्यकानां नैतिकधार्मिकजीवनानामेव अधिकं प्राधान्यं दत्वा, सर्वप्रपंचस्य श्रेयो मार्गप्रबोधकाश्च भूत्वा, अतिप्र. ाचीनकालात् विराजते इति सर्वजनविदितम्। तस्मात्, हिंदूसंप्रदायसंस्कृतयः स्थूलबाह्यप्रपंचविषयसुखान्वेषणायुक्तमेव न, अतिसूक्ष्म अंतःप्रपंचगताव्यया नंदान्वेषणे निमग्ना इति ग्राह्यम्। तस्मात् विवेकानंदस्य वाक्येषु Here first sprang up inquiries into the natı of man and into the internal world[45] प्र...तः अत्रैव मानव .त्वं, अंतःप्रपंचं चोद्दिश्य अन्वेषणानि उत्...नि। एतद्रहस्यं ज्ञात्वा, अनु सृत्य, परमानंदेन तस्मिन् मार्गे 'क्रिण्वंतु विश्वं आर्यम्' इति सूक्तिमनु सृत्य, सर्वं प्रपंचम् आर्य भूमि नाम धार्मिकभूमिरूपेण परिणामं कर्तुं सर्वेपि बद्धकंकणहस्ताः भवंतु।

प्रबोधः

अनादिकालात् भारतदेशस्य आध्यात्मिकजीवितमेव जीवितपरमार्थम्। जन्मतः प्राप्तं स्वभावं परिणामं कर्तुं मानवस्य यथा दुर्लभं भवति तथैव देशस्य स्वभाव परिणाममपि कष्टमिति विवेकानंदस्य वचनेषु Give it up and you die.[45] तस्य परित्यागः आत्महत्यापरिणामप्राप्तिरिति ज्ञात्वा, It is feared that even this small

ramnent of philosophical learning will vanish in one or two generations, as the youths of the day, do not take to those studies.[46] युवान: अस्य विद्याभ्यासस्य न स्वीकृतत्वात् प्रस्तुतं तत्वविद्याज्ञानलेशोऽपि अदृश्यं स्या दिति भीतिरिति माक्समुल्लर् निदेशं हृदये संस्थाप्य Europe is today turning towards India in her search for a saner and surer attitude of life and humanity that which has brought her to the brink of ruin.[47] आत्मना आचरितात् जीवितविधानादपि सरसं, स्थिरं च जीवितमन्वेषयन्, युरोप् देश: भारत देशे दृष्टिं स्थापितवतीति संबंधि कानां वाक्यानि श्रुत्वा, to bring new life and new vitality to the western and other nations, which are now almost borne down half killed and degraded by Political ambitions and social scheming[48] राजकीयकांक्षै: सांघिकव्यूहैश्च पति तम्, अत्यंतं मरणोन्मुखानां पाश्चात्यदेशानां इतरप्रपंचस्य च नूत्नशक्तिं, विनूत्नजीवनविधानं च प्रसादितुं भारतीया: सर्वेऽपि संसिद्धव्या:। तदर्थं A nation cannot be strong unless it believes in God. भगवत: विश्वासस्याभावे बलत्वं न सिद्ध्यतीति प्लेटो पंडितस्य वाक्यानामनु सारेण अनादिकालात् आध्यात्मिककृषिं कृत्वा, There is no study so elevating as that of the Upanishads[49] दिव्यानामुपनिषदामध्ययनानां तुल्यमध्ययनं अन्यत् नास्तीति, The six systems in which the philosophical thought of India has found its full realisation.[50] षड् दर्शनानां भारतीयाध्यात्मिकविज्ञानं पूर्णसिद्धिं प्राप्तमिति यशोभूषणानि दर्शन शास्त्राणि, अन्यत्राभावं पुराणेतिहास धार्मिकसाहित्यसंपदं च स्थितां, सर्वांग सुंदरीं भारतीं सर्वाध्यात्मिकसिंहासने अभिषेकं कर्तुं, यत्नं करिष्याम:। The Indian who has lost his Indian Soul must regain it. स्वस्य भारतीयत्वं य: त्यक्तवान् स: भारतीय: पुन: संपाद्य, तस्य अभिवृद्धे:, पुनरुद्धारणे च निमग्ना: भवन्तु।

Therefore my friends, the way out is, that first and foremost work, we must keep firm hold on spirituality that inestimable gift handed down to us by our ancient fore-fathers.[50]

त्मिकजीवितविधानं वयं सुष्टु प्रतिपादयिष्यामः, स एवास्माकं मुख्याति मुख्यः मार्गः।

तथा कृत्वा 'स्वयं तीर्णः परां तारयति' इति अर्हां लब्ध्वा, अस्माकं प्राचीनऋषिवरेण्यानां ऋणविमुक्तिं च कृत्वा, आर्याः इति सगर्वेण आनंदमनुभविष्यामः।

सर्वसिद्धांतसौरभम्

सर्वतोमुखाध्यात्मिकाभिवृद्धेः समरसं साधनं यथा आवश्यकं तथैव निष्पाक्षिकसिद्धांतज्ञानमपि आवश्यकं भवति। तथापि सर्वसाधारण तया सर्वेपि प्रथमविषयस्य मात्रमेव प्राधान्यं दत्वा, द्वितीये लक्ष्यशुद्धेः लोपात्, अनुष्ठानपराणां साधनं सक्रममपि, विशालदृक्पथस्याभावात्, पाषं डत्वेन परमतसिद्धांतखंडनादिदुस्संघटनानामवकाशो भवति। तस्मात् सर्व सिद्धांतज्ञानस्य सिद्धिपर्यंतस्यावश्कत्वात् तत्र समन्वयबुद्धिः अत्यावश्यकं भवति। तथा वर्तते चेत्, मतजीवनं समरसं, सुखकरं, अभिवृद्धिदायकं च भवति। अपि च सिद्धांतपाठः यथा मुख्यः तथैव तस्य सिद्धांतस्य प्रतिपादकस्य चरिताविशेषाः, अनुभवसंपत् च मुख्यम्। अत्युत्तम साधना दिषु असाधारणमनुभवात्मकं महात्मनः वाक्यं अमोघशक्तया अस्माकं हृदयेषु निक्षिप्तं स्यात्। तादृश सिद्धांतः प्रामाण्यतां संपादयति। मुख्यतया अस्माकं आर्षसंप्रदाये सिद्धांतस्य यथा प्राधान्यं, तथैव तस्य कर्तुः जीवितविशेषाः अपि। तस्मात् सिद्धांतपठनेन संस्थापकस्य विषयाः अपि अवश्यं पठनीयाः।

तस्मात् सर्वविधसाधनादीनां ज्ञानेन, सर्वसमन्वयं कृत्वा, अनुभवे, आनंदे निमग्नं, श्रीसिंगरिदासभक्तवरेण्यस्य पौत्रमिव, नित्यनिराडंबरजीवने प्रपंचस्य व्यवहारदूरो भूत्वा, श्रीरामनामोच्चारणातरंगवाहिन्याः निमग्नत्वात् विशालहृदयस्य चेन्नकेशवस्य, सरलहृदयस्य, प्रेमैकस्वरूपिण्याः आदर्श गृहिण्याः, सरस्वत्याः सुतत्वात् आबाल्यतः परंपरागताध्यात्मिकजिज्ञासया विराजन्, कालक्रमेण सर्वमत, सर्वसिद्धांत, सर्वसाधना, सर्वस्वरूपस्य श्री रामकृष्णपरहंसदेवस्यासमानदिव्यवातावरणेन आकर्षितोऽहं, सर्वसमन्वया नंदेन तस्मिन् संप्रदाये तुरीयाश्रमं स्वीकृत्य, तमवतारवरेण्यमनुसरन्, विशा

लदृष्टेः लुप्तस्य संघस्य यत्किमपि किंचिदपि सेवा करणीयेति वांछया, बापट्ला, भीमुनिपट्टनं इति द्वयोः पट्टणयोः आश्रमे उपस्थाप्य, तयोः केंद्रयोः द्वारा एकां ग्रंथमालामुपस्थाप्य, वांछाफलसिद्धेः, यात्निको साधको हम्। ईश्वरानुग्रहविशेषेण एतावत्पर्यंतं मुद्रिताः केचन मुद्रणग्रंथाः आंध्रदेशे, इतरराष्ट्रेष्वपि च व्याप्ताः, जनानां हृदयेषु स्थानं संपादिता इति मोदते अयं सेवकः।

इदानीं मम रचनासु उद्ग्रंथः सर्वसिद्धांतसौरभमेव। हैन्दवसांप्रदायिकसिद्धांतैः सर्वैः तेषां कर्त्रुणां च विशेषैः सहालंकृतेपि, असमग्रतया तेषां महापुरुषाणां, सिद्धांतानां, साधनानां च विवरणे क्लुप्ततया सूचयन् सर्वज्ञानार्थं इतरग्रंथान्, महर्षिप्रोक्तग्रंथावलिं च सूचयन्, अस्माकं भारतीयविज्ञानकुसुमश्रेणेः परिमळं मात्रमेव पाठकानां प्रसादयति। तेषां कुसुमराजानां दर्शन, संपादन, अनुभव, आनंदेभ्यः पाठकान् प्रात्साहयतीति 'सौरभ' नाम्ना सर्वसिद्धांतसौरभमित्युच्यते। यावत् साध्यं तावत् पर्यंतं भारतीय सांप्रदायिकसिद्धांतान् सर्वान् स्थूलतया सूचनाविधानस्य प्रयत्नमेव अस्य धर्मः।

आदर्शमुत्तममपि तस्य सुव्यक्तार्थं शक्तिः सामर्थ्यं च कर्तुः आवश्यकः। तादृशार्हाः मम किंचत् लुप्तेऽपि, रचनायाः आधाराः मम सुदूरे विद्यमानेऽपि तादृश रचनाया यत्नं करणीयमिति दृढ निश्चयेन अस्याः उद्ग्रंथरचनायाः संसिद्धोऽस्मि। अस्य असंपूर्णत्वात् बहुत्र, बहुनां दोषानां च सत्वात् एतत् मम सूक्ष्मकृषिः समर्थानां प्रोत्साहेन, निर्दुष्टग्रंथरचनाय मार्गदर्शिः भविष्यतीति अभिलाषा एव अस्य उद्यमस्य कारणम्।

अस्यां ग्रंथरचनायां, सिद्धांतविवरणे तेषां कर्तृणां विषयविवरणे च प्राक्प्रतीचीपंडितवर्गेण विरचिताः असंख्याकाः ग्रंथाः उपयुक्ताः सिद्धांत भागः यथा विद्यमानेऽपि, सिद्धांतिनां महर्षिणां जननपूर्वोत्तर विषयाः, विव रणग्रंथाश्च अस्माकमलभ्यत्वात् ते महर्षयः, तदनंतरकर्तारश्च चरिताकथनविधानस्य नेच्छया, स्पष्टविषयानां नोक्तत्वात् निराडंबरत्वस्य प्रधानेन उद्ग्रंथानां रचनामात्रेण संतुष्ठाः सन्तः स्वस्वनामानामनुसंधानं न कृतवंतः ते त्यागस्वरूपिणः। तस्मात् तेषां जीवितविशेष, कालनिर्णय, अनुभवविभूतीनां ज्ञानेन आनंद प्राप्तेः वांछितानां साधकानां निराशा भवति। अनंतरं तेषां निर्णयप्रयत्ने आधुनिकपंडितानां

अगणितविभिन्नमार्गनामवकाशं दत्वा, समस्यानां आधिक्येन जिज्ञासापराणां मनस्तापस्य कारणं भवति। तस्मात् अस्मिन् ग्रंथे तादृश चर्चाः आष मतानुसारेण सप्रमाणतया कृत्वा, निश्चिताः। तस्मात् विमर्शकाग्रेसरेभ्यः ग्रंथेभ्यः बहूनि आंग्लप्रमाणानि अस्मिन् ग्रंथे दृश्यंते, तथापि तदनंतरमेव आंध्रानुवादस्य सत्वात् आंग्लभाषाज्ञानलोपः येषां वर्तते तेषामपि कष्टं नास्ति। एतादृशविमर्शविधानस्य अत्यंतोपयुक्तानां ग्रंथकर्तृणां सर्वेषामपि मम कृतज्ञतां समर्पयामि।

अपिचास्मिन् रचनाग्रंथे पाक्षिकभावानां, खंडनानां च स्थानं न दत्वा, ते सिद्धांतानुसारिणः तेषां मतानि यथा विवृतवंतः तथैव सर्वदर्शनानां च व्याख्याः विरच्य, विशालदृष्टेः आदर्शं निवेद्य, आध्यात्मिकसाहित्यस्य महोपकारिं वाचस्पतिमिश्रं सर्वविधाध्यात्मिकसाधनानुष्ठाननियतिस्ताः भवानंदेन प्रपंचस्य तरुणोपायं प्रसादितवंतं श्रीरामकृष्णदेवं आदर्शेन स्वीकृत्य, अस्याः रचनायाः संसिद्धोऽस्मि। तस्मात् तान् सिद्धांतान् समर्थयन्, तस्मिन् श्रेष्ठत्वे एव दृष्टिं प्रसार्य, दोषानामगणनमेव अस्य ग्रंथस्य विशिष्टता। अपि च विशालदृष्ट्या दृष्टंचेत्, एकः सिद्धांतः परवादेषु दृश्यमानानां दोषानां दूरीकरणाय यत्नं कृत्वा, नूत्न दोषान् कल्पयतीति द्योतते। अपि च केवलं बुद्धेः प्राधान्येन वादाः परिशीलिताश्चेत्, तत्र अनेकदोषाः संतीतिवत् द्योतते। तथापि साधनस्याधिष्ठानस्य हृदयस्यैव प्राधान्यं चेत्, तेषां मतानां लोपेभ्यः अपि उत्कृष्टता एव गोचरति। तस्मात् कारणात् केवल विमर्शाबुद्धिमतः त्यक्त्वा, विविधसिद्धांतरहस्य ग्राहकानामेव एतद्विरचितमिति मुख्यतात्पर्यम्। तस्मात् 'सौरभम्' सर्वमता वलंबिनां च अवश्यं पठनीयम्। विशालदृक्पथसंपादनाय अवकाशेन सर्व समन्वयकार्यस्योपयुक्तमिति दृढविश्वासः। एतदुद्ग्रथं 1939 संवत्सरे मया अधिकं विरचितम्। तथापि मुद्रणसंकल्पस्याभावात् एतावत्पर्यंतं विश्राम्य, बहूनां मित्राणां प्रोत्साहेन अद्य प्रकाशते इति महदानंदमनुभवामि।

सौरभग्रंथः मुख्यतया षष्टखंडात्मकः। तत्र सर्वेषां मानवानां आध्यात्मिकविकासाय तत्वशास्त्रे प्रधानानि षड्दर्शनानि प्रथमखंडे चर्चितानि। प्रख्यातः आचार्यः माधवः दर्शनानि षोडशकमिति विभज्य, वेदांतदृष्ट्या चार्वाक, बौद्ध, जैन, रामानुज, माध्व, पाशुपत, शैव, प्रत्यभिज्ञा, रसेश्वर, वैशेषिक, न्याय, मीमांसा, व्याकरण, सांख्य, योग, वेदांत इति क्रमेण चर्चितवान्। तथापि एतत् षोडशकं सांख्य, योग, न्याय, वैशे

षिक, मीमांसा, वेदांत इति षट्के अन्तर्गतमेव। तस्मात् 'प्रथमत: तानि ज्ञात्वा तेंभ्य: उत्पन्नानामितरमतानां सौरभमनंतरमाघ्राणयिष्यामः।

ऋग्वेदादिशास्त्रांतर्गतः, उपनिषत्सु प्रस्फुटं बहिर्गतः, पंडितजनाना माश्रयः, अपरशिवावतार इति कीर्तिमद्भिः श्रीशंकरभगवात्पादैः प्रतिपा. दितः अद्वैतवादः द्वितीयखण्डे विचारयिष्यामः। तस्मिन् शंकरस्य वादा दन्याः सुरेश्वर, विद्यारण्यादिमुख्याद्वैतिनां भावाः परिशीलिताः स्युः।

तृतीयखण्डे सुलभं, भक्तिप्रबोधकं, सर्वव्याप्तं, सामान्यसाधक साध्यं वैष्णवं स्वीकृतम्। तस्मिन् श्री रामानुज, मध्व, वल्लभ, निंबार्क, चैतन्यादीनां भावाः, वैष्णवभावव्यज्यकाः कबीरदास् इत्यादीनां च भावः चर्चिताः स्युः।

द्वैताद्वैतयोः मध्ये मार्गे तंत्रागमशास्त्रप्रबोधितं, साधनशास्त्रं, मंत्र, तंत्र, यंत्र रहस्य बोधकं शैवं, शाक्तमतं च चतुर्थखण्डे अलंकृतानि।

भारतीयसंप्रदाये एव उत्पन्नेऽपि, तस्याधिगमना महाशक्तिरिव प्रपंच व्याप्तं, सर्वादर्शं, बौद्धमतं प्रधानमिति बौद्धखण्डनाम्ना पंचमः भागः। तस्मिन् बुद्धदेवप्रबोधितानि, महायान, हीनयानमित्यादीनि, जैनेत्यादीनि मतानि च चर्चितानि। षष्टे समन्वयखण्डे पूर्वोक्ताः पंचखण्डात्मकाः विषयाः सर्वेऽपि श्रीरामकृष्णदेवस्य सर्वसमन्वयसिद्धांते कथं समन्विताः? इति तेषां मुख्यशिष्याणां वाक्यान्यपि प्रमाणानि इति च विवरणं करि ष्यामः।

दर्शनखंडः

पूवोक्तखण्डः दर्शनखण्डः। कपिलमहर्षिभिः प्रोक्तं सांख्यं, पतंज. लिमुनिवरनिर्मितं योगं, गौतममुनीन्द्रस्थापितं न्यायं, कणादसंयमींद्ररचितं वैशेषिकं, जैमिनिमुनिवरेण्यः विरचिता पूर्वोत्तरमीमांसा, व्यासभगवतः उत्तर मीमांसा च दर्शनखण्डे अलंकृताः। दर्शनषट्कमेतत् सूक्ष्मदृष्ट्या पुनः सांख्य योग, न्याय वैशेषिक, पूर्वमीमांसा इति त्रयं भवति। सिद्धांतेऽपि तयोः सामान्यत्वमधिकतया गोचरति। सांख्यं मुख्यतया प्रकृतेः परिणामं प्रबोधयन्, पुरुषस्य कैवल्यविधानं स्थूलं विवृणोति। योगस्तु तं सिद्धांतं स्थूलतया स्वीकुर्वन्, मानसिकपरिणामस्य प्राधान्येन, साधनाविधानस्य विवरणेन च कैवल्यप्राप्तेः सहकरोति। वैशेषिकः नवद्रव्येभ्यः सप्त

कृत्य, सिद्धांतस्थापनायाः आवश्यकं स्वपक्षप्रतिपादनं प्रतिपक्षखंडनमित्यादि तर्करहस्यानि उक्त्वा, मतस्थापनार्थं सहकरोति न्यायः। पूर्वमीमांसा जीवस्य दृष्टिं ऐहिकं विहाय परे स्थापयित्वा जीवितस्य निष्कामबद्धेन, निष्काम्यतां, धर्मं च समुद्धृत्य ईश्वरस्ययास्तिकतां प्रबोधयति। तं स्वीकृत्य कर्मणः जीवं रक्षयन्, भक्तिज्ञानवैराग्यानां प्रसादेन ब्रह्मप्राप्तेः मार्गं दर्शयति उत्तरमीमांसा नाम वेदांतः। तस्मात् सौरभग्रंथः दर्शनानि द्वयेन स्वीकृत्य विशदीकर्तुं यत्नं करोति।

प्रथमः भागः

दर्शनबोधकाः तत्वज्ञाः, तत्वचारित्रकाः सर्वसामन्यतया एतेषु विद्यमानान् तत्वविषयानेव प्रधानतया स्वीकृत्य, भौतिकविषयानां बोधकत्वात् प्रथमं न्यायवैशेषिकौ, मानसिकपरिणामादि रहस्यबोधकत्वात् द्वितीयं सांख्ययोगौ, आध्यात्मिकतत्वबोधकं मीमांसाद्वयं तृतीयं च विचारयन्ति। तथापि विषयप्राधान्यतामनुसृत्य दृष्टं चेत्, उपनिषद्भिश्च स्तुतितस्य, अनंतरं दर्शनानां खंडनार्थं विषयान् अनेकपूर्वपक्षरूपैः प्रसादितवतः सांख्यस्यैव अग्रस्थानं दातव्यं, समुचितं च। कालनिर्णयानुसारेण परिशीलितेपि स्वायंभुवमनुमन्वन्तरे, सृष्ट्यादौ विद्यमान तत्वशास्त्रजनकस्य तादृशं प्रथम स्थानप्रसादनं समुचितम्। तस्मात् सौरभः कपिलस्य सांख्यमेव प्रथमतः स्वीकृत्य, तत्वशास्त्रस्यादिगुरोः कपिलाचार्यस्य ऋणात् विमुक्तः। सांख्यं तात्विकं स्वीकृत्य, कालदृष्टेः इतरदर्शनेभ्यः पश्चादपि सांख्यस्याश्रयेण योगः द्वितीयः। तदपि समुचितमेव। मुख्यतः दर्शनानि परिशीलितानि चेत् सर्वतत्वार्थशास्त्रं परिपूर्णेन, किंचिद्विभेदाः तत्वेऽपि तत्वपरिणामस्य प्रधानभूतानां उपनिषदां आधारेणैव वर्तते इति स्पष्टम्।

दर्शनानि, अनंतरं सौरभे विवृतः अद्वैतादि समन्वयखंडपर्यंत ग्रंथोऽपि उपनिषत्प्रतिपादितसिद्धांत एव। तस्मात् आर्ष संप्रदायरूपेण अवश्यं प्रशंसनीयम्।

तस्मात् सर्वसिद्धांतसौरभे दशाधिकभागेषु प्रथमः सांख्ययोगग्रंथाः प्रधानग्रंथ इव आंध्रभाषाभिमानिनां हस्तमलंकृत्य अचिरकाले एव शेष भागाः अपि प्रकटयतु इति, तदर्थं भारतीयाध्यात्मिकजिज्ञासापराः एतत्म

हत्कार्यमिति भावनाय साहाय्यं करिष्यन्तीत्याशासे।

[library stamp]

मंगळं महत्

1. Swami Vivekananda: The Life, Vol.3,P.69.
2. Pandit Jawaharlal Nehru: The discovery of India, P.64.
3. Prof. F. Max Muller: The Six Systems of Indian Philosophy, P.2.
4. Pandit Jawaharlal Nehru: The Discovery of India, P.161.
5. Prof. Sisir Kumar Mitra: The Vision of India, P.282.
6. Swami Vivekananda: The Life, Vol.3, P.285.
7. Prof. Sisir Kumar Mitra: The Vision of India, P.245.
8. Prof. F. Max Muller: India what can it teach us?
9. Karl Jaspares: Way of Wisdom, P.144.
10. Pandit Jawaharlal Nehru: The Discovery of India, P.5.
11. Prof. Satishchandra Chatterjee: An Introduction to Indian Phil sophy, P.14.
12. Vecente Avelin: Consul General for Brazil.
13. Prof. Louis Renon: A talk in Santiniketan, 1949.
14. Dr. Kenneth Walker: A talk in London, 1949.
15. Prof. Sisir Kumar Mitra: The Vision of India, P.96,37.
16. Swami Rama Tirtha: The complete works, Vol.7, P.122.
17. Arabindo Ghosh
18. Prof. Sisir Kumar Mitra: The Vision of India, P.97.
19. Sir John Woodroffe: Shakti and Shakta, P.431
20. Pandit Jawaharlal Nehru: The Discovery of India, P.87.
21. Swami Vivekananda: The Complete Works, Vol.2, P.20
22. Prof. Sisir Kumar Mitra: The Vision of India, P.178.
23. Pandit Jawaharlal Nehru: The Discovery of India
24. Dr. Colebrooke: Bhaskara's work of Algebra, P. XXII
25. Bala Gangadhara Tilak: Orion, P.212.
26. Swami Ramakrishnananda:The message of Eternal Wisdom, P93
27. Swami Vivekananda: The Complete Works, Vol.2, P.431.
28. E.Vernon Arnold: Popular studies in Mythology.
29. Prof. Sisir Kumar Mitra: The Vision of India, P.166.
30. Swami Rama Tirtha: The Complete Works, Vol.7, P.105.
31. M. Winternitz: A History of Indian Literature, Vol.I
32. D.H. Lawrance: Selected Essays.
33. Pandit Jawaharlal Nehru: The Discovery of India, P.431.
34. George Gamow: One Two Three........Infinity, P.153.
35. Pandit Jawaharlal Nehru: The Discovery of India, P.440,144.

36. Prof. Sisir Kumar Mitra: The Vision of India, P.283.
37. Karl Jaspares: Way of Wisdom, P.19.
38. Gautama Buddha: Samyukta Nikaya.
39. Pandit Jawaharlal Nehru: The Discovery of India, P.484
40. Will Durant: The Story of Philosopy, P.6.
41. John S. Mackanzee: A Manual of Ethics, P.23.
42. Satischandra Chatarjee: Indtroduction to Indian Philosophy, P.15
43. J.N. Mukharjee: Sankhya.
44. Swami Vivekananda: The Complete Works, Vol2, P57, Vol3, P283
45. Prof. Max Muller: The Six Systems of Indian Philosophy, P.XVII
46. Dr. James H. Cousins: Oriental Culture and World Renaissance.
47. Arthor Schoupenhaur.
48. Sir John Woodroffe: Shakti and Shakta, P.37.
49. Swami Vivekananda: The Complete Works, Vol.2, P.153.

सांख्यदर्शनम्

उपोद्घात:

भारतविज्ञानप्राशस्त्यम्

ब्रह्मा देवानां प्रथमः संबभूव
विश्वस्य कर्ता भुवनस्य गोप्ता।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठा
मथर्वाय ज्येष्ठपुत्राय प्राह॥

–मुंडकोपनिषत् 1.1

विश्वकर्ता, भुवनपालकश्च ब्रह्मा देवतानां प्रथमः संबभूव। सः आत्मनः ज्येष्ठपुत्राय अथर्वाय सर्वविद्यानां मूलां ब्रह्मविद्यां उपदिदेश इति भावः। अनेन श्रुतिवाक्येन ब्रह्मविद्यायाः श्रेष्ठत्वं, सर्वविद्यासु प्रतिष्ठितत्वं च स्पष्टं भवति। एतादनुसृत्य आर्थिकशास्त्रज्ञः कौटिल्योऽपि Philosophy is the lamp of all the sciences. नाम सर्वशास्त्राणामपि ज्योतिः तत्वशास्त्रं इत्युक्तवान्। अपि च Philosophy is one of the noblest of life's persuits.[1] इति। नाम जीविताशयेषु तत्वजिज्ञासा अतिपवित्रा इति सर् जान् वूड्राफ् नाम पाश्चात्यतंत्रशास्त्रकोविदः उक्तवान्। तस्मात् कारणादेव The East is ever bold in search of the mysteries of the internal world[2] अतः प्रपञ्चरहस्यान्वेषणे प्राग्देशः सदा धैर्योपेतेन रराजेति विवेकानंदस्य वचनानुसारेण In the infancy of human civilization, India has lit the fire of spirituality.[3] प्रपंचविज्ञानस्य शैशवावस्थासमये एव भरतवर्षे आध्यात्मिकज्योतिः प्रकाशते इति अमेरिकादेशीयेन श्री अतुलानंदेन उक्तरीत्या भारतावनि आध्यात्मिक तेजो निधनेन Here activity prevailed when even Greece did not exist, when Rome was not thought of, when the very fathers of the modern Europeans lived in forests and painted themselves blue. Even earlier, when history has no record, and tradition dares not peer into the gloom of that intence past, even from there until now, ideas

have marched out from her.[4] ग्रीक्देशस्योत्पत्तेः पूर्वं, रोम् नगरस्य स्मरणात् पूर्वं, आधुनिक यूरोप्देशीयानां पूर्विकाः विलिप्तवर्णमुखैः अरण्येषु संचरणसमये आध्यात्मिकचैतन्यं कथमासीत्? तत्पूर्वमेव चरितस्यापि प्रमाणानामलभ्यकाले, अंधकारबंधुरं तं निगूढकालं द्रष्टुं संप्रदायस्यापि भीतिः। तस्मात् कालादारभ्य अद्यावधि भागप्रवाहाः प्रसरिताः इति श्री विवेकानंदस्य वचनानुसारेण, अनादि कालात् ज्ञानप्रदेन भरतवर्षः प्रकाशते। तस्मादेव A world of thinkers, a creation of philosophers[5] धीमतां लोकः तत्वविदुषां यंत्रशालेति पाश्चात्यतत्वज्ञानामग्रगण्यः माक्सुमुल्लरु, India is the land of idealism, the home of mysticism.[6] हिंदूदेशः प्रज्ञाधाम, अनुभूतिकारकं च भूत्वा रराजेति जोषिया रोयिस् इत्यादिपंडितप्रकांडानां संस्तुतीनां समपात्र मभवत्। तस्मादेतत्पुण्यक्षेत्रं टि. ई. स्लेटर् वाक्यानां India is preeminently the abode of religions and the richest mine of Psychological ideas.[7] अत्युन्नताध्यात्मिकपथनिलयः आध्यात्मविद्याखनिश्च भूत्वा विराजते। In India Philosophy stood on its own legs, and all other sciences looked to it for inspiration and support[8] आर्यावर्ते तत्वशास्त्रं स्वापेक्षितेन स्थितं, तदितर सर्वशास्त्राणि तस्मात् तत्वशास्त्रात् उत्साहं, साहाय्यं च आप्नुवंति। तस्मात् It is the master science guiding other sciences[8] तत् अन्य शास्त्राणां मार्गदर्शकेण सर्वोत्तमशास्त्ररूपेण स्थितमिति राधाकृष्णपण्डितेनोक्तम्। एतेषां वाक्यानामनुसारेण पर्यालोचितं चेत् India's culture is incomparable, being developed thousands of years of trial and experimentation till it attained to the highest standard ever reached by humanity and consequently possessed of an unshakable stability and strength all its own.[9] हैन्दवविज्ञानं असमानम्। मानवकोट्या प्राप्तायाः अत्युत्तमसंस्थितः उपलब्धिपर्यंतं, तत् सहस्राधिक संवत्सर संततकृषिफलेन अभिवर्धितमासीत्। ततः तत् स्वतःसिद्धसुस्थिराचंचलशक्त्युपेतं च भवति इति श्री विवेकानंदस्य वचनानि अत्यन्तं समुचितानि भवंति। प्रोफेसर गार्बि इत्यादि पंडितैः Highly gifted races of mankind.[10] मानवलाके असाधारण प्रज्ञानिधयः इति, We are constrained to bend our knee before the East and to see in the cardle of human race the mature land of highest philosophy.[11]

मानव लोकस्य मातुः अस्य प्राग्देशस्य, उत्तमतत्वशास्त्रस्य मूलाधारस्यास्य प्रौढस्य अस्माभिः अवश्यं सिरसा नमस्काराः समर्पणीयाः इति विक्टरु कजिन्स् वाक्येषु वंदनीयाः इति, All that we value most has come to us from the East[12] अस्माकं अमूल्यविषयाः पूर्वदेशेभ्यः एव आगताः इति माक्स् मुल्लर् इत्यादि असंख्याक प्राक्प्रतीचिविज्ञलोकेन आराध्यते अस्माकं पुण्यस्थलं आर्यावर्तम्।

सांख्यप्रशंसा

पूर्वोक्तप्रकारेण असमानयशोनिधानेन There is no achievement in the world which can compare favourably with that of Indian speculative philosophy[13] यावत्प्रपंचे भारतीयतत्वशास्त्रेण तुल्यमानं घन कार्यं अन्यत् नास्तीति उत्तमविमर्शानिपुणेन वि.वि. सोवानिमहाशयेन उक्त रीत्या, अद्वितीय वैज्ञानिकांतरिक्षे विराजितस्य अस्माकं तत्वशास्त्रस्य तेजो निधानो दिवाकर इव अलङ्कृतः सांख्यसिद्धांतः। The Sankhya is generally concidered to be the oldest school of the Indian Philosophy [14] भारतीयतत्वदर्शनेषु सर्वेषु सांख्यं अतिप्राचीनमिति सर्वसम्मतं इति सूर्यनारायण शास्त्रिः, Sankhya is the oldest of the existing systems.[15] प्रस्तुतमुपलभ्यमानसिद्धांतदर्शनेषु सांख्यमतिप्राचीनमिति वेब्बरु पंडितश्चापि एतत् अभिप्रायं विज्ञापितवंतौ। केवलप्राचीनादपि without the help of the Sankhya, the world cannot be properly known, and as the unworldly can be studied only through the worldly, Sankhya has been given an important place by most of the systems.[16] सांख्यापेक्षाभावे प्रपंचमुचितरीत्या न ग्राह्यम्। लौकिकद्वारेण अलौकिकस्य ग्राह्यत्वात् अनेकदर्शनैः अस्य प्राधान्यं दत्तम्। अपि च These different systems have one common psychology and that it is the psychology of the Sankhya System.[17] एतेषां विविधदर्शानानां सामान्यतया एकमेव तत्वशास्त्रं वर्तते तत्तु सांख्यतत्त्वम्। तस्मादेव भारतावन्यां, सर्वप्रपंचेपि च तत्वशास्त्राणामाधारं सांख्यमेवेति, The psychology is very clear and most precise and yet it is the oldest rational thought in the world. Wherever there is any philosophy or rational thought, it owes somethings or other to Kapila.[17] तत्वशास्त्रं

प्रस्फुटं, क्लुप्तं च चेत्, प्रपंचे तत् अतिप्रचीन यौक्तिकविधानम्। यदाकदापि यत् तत्वविचारणस्य सत्वेऽपि तत् किंचिन्मात्रं कपिलपरमेवेति विवेकानंदस्य वाक्यानि मुख्यानि। एतदनुसारेणैव स यतिपुंगव: Pythogorus learnt it in India and taught it in Greece. Later on Plato got an inkling of it, and still later the Gronstics carried the thought to Alexandria, and from there it came to Europe. So wherever there is any attempt at psychology or philosophy the great father of it is this man Kapila.[18] पैथागोरस् भरतवर्षे एतदधीत्य ग्रीक्देशे बोधितवान्। तदानीं प्लेटोमहाशय: एतत् सूचितवान्। तदनंतरं नास्टिक्शाखीया: एतत् स्वीकृत्य अलेग्जांड्रियां प्रति गतवंत:। तस्माद्देशात् एतत् यूरोप् प्रत्यागतं। तस्मात् कुत्रापि किमपि तात्विक, आध्यात्मिक कृषि: अस्तिचेत् तस्य परमपिता कपिलाचार्य एवेति घंटापथेनोक्तवान्। तस्मात् I hope that the time will come when no one will claim that name Philosopher who is not acquianted at least with the two prominent systems of ancient Indian Philosophy, the Vedanta and the Sankhya.[18] प्राचीन हिन्दूतत्वशास्त्रे प्रधानसिद्धांतयो: वेदांतसांख्ययो: परिचयरहित: तात्विक: इति पदस्थानर्ह: न स्यादिति माक्सुमुल्लर् महाशयोऽपि सांख्यस्य प्राधान्यं ज्ञात्वा उक्तवान्।

सांख्यकर्ता – कपिलमुनि:

सुप्रशस्तस्य सर्वप्रपंचतत्वशास्त्रस्य मूलाधारस्य अस्य सांख्यशास्त्रस्य कर्ता को महान्? तस्य जीवितांशा: के? किंचित् ज्ञातुं यत्नं करिष्याम:।

While in most countries a history of Philosophy is inseparable from a history of the Philosophers, in India we have indeed ample material for watching the origin and growth of Philosophical ideas, but hardly any for studying the lives or characters of those who founded or supported the philosophical systems[18] अनेकदेशानां तत्वशास्त्रचरितेन तेषां शास्त्राचार्याणां चरितं अभिन्नम्। भारतदेशे तात्विक सिद्धांतप्रारंभपरिणामग्रहणस्य विस्तृत विषय: वर्तते। तथापि तेषां सिद्धांतानां स्थापकानां प्रापकानां च जीवितविशेषान् ज्ञातुं आधारा: न संति। तस्मात् We have some idea of who Thales

was, and Plato was, where and when they lived and what they did, but of Kapila, and of Patanjali, of Goutama and Kanada, of Badarayana and Jaimini, we know next to nothing.[18] थेल्स् कः? प्लेटो कः? कुत्र कदा आस्ताम्? किं किं कृतवंतौ? इति अस्माकं किंचित् ऊहितुमवकाशस्य सत्वेपि, कपिल, पतंजलि, गौतम, कणाद, बादरायण, जैमिनि महर्षीनुद्दिश्य अस्माकं शून्यमेव ज्ञानमिति माक्स्मुल्लर् महाशयेनोक्तम्। The history of the rise of the Sankhya School of thought is wrapped in impenetrable obscurity[19] सांख्यदर्शनतत्वाभिवृद्धिः, चरितं च अभेद्यस्यांधकारे स्तः इति भारतीयतत्वशास्त्रपरिणाम चरित्रकारः वि.टि. श्रीनिवास अय्यंगार् महाशयोऽपि वदति।

तथापि 'सांख्यस्य वक्ता कपिलः परमऋषिः पुरातनः। हिरण्य गर्भो योगस्य वक्ता नान्यः पुरातनः॥'[20] इति सांप्रदायिक, सांख्यकारः, परमऋषिवरेण्यः, अतिप्राचीनः, हिरण्यगर्भश्च श्री कपिलाचार्य एवेति विदितं भवति। अपि च वेदांतसूत्रकर्ता श्री व्यासभगवानपि स्मृत्यधिकरणे कापिलसांख्ये प्रधानप्रसंगं कृतवान्।' पद्मपुराणेऽपि 'कणादेन तु यत्प्रोक्तं शास्त्रं वैशेषिकं महत्। गौतमेन तथा न्यायं सांख्यं तु कपिलेन तु॥'[21] इति कपिलमहर्षिं सांख्यप्रवक्तेति स्पष्टं भवति। 'कणाद कपिलाद्यैस्तु मुनीन्दैरपि कीर्तितं। मंदबुद्ध्यनुसारेण केवलं परिकीर्तितम्॥' इति सूतसंहितायामुक्तम्। विष्णुसहस्रनामस्तोत्रे 'महर्षि कपिलाचार्यः' इति पदस्य तद् भाष्यकर्तारः श्री शंकराचार्याः 'महर्षि कपिलाचार्य' इति सविशेषणमेकं नाम। महाश्चासौ ऋषिश्चेति महर्षिः। 'कृत्स्नस्य वेदस्य दर्शनात्, अन्ये तु वेदैकदेशदर्शनादृष्टयः कपिलश्चासौ सांख्यस्य शुद्धात्मतत्वविज्ञानाचार्यः।' (70) महर्षि कपिलाचार्य इति एकं नाम इति सांख्य शुद्धात्मतत्वविज्ञानाचार्य एव कपिलमहर्षिः इति उक्तवंतः। पातंजलयोग दर्शने तद्भाष्यकर्ता व्यासदेवोऽपि 'आदिविद्वान् निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान् परमर्षिः आसुरये जिज्ञासमानाय तंत्रं प्रोवाच'(1.2)। आदिविद्वान्, परमर्षिचंद्रश्च कपिलाचार्यः कारुण्येन निर्माणचित्तेन आसुरि इति शिष्यमुद्दिश्य तंत्रं बोधितवान् इति उक्तवान्। एतद्व्याख्याता वाचस्पतिमिश्रोऽपि 'आदि विद्वान्' नाम पंचशिखाचार्यदृष्टेः कपिलमहर्षिः इति, 'तस्यापि सांख्ययोग प्राप्तिर्वेदे श्रूयत इति' तस्य सांख्ययोगप्राप्तिः भवतीति वेदेषु गोचरमिति विवृणोति। 'पंचमः कपिलो नाम सिद्धेशः कालविप्लुतम्। प्रोवाचासुरये

सांख्यं तत्वग्रामविनिर्णयम्॥'(1.3.11) पंचमावतारो कपिलनामसिद्धेशः तत्व निर्णयं सांख्यशास्त्रं आसुरये बोधितवान् इति भागवतपुराणे, 'अग्निः स कपिलोनाम सांख्य शास्त्रप्रवर्तकः।' इति महाभारते, सकलपुराणेतिहासेष्वपि च सांख्यदर्शना चार्यः परमर्षिशेखरः श्री कपिलमुनीश्वर एवेति स्पष्टं भवति।

अपि च 'सांख्यकारिका' कारः ईश्वरकृष्णः 'एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकंपया प्रददौ॥'(सां.का.70) प्रथमतः एतत् पवित्रं सांख्यदर्शनं कारुण्येन कपिलाचार्यमुनींद्रः आसुरीं प्रबोधितवान् इति अंतिमे श्लोके उक्तवान्। तस्य भाष्यकारः गौडपादोऽपि 'सनकश्च सनंदश्च तृतीयश्च सनातनः। आसुरिः कपिलश्चैव वोढुः पंचशिखस्तथा॥ इत्येते ब्राह्मणः पुत्राः सप्त प्रोक्ता महर्षयः।'(सां.का.गौ.) इति श्लोकपाठे 'कपिलाय नमस्तस्मै येनाविद्योदधौ जगति मग्ने। कारुण्यात्सांख्यमयी नौरिव विहिता प्रतरणाय॥'(सां.का.गौ.1) अविद्यासागरे स्थिते प्रपंचे कारुण्येन सागरतर णार्थं सांख्यं नाम नौः येन निर्मिता तस्य कपिलस्य नमस्करोमीत्युक्तवान्। सांख्यसूत्राणां व्याख्याकारः विज्ञानभिक्षुरपि 'श्रुत्यविरोधिनीरुपपत्तेः षडध्या यीरूपेण विवेकशास्त्रेण कपिलमूर्तिः भगवान् उपदिदेश।'(सां.सू.भा.) श्रुति बद्धं, षडध्यायरूपं, एतत् विवेकशास्त्रं कपिलेनोक्तमिति भावं प्रकटितवान्। तथैव प्रख्यात व्याख्याकारः वाचस्पतिमिश्रः योगभाष्ये, (1.25) 'तत्वकौ मुदी' इति सांख्यकारिकायाः भाष्ये च 'कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये। पंचशिखाय तथेश्वरकृष्णायै ता नमस्यामः॥' इति कपिलमुनिमेव सांख्यस्य कर्तेति स्वीकृतवान्।

कपिलमहर्षिः - श्रुतिस्मृतयश्च

वेदेभ्यः सांख्यकारिकायाः कालपर्यन्तं संबंधितम् उपनिषत्पुराणेति हासादि बहुग्रंथराजेषु कपिलमुनीन्द्रस्य नाम विविधप्रसंगेषु श्रूयते। तथापि तस्य ऋषिकुलालंकारस्य जीवितविशेषाः, जीवितकालश्चापि लुप्ताः इत्युक्ते, बहुविचारकरम्। श्री सूर्यनारायणशास्त्रिणः वचनेषु The founder of the system is said to be the sage Kapila, who he was, and when he flourished are questions yet unsettled.[22] सांख्यसिद्धांत प्रवक्ता कपिलमहर्षिः इत्युच्यते, तथापि एषः कः? कस्मिन् काले आसीत्? इत्यादयः प्रश्नाः अनिर्धारिताः एव। कथमित्युक्ते किंचित् परि

शील्यताम्।

केवलसांख्योपनिषदिति पंडितैः उक्ते श्वेताश्वतरोपनिषदि प्रथमतः कपिलमुनेः नामस्मरणं, तत्प्रोक्त सांख्यतत्वं च विस्तारिते। तस्मिन् 'यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनिश्च सर्वाः। ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति ज्ञायमानं च पश्येत॥' (5.2) एकस्वरूपेण सर्वोत्पत्तिकारणानि, सकलरूपाणि च यः नियुक्तवान्, सृष्ट्यादौ जाताय कपिलमहर्षि नाम स्वपुत्राय यः सर्वज्ञानानि प्रसादितवान्। तं ब्रह्मदेवं इति उपनिषत् प्रस्तौति। एतत् दृष्टिं परिशील्य कपिलः सृष्ट्यादौ जातः इति, ब्रह्मणः मानसपुत्रः इति, सर्वज्ञः इति च ज्ञातव्यम्। तस्मादेव गौड पादः पूर्वोक्तरीत्या कपिलं ब्रह्मणः मानसपुत्रेति नमस्कृतवान्। अपि च सांख्यकारिकाभाष्ये सांसिद्धिकान् भावान् विवृण्वन् 'यथा भगवतः कपिल स्यादिसर्गे उत्पद्यमानस्य चत्वारो भावाः सहोत्पन्नाः, धर्मः, ज्ञानं, वैराग्यम्, ऐश्वर्यमिति'(सां.का.गौ.43) सांसिद्धिकभावः धर्मज्ञानवैराग्यैश्वर्यरूपेण चतु र्विधाः इति, ते तु सृष्ट्यादौ भगवता कपिलाचार्येण सहोत्पन्नाः इति उक्तवान्। कपिलानंतराणां सनकसनंदादीनां 'प्राकृताः कथ्यंते ब्रह्मणश्च त्वारः पुत्राः सनक, सनंदन, सनातन, सनत्कुमारा बभूवुः। तेषामुत्पन्नकार्य कारणानां शरीरिणां षोडशवर्षकाणां एते भावाश्चत्वारः समुत्पन्नाः'(सां.का. गौ.43) प्राकृताः नाम ब्रह्मदेवस्य पुत्राः, षोडशवर्षशरीरधारिणः, कार्यकार णोद्भूतभावाश्च, सनकादिचतुष्टयेन जाताः भावाः प्राकृताः इति वदन् कपिलदेवस्य प्राशस्त्यं गौडपादः प्रकटितवान्। सर्वोत्तमस्य ऋषिवरस्य प्राधान्यं ज्ञात्वा श्वेताश्वतरः 'नित्यो नित्यानां चेतनाश्चेतनानामेको बहूनां यो विदधाति कामान्। तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥' (6.13) नित्यानां नित्यः, चेतनानां चेतनः, बहूनाम् एकः, सर्वकामप्रदाता च आत्मा। सांख्योगाभ्यां ग्राह्यं एनं देवं यः जानाति, सः सर्वबंधविमुक्तो भवति इति कपिल प्रोक्त सांख्ययोगादीन् प्रस्तौति। तस्मा देव At the time of the composition of the Swetaswetara the Sankhya was not a new system.[23] श्वेताश्वतररचनकाले सांख्यसि द्धांतः न तु नूत्नसिद्धांतः इति डा.इ. रोयर् वाक्यं युक्तं स्यात्।

भागवतपुराणे केवलपरमात्मा श्रीवासुदेव एव कर्दम प्रजापतिद्वारा देवहूतिगर्भवासेन कपिलरूपेण जातः इति 'कपिलस्तत्वसंख्याता भगवा नात्ममायया। जातः स्वयमजः साक्षादात्मप्रज्ञाप्तये नृणाम्॥'(3.25.1) तत्व

संख्यात कपिलः स्वतः अजः, तथपि भगवतः मायाप्राबल्येन नराणाम बोधार्थं जातः इति विशदयति। अनंतरं 'पंचमो कपिलो नाम सिद्धे कालविप्लुतम्। प्रोवाचासुरये सांख्यं तत्वग्रामविनिर्णयम्॥' (1.3.1) क विप्लुतं सांख्यं पंचमावतारो कपिलः आसुरये उपदिष्टवान् इति भा वतग्रंथं एव स्पष्टयति। एतानि वाक्यानि विवृण्वन् बलराम उदासी स्वयोगभाष्यटीकायां 'इति स्मृतौ पंचमावतारत्वोक्ते विष्णोरवतारः कपि इति भावः' (1.25) स्मृतौ पंचमावतारो नाम विष्णोः अवतार भू कपिलः इति अन्वयेनोक्तवान्। तथैव पद्मपुराणेऽपि वासुदेव एंव कपि नाम्ना ब्रह्म, भृगु इत्यादीनां ऋषिवराणां सांख्यतत्वोपदेशं कृतवा नि ज्ञापयति। महाभारते- 'अग्निः स कपिलो नाम सांख्यशास्त्रप्रवर्तक अग्निरेव कपिलनामको सांख्यशास्त्रस्य प्रवर्तकः इति उच्यते। एतत् वि ण्वन् बलरामउदासीनः'कल्पभेदे नैव च कपिलो ब्रह्मपुत्र इति स्मर्य कल्पभेदात् ब्रह्ममानसपुत्र एव कपिल इति स्मृति भावेन लिखितवा तस्मात् विष्णुसहस्रनामस्तोत्रं- 'योगो ज्ञानं तथा सांख्यं विद्याशिल्प कर्म च। वेदशास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्॥' (139) योगज्ञानसां त्यादिवेदशास्त्राणि सर्वाणि जनार्दनादेव जातानि इति ज्ञापयति। भारतांत तत्वशास्त्रे श्रीमद्भगवद्गीताशास्त्रे श्रीकृष्णभगवान् आत्मनः दिव्यविभूतं अर्जुनं प्रतिबोधयन् 'अश्वत्थस्सर्ववृक्षाणां देवर्षीणां च नारदः। गंधर्वा चित्ररथस्सिद्धानां कपिलो मुनिः॥(10.6) सर्वसिद्धेषु कपिलमुनिः स्वमूर् इति उक्तवान्। गीताशास्त्रे सिद्ध इति, भागवते सिद्धेश इति च प्रख्य कपिलदेवं नाथसांप्रदायिकग्रंथेषु, रसायनिकशास्त्रेषु च प्रशस्तसिद्ध इ उक्तवंतः। आदिपुराणे सांख्यो नाम कपिल इति, गाढं रक्तवर्णं, स्थू उदरं, दण्डः, करयोः रुद्राक्षमालाद्वयं, जटा, दीर्घनखधारीति वर्णित (24) श्रीमद्वाल्मीकिरामायणे- 'यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमत कपिलं रूपमास्थाय धारयत्यनिशं धराम्॥'(बाल. 40.2) इति रीत्या वासुदेव एव कपिलरूपं धृतवानिति उक्तम्। स कपिल एव सहस्रसग त्मजान् भस्मं कृतवानिति स्पष्टयन् श्रीमद्वाल्मीकिमहर्षिः 'कपिलं महात्मना' (बाल. 40.30) इत्युक्तवान्। तस्य 'महात्मा' पदस्य विवर कूर्वन्'महाकाया' इति, 'कपिल' नाम कपिलावतार इति श्रीगोविंदराजं व्याख्या आदिपुरणांतर्गतं कपिलरूपं स्पुरयति। तथैव 'सनातनातनत कपिलः'(108) इत्यत्र 'बडबानलस्य कपिलो वर्ण इति तद्रूपी कपिल

इति श्री शंकराः विष्णुसहस्रनामभाष्ये उक्तवंतः। अपि च इतरपुराणेषु कपिलं अग्निदेवरूपेण, विष्णुरूपेण, शिवरूपेण बहुविधैः दर्शितवंतः।

उपरि उक्तरीत्या It had found many adherents. It was the doctrine of Manu, of some parts of the Mahabharata, and to its founder, divine honours had been assigned by general consent.[25] सांख्यसिद्धांतः बहुविधमार्गान् उपलब्धः। मनुधर्मे, किंचिन्मात्रं महाभारते च स्वीकृतः। तस्य कर्ता सर्वसम्मतान् अवताराहान् प्राप्तवान्। The imagination of the Hindus has thrown a viel of mystery and fable around Kapila, the traditional author of the Shankara Philosophy. So much reverence gradually attached to his name, that he was some times called the divine Kapila and was said to have been a son of Brahma the creative form of Brahma, an incarnation of Vishnu or a form of Agni.[26] सांख्यदर्शनाचार्यस्य कपिलस्य परितः हिंदूकविताशक्तिः एकम् अद्भुतं, कल्पितं च अवनिकं आवरितम्। तस्मात् सः देवांशो कपिल ज्ञाति, ब्रह्मणः मानसपुत्र इति, विष्णोः, अग्नेश्च अवतारपुरुष इति बहुविधार्हाः तस्य नाम्नः सिद्धाः इति जान् डेविस् लिखति। If there was a Sage Kapila, who expounded Philosophy, he had disappered into a mass of absecure tradition at an early date[27] तत्वप्रबोधकः कपिलो नाम ऋषिः पूर्वमासीत्। तथापि सः अस्पष्टगाथाबाहुल्येन न दृश्यते इति ए.बी.कीत् पंडितस्याभि प्रायः। Moreover, there is grave reason to suspect his real existence at all, in view of the fact that he may owe his name merely to the use of Kapila in the Swetaswatara (5-2) as a description of Hiranyagarbha.[27] तदनंतरं श्वेताश्वतरोपनिषदि हिरण्यगर्भवर्णने कपिलशब्दस्य सत्वात्, तथा तन्नाम तस्य सिद्धांत्वाच्च यथार्थस्य सः नोद्भव इति वक्तुं अवकाशः वर्तते इति कीत्तुपंडितः लिखितवान् The idea that in this verse, we are to see the first mention of the founder or the Sankhya as a real person is fantastic to be upheld, it is not at all unlikely that the origin of the doctorine of Kapila as the founder of the Sankhya is to be traced to this passage.[28] श्वेताश्तरोपनिषदि अस्मिन् श्लोके सांख्यकर्ता यथार्थव्यक्तिरिति

प्रथमतः सूचित इति समर्थनम् अत्यंतं विपरीतम्। कपिलः सांख्य प्रवचनकर्ता इति वक्तुं अयं श्लोकः आधारः इति सः भावं प्रकटित वान्। एतद्विषयमेव तर्कयन् All the early teachers of the Sankhya appear in legendary guise, the reality of Kapila the alleged founder of the system, has been abandened by Jacobe[28] प्रथमसां ख्यदर्शनाचार्याः सर्वेपि कल्पिताः इव दृश्यन्ते। सांख्यदर्शनकर्तुः कपिलस्य व्यक्तित्वमपि जाकोबी पंडितः तिरस्कृतवानिति माक्स्मुल्लर् उक्तवान्। Indeed the very existence of such person as Kapila has been doubted, in spite of the unanimity with which the Indian tradition disignates a man of this name as the founder of the system[29] सांख्यदर्शनाचार्यः एकमुखेन हैंदवसंप्रदायं स्पष्टयन्नपि कपिलस्य व्यक्तित्वमेव संदिग्धं इति संस्कृतवाङ्०मयचारित्र कारः माक्डोनेल् उक्तवान्।

एवमुपस्थितेषु वेदांतसूत्रेषु स्मृत्यधिकरणे प्रथमसूत्रभाष्ये सांख्यखं. डनं कुर्वन्तः श्री शंकराचार्याः कपिलमुद्दिश्य 'या तुशृतिः कपिलस्य ज्ञानातिशयं प्रदर्शयंती प्रदर्शिता न तया श्रुतिविरुद्धमपि कपिलं मतं श्रद्धातुं शकयं, कापिलमिति श्रुतिसामान्यमात्रात् अन्यस्य च कपिलस्य सगर पुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणात्' (2.1.1) कपिलस्य ज्ञानातिशयं प्रदर्शयन्ती या श्रुतिः अत्र उदाहृता तस्यां कपिलशब्दसामान्यस्य श्रुतत्वात्, सगरस्य पुत्राणां दाहकः, वासुदेवांशेन उद्भूतः, इति अन्यस्य कपिलस्य श्रुतत्वात्, तया श्रुत्या वेदविरुद्धं कपिलमतं न विश्वसनीयमिति, सांख्य स्मृतिकर्ता कपिलः अन्यः इति, रामायणादिपुराणेषु सूचितः सगरात्मज हंतकः कपिलः अन्यः इति उक्तवांतः। अस्य रत्नप्रभाकारः गोविंदानंदः 'कपिल शब्दमात्रेण सांख्यकर्ता श्रौत इति भ्रान्तिरयुक्ता' इत्युक्तवान्। एत देव प्रस्पुटयन् 'बडबानलस्य कपिलो वर्ण इति तद् रूपी कपिलः' (108) बडबानलस्य वर्णं कपिलमिति, तद्वर्णं यस्य सः कपिल इत्यर्थेन कपिलम् इति पदं न तु सर्वनामशब्दः, तद्वर्णमात्रसूचकं विशेषणमिति, कपिलवर्णवान् हिरण्यगर्भवर्ण हिरण्यगर्भ एवेति, न तु सांख्यकर्ता इति शंकराचार्यः समन्वयं कृतवन्तः। तद्वदेव विष्णुसहस्रनामभाष्येऽपि 'महर्षिः कपिलाचार्यः' (69) इत्यत्र 'कपिलश्चासौ सांख्यस्य शुद्धात्मतत्वविज्ञाना चार्यः' इति वदन् 'शुद्धात्मतत्वविज्ञानं सांख्यमित्यभिधीयते इति व्यास

स्मृते' सांख्यं नाम शुद्धात्मतत्वविज्ञानमिति व्यासस्मृतयः निर्वचनं वदंतीत्युक्तवंतः। सांख्यपदं, कपिलपदं च सांख्यदर्शन, कपिलाचार्य योः नान्वीयेते इति शंकराचार्याणां भावः। तस्मात् पूर्वोक्तस्य सूत्रभाष्यस्य टीकाकारः आनंदगिरिरपि वैदिकः कपिलः सगरपुत्रसहस्रं भस्मीकृतवानिति उक्तवान्।

पूर्वोक्तरीत्या, पातंजलयोगसूत्रस्य भाष्यकर्ता श्री व्यासदेवः 'आदि विद्वान्.......' इति रीत्या कपिलस्य स्मरणं कृतवान्। तस्य विवरणेन वाचस्पतिः 'कपिलस्यापि जायमानस्य महेश्वरानुग्रहादेव ज्ञानप्राप्तिः श्रूयत इति। कपिलो नाम विष्णोरवतारविशेषः प्रसिद्धः। स्वयंभूस्तु हिरण्यगर्भः। तस्यापि सांख्ययोगप्राप्तिर्वेदे श्रूयत इति स एवेश्वर आदिविद्वान्कपिलो विष्णुर्न स्वयंभूरिति भावः। स्वायंभुवानां त्वीश्वर इति भावः।'(1.25) जन्मतः एव महेश्वरानुग्रहात् ज्ञानमुपलब्धवान् कपिलः इति व्याप्तिर्वर्तते। सः विष्णोः अवतारः इति प्रसिद्धः। हिरण्यगर्भ एव स्वयंभूः। तस्य हिरण्यगर्भस्यापि सांख्याज्ञानमासीदिति वेदे वर्तते। स ईश्वर एव स्वयं व्यक्तो विष्णुरेव आदिविद्वान् कपिल इति भावः। स्वयंभूषु अयं कपिल एव ईश्वर इति ग्राह्यम् इत्युक्त्वा, कपिलोनाम सांख्यविज्ञानी विष्णुरेवेति निर्धारणं कृतवान्। अपि च विष्णुसहस्रनामस्तोत्रे 'महर्षिः कपिलाचार्यः' 'कपिलः' इति विष्णोः, शिवसहस्रनामस्तोत्रे 'सांख्यप्रदं' इति शिवस्य च कपिल नाम अन्वीयते। तस्मात् While these accounts are mystical it may be accepted that a historical individual of the name of Kapila was respinsibel for the Sankhya tendency of thought[30] कपिलस्य विषयः अस्वष्टश्चेत्, सांख्यवादकारकः कपिलनामकः एकः चारित्रकपुरुषः आसीदिति अंगीकरणीयमिति राधाकृष्णपंडितस्याभिप्रायः। अनंतरं Kapila plays a great figure in the Philosophy of the epic; he is authoritative in all Philosophic matters, and his tenets are of the most divine kinds. In the strict sence of the world, he is indeed the only founder of a system recognised by the epic, the other persons being either Gods or his disciples.[31] भारतपुराणगत तत्वज्ञाने कपिलः महत्प्रमुखपात्रनिर्वाहकः। सर्वतात्त्विकविषयाणां स एव प्रमाणम्। तस्य सिद्धांताः अतिपवित्राः। यथार्थस्य पुराणतत्वशास्त्रस्य स एव कर्ता स्यात्। इतरे देवताः इव, शिष्या इव परिगणनीयाः इति कीतु महाशयस्य सिद्धांतः। Tradition affirms that Kapila lived as a

recluse he is called muni in Bhagavata x.1-52 and that he possessed a super-natural power not always used with Philosophical calmness.[32] कपिलः परिव्राजकजीवने आसीदिति प्रसिद्धः। तस्य अमानुषशक्तिं विद्यमानमपि विरागेण नोपयुक्तवानिति भागवतमपि स्पष्टयति। We can only say that he was probably a Brahmin who being disgusted with the prevailing beliefs and practices of his time, brought out for himself a system by which he hoped to solve the mysteries connected with spirit and matter by reason.[32] सः एकः ब्राह्मणः इति तस्य कालस्याचारव्यवहारेभ्यः विमुखो भूत्वा, पुरुष प्रकृतयोः संबंधं अगोचरत्वं, युक्त्या उपस्थापितुं निश्चितवानिति जान् डेविस् समन्वयं कर्तुं यत्नंकृ तवान्। कपिलः असुरो भूत्वा चतुराश्रम विभजनं कृतवानिति बोधायनसूत्रम्। श्राद्ध, विवाह, प्रायश्चित्तान्युद्दिश्य कपिलस्मृतिकर्ता, कपिलः एकः आसीदिति संप्रदायः वर्तते।

एतादृशं क्लिष्टं कपिलदेवस्य वृत्तांतं दृष्ट्वा, कपिलः न तु चारित्रकपुरुष इति कोल्ब्रूक्, जकोबि इत्यादयः विद्वांसः वक्तुमुद्युक्तवंतः। तस्मादेव Thus we find no strong proof for believing Kapila a historical person.[33] तथा कपिलं चारत्रिकपुरुषरूपेण विश्वसितुं प्रबलप्रमाणानि न संतीति हरदत्तशर्मा He is not a historical person. His name occurs in various contexts and somehow it came to be associated with the Sankhya.[34] सः न तु चारित्रकः इति, तस्य नाम बहुषु संदर्भेषु गोचरयन् येनकेनापि प्रकारेण सांख्यस्य संबंधितमिति सोवानि अपि लिखितवान्। तथापि पूर्वोक्तरीत्या राधाकृष्णादि पंडिताः तेनाभिप्रायेण नैकीभवन् कपिलं चारित्रकपुरुष एवेति निश्चितवंतः। कपिलः बुद्धस्य पूर्वकालीनः इति अनेकबौद्धप्रमाणानि स्वीकृत्य Buddhistic legends mention Kapila as one of the predecessors of Buddha.[35] कपिलः बुद्धात् पूर्वीकः इति बौद्धशास्त्राणि ज्ञापयंति इति, We shall not be wrong if we place him the century preceeding Buddha.[35] बुद्धात् पूर्वशताब्द्यां कपिलस्य काल इत्यत्र दोषः नास्तीति राधाकृष्ण पंडितस्याभिप्रायः। There is abundant evidence, both in Hindu and Buddhists works, of unavestionable antiquity and authenticity of the Sankhya and Yoga Systems having been current before

the time of Buddha.[36] बुद्धस्य कालात्पूर्वमेव सांख्य योगसिद्धांतौ प्रमाणिकौ इति निस्संदेहेन वक्तुं बहूनि प्रमाणानि हिंदू बौद्धग्रंथेषु संतीति योगसूत्रव्याख्यकार: राजेंद्रलाल: उक्तवान्। Sankhya ideas themselves preceeded Buddha.[37] सांख्यभावा: सर्वेऽपि बुद्धात् पूर्वा: इति राधाकृष्ण: उक्तवान्। बुद्धस्य जन्मस्थानं कपिलवस्तुपुरं Kapilavastu had been built be the sons of Ikshwaku by the permission of the sage Kapila.[38] कपिलसंयम्याज्ञानुसारेण इक्ष्वाकुतनया: सृजिता: इति पुराणवाक्यानां प्रमाणेन जान्डेविस् बुद्धात् प्राचीनः कपिल: इति स्पष्टमुक्तवान्।

कपिलाचार्यस्य काल:

पूर्वोक्तग्रंथविधानेन कपिलाचार्यस्य चारित्रकत्वमेव निर्णेतुमशक्या: पंडिता:। तथापि There seems in fact, good reason to believe that the Sankhya doctrine came into being as a system between 800 and 550 B.C.[39] सांख्यभावा: सिद्धांतरूपेण क्रीस्तो: पूर्वं 800 आरभ्य 550 पर्यंतं वत्सरेषु मध्ये उत्पन्ना: इति वचनं युक्तमिति माक्डोनल् पंडित:, It is probable that he lived in the 7th century before Christ[40] क्रीस्तो: पूर्वं सप्त अष्टमशताब्द्यो: मध्ये कपिल: आसीदिति जान्डेविस् पंडितश्च उक्तवन्तौ। अपि च क्रीस्तोः पूर्वं प्रथम शताब्दीय इति केचन क्रीस्तो: अनंतरशताब्दीय: इति, अन्ये च ऊहागानं कृतवंत:। एतानि कालनिर्णयानि कियत्पर्यन्तं सत्यानि इति विज्ञै: आलोचनीयानि।

तथा विना अस्माकं प्रमाणभूतानां पुराणेतिहासशास्त्राणां परिशीलनेन कपिलस्यावतारकालं निर्णीतुं यत्नं करिष्याम:।

आर्षकालमानानुसारेण चतुर्मुखब्रह्मण: आयु: शतवर्षा:। तथापि तेषां वर्षाणां मानुषवर्षाणां च अत्यंत भेद: वर्तते। तस्य ब्रह्मण: आयुष्प्रमाणे एकं दिनं चतुर्दशमन्वन्तरपरिमितम्। पुन: एकस्मिन् वर्षे मन्वन्तरे एकसप्त (71) युगानि, एकस्मिन् महायुगे चत्वारि युगानि अंतर्गतानि। तान्येव कृत, त्रेता, द्वापर, कलियुगानि। तेषु युगेषु कृतयुगे 17,28,000 संवत्सरा:, त्रेतायुगे 12,96,000 संवत्सरा:, द्वापरयुगे 8,64,000 संवत्सरा:, कलियुगे 4,32,000 संवत्सराश्च संति। एकस्मिन् महायुगे 43,20,000 संवत्सरा: संति। एकस्मिन् मन्वन्तरे 30,67,20,000

मानुष संवत्सराः संति। तादृशानि 14 मन्वन्तराणि, नाम 429,40,80,00(मानुष संवत्सराः ब्रह्मणः एक अह भवति। अनेन कालमानप्रकारे विजय नाम संवत्सर पंचांगे सृष्ट्यादौ अद्यवाधि 195,58,85,054 मान षसंवत्सराः समाप्ताः इति गणिताः। तत्र षट् मन्वन्तराः गताः, सप्तम गच्छति। सप्तमे वैवस्वतमन्वन्तरे 12,05,53,054 संवत्सराः गताः।

कपिलस्य कालनिर्णयः करणीय इति चेत् भागवतपुराणप्रमाणा कारेण कपिलमुनिः सृष्ट्यादौ स्वायंभुवमनोः कालीन इति विशदं भवति। तस्मात् उक्तेषु सृष्ट्यादि अब्देषु एकं मन्वन्तरकालं त्यक्त्वा, शेषेभ्य 164,91,65,054 सवत्सरेभ्यः पूर्वीकः इति स्पष्टं भवति। प्रथममनो कालपरिमितौ 30,67,20,000 संवत्सरेषु कपिलः आसीदिति वक्त शक्यते। तथापि एषः कालनिर्णयः अद्भुतम् अभूतः एव। तथापि आर्षे येषां विश्वासः वर्तते ते तेषां प्रमाणमेव। अनेन कालानुसारे 2,36,24,195 अब्देभ्यः पूर्वकालीनस्य हरिश्चंद्रमहाराजस्य आदिपुरुषस्य इक्ष्वाकस्य पुत्राः कपिलस्य आज्ञानुसारेण कपिलवस्तु नगरं निर्मितवंतः। तस्मात् कपिलः हरिश्चंद्रस्य कालादेव अतिप्राचीनः इति विदितः। तादृश प्राचीनं एसुक्रीस्तुकालेन परिगणस्य कालनिर्णयं कृतं चेत् तत् हास्य स्पदम्।

कपिलावतरणम्

श्री भागवतपुराणस्थं कपिलाचार्यस्य अवतरणविधानं किंचित पश्यामः। पूर्वोक्तरीत्या सृष्ट्यादौ पंकजासनः ब्रह्मा प्रजापालनं संकल्प्य एकं पुत्रं असृजत्। स्वयंभुवः तनयत्वात् स्वायंभूः इति नाम सिद्धम्। तस्य शतरूपगर्भवासे देवहूती इति कन्या जाता। तदानीं प्रजापतिषु एक कर्दमः सरस्वतीनद्याः तीरे जपसमाधिस्थितस्सन् तपः आचरति। त संयमीन्द्रेण प्रजाभिवृद्धिं प्रपंचे कर्तुं संकल्प्य देवदेवेश्वरः श्रीहरिः तस्य साक्षात्कारं प्रसाद्य, स्वायंभुवः कन्यां देवहूतीं भार्यारूपेण स्वीकुरु, इति आज्ञाप्य, तस्याः गर्भे अहमेव अवतीर्य, तत्वसंहितां बोधयिष्यामि इत्युक्त्वा अंतर्भूतो बभूव। तदनंतरं स्वायंभूः पुत्रिकया सह कर्दमं प्रति गत्व अच्युतस्य संकल्पबलेन स्वपुत्रीं कर्दमाय दत्वा विवाहं कृतवान्। त तयोः अन्योन्यदांपत्येन देवहूत्याः घनसांख्ययोगविलसिततत्वस्थितिनिरत कपिलाचार्यः उद्भूतवान्। जन्मतः एव ब्रह्मादि देवगणान् तत्वस्थितिनिरत

तं शिशुचक्रवर्तिं दृष्ट्वा, प्रणामान् कृतवंतः। स बालः स्वस्य पितुः कर्दमस्य स्वावतरणकारणमुपदिश्य, भक्तियोगं बोधितवान्। तथैव देवहूती पुत्रं तत्वबोधनमर्थितवती। करुणांतरंगः कपिलः सर्वं सांख्यमुपदिश्य मातरं धन्यां कृतवान् इति भागवताख्यं पुराणं बोधयति (3.4 स्कं)।

आदिकाव्ये श्री वाल्मीकिरामायणेऽपि कपिलस्य स्मरणं कृतम् (बाल.40)। पूर्वस्मिन् काले सगरमहीपतिः अश्वमेधयागं कुर्वन् यज्ञाश्वेन सह स्वस्य सहस्रतनयान् प्रेषितवान्। तं तुरगं वासवः अपहृतवान्। सगरात्मजाः तुरगान्वेषणे सर्वत्र संचरन्। कुत्रापि अदर्शनेन ईशान्यदिशं गत्वा, तत्र कपिलाश्रमे तुरगं दृष्ट्वा, भ्रमवशात् अश्वस्य चोरः कपिलः इति मत्वा तपोवस्थायां विद्यमानं तं महात्मानं पीडितवंतः। तदानीं रोषाकुललोचनस्य कपिलस्य क्रोधाग्नेः सगरसुताः सर्वेऽपि भस्मीभूताः। कपिलस्य रूपं विवृण्वन् वाल्मीकिमहर्षिः 'यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः। कापिलं रूपमास्थाय धारयत्यनिशं धराम्॥' इति कपिलावतारः वासु देवांश एवेति उक्तवान्।

अपि च महाभारते कपिलस्य नामस्मरणं, तत्प्रोक्त सांख्ययोगविवरणं च विविधरीतिभिः अनेक संदर्भेषु दृश्यते। शांतिपर्वाणि जनकस्योपदेशं कर्तुं तत्वज्ञानघनो, निर्द्वन्द्वसंशयरहितः पंचशिखः समागतः। सः कपिलगुरुकुटुंबस्य संबंधी। तस्मात् कापिलेयः इत्युक्तः (शांति.4)। पंचशिखाचार्यः जनकं गुणत्रयविचारमुपदिष्टवान्। पुनः कपिलगोसंवादः इति शीर्षिकायां कपिलमुनिवरः गवि सूक्ष्मरूपेण प्रविश्य स्थितं श्यूमरश्मिं इन्द्रियव्यवहारमुपदिष्टवान्। अपि च श्यूमरश्मेः कपिलदेवः वेदप्रामाण्यमुपदिष्टवान् (शांति.4)। भीष्मः धर्मराजाय कपिलप्रोक्तं सांख्ययोगं उपदिष्टवान् (शांति.5)। अनंतरं जनकसुलभासंवादे पंचशिखाचार्यस्य सन्निधौ मया सांख्य योगः अधीतः इति, पंचशिखस्य शिष्योहमिति च जनकेनोक्तं। आनुशासनिकपर्वणि सनत्कुमारः रुद्राय सांख्यमुपदिष्टवान् (आनु.4)। तस्मिन् संदर्भे स्वस्य गुरुः कपिलाचार्य इति, कपिलाचार्यस्य सन्निधौ बहवः शिष्यः विज्ञानेन दीपिताः इति सनत्कुमारेणोक्तं। तथैव तस्मिन् पर्वाणि एव परमशिवः पार्वतीं प्रति सांख्यमुपदिश्य, सांख्यानां पन्थाः ज्ञानमिति, तेन मोक्षः सिद्ध्यतीति चोक्त्वा, कपिलादिपरमर्षिभिः सेवितः सांख्य धर्मोऽयमिति (अनु.5) विस्पष्टं ज्ञापितवान्।

उपरि उक्तरीत्या सांख्ययोगप्रवर्तकः, ज्ञानेश्वरः, विष्ण्वंशसंभूतः,

आदिविद्वान् च कपिलमहर्षिः इति वृत्तांतं सर्वमपि प्रस्फुटति पुराणेतिहास शास्त्रेषु। तथापि अनेक संशयाः कथमुत्पन्नाः? इति विचार्यः। सांख्यशास्त्र मित्युच्यमानस्य सांख्यकारिका शास्त्रस्य उत्पत्तेः पूर्वमेव भक्तिज्ञानप्रपूत ईश्वरापेक्षिकं च सांख्यमिति, कारिकासु कुत्रापि भगवद्विषयस्य प्रसक्तेः साहित्यमेव मुख्यकारणम्। तस्मात् कारणात् कालक्रमेण, निरीश्वरमिति, वेदबाह्यमिति, नास्तिकमिति च दूषितम्। तस्मात् कारिकागतसांख्योपदेष्टा कपिलः एकः इति, शास्त्रोक्त कपिलः एकः इति च शंकरादिविज्ञलोके संदिग्धस्य कारणमिति वक्तुमवकाशः वर्तते। Kapila established no society and no heirarchy[40] कपिलः एकां संस्थां संप्रदायं च न स्थापितवान् इति जान् डेविस् पंडितेन उक्तरीत्या, कपिलस्य संप्रदायः, विरचित ग्रंथश्चापि अस्माकमनुपलभ्यत्वात्, कपिलस्य सिद्धांते प्रकरण ग्रंथाः एव अस्माकमुपलभ्यत्वात् असमग्रत्वात्, संक्षिप्तत्वाच्च संशयानामव काशः इति तात्पर्यम्।

सांख्याचार्यः

श्री कपिलाचार्यस्य विषयानंतरं, तस्य तत्वस्य प्रचारकानां विषय मपि पश्यामः। ईश्वरकृष्णस्य कारिकानां प्राधान्येन कारिकापूर्वसांख्या चार्याः, कारिकानंतरसांख्याचार्याः इति विभक्तुं शक्यते। कारिकापूर्वसांख्या चार्याः सर्वेपि नाममात्रेण उपलभ्यंते। तेषां जीवितविशेषाः, कृतग्रंथराजा श्च नोपलभ्यंते। तस्मात् तान् सर्वमेव एक समूह इव स्वीकरणीयः। सांख्यमेतत् कपिलात्पूर्वमेव हिरण्यगर्भात् लोके विद्यमानेपि The basic Sutras which form the starting point of a system in reality represent the end of a long and extensive literary development that has been lost[41] सिद्धांतप्रारंभकरूपेण स्थितानि मुख्यसूत्राणि काले लयस्य दीर्घविशाल परिणामसंपूर्णत्वमेव सूचितमिति माक्डोनेल् उक्तरीत्या, कपिलमूर्तिना सांख्यं एकं रूपं धृत्वा, सर्वाभीष्टसिद्धांतराजो भूत्वा, परं परागतसंप्रदाये प्रकाशितमिति ज्ञातव्यम्। तस्मादेव कपिलात्पूर्वं सांख्य गुरुलोकः नासीत्। कपिलादनंतरं षड्विंशति आचार्याः पंडिताश्च श्रूयते। क्रमेण 1.कपिल 2.आसुरि 3.पंचशिख 4.विंध्यवास 5.वार्षगण्य 6.जैगी षव्य 7.वोढु 8.असित देवल 9.सनक 10.सनंदन 11.सनातन 12.सनत्कु मार 13.भृगु 14.शुक्र 15.काश्यप 16.पराशर 17.गर्ग विना गार्ग्य 18.

गौतम 19.नारद 20.अरिस्टिसेनु 21.अगस्त्य 22.पुलस्त्य 23.हरीत 24. उलूक 25.वाल्मीकि 26.शुक इति। एतेषां प्रसिद्धान् सांख्याचार्यान् उद्दिश्य किंचित् विचारयामः।

आसुरिः

श्री कपिलाचार्यस्य वृत्तान्तस्य चर्चासमये 'परमर्षिरासुरये ज्जिज्ञास मानाय तंत्रं प्रोवाच' (यो.सू.भा.1.25) 'प्रोवाचासुरये सांख्यं' (भागवत. 1.3.11) 'एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकंपया प्रददौ' (सां.का.70) इत्यादि बहुषु वाक्येषु कपिलः प्रथमं आसुरेः सांख्यशास्त्रमुपदिष्टवान् इति विदितं भवति। आसुरेः ग्रन्थः कः इति न ज्ञायते। तथापि 'षड्दर्शन समुच्चय ग्रंथे हरिभद्रः आसुर्याचार्यस्य वाक्यमिति एकं वचनं उदाहृतवान्। तस्मात् आसुरिणा विरचितः ग्रन्थः पूर्वमासीदिति, इदानीमलभ्यः इति केषांचन भावः। अयमासुरिः एव प्रसिद्ध सांख्यशास्त्रप्रबोधकस्य पंचशिखाचार्यस्य उपदेशिकः। 'तत्र पंचशिखोनाम कापिलेयो महामुनिः। आसुरेः प्रथमं शिष्यं.....'(शांति.6.10.218) महामुनिः कपिलसंप्रदायस्य संबंधीकः पंच शिखः आसुरेः प्रथमशिष्यः इति महाभारतं स्पष्टयति। एतस्मादधिकानि विवरणानि अलभ्यानि। तस्मात् एव Asuri is a mere name and we cannot possibly accept him as a historical Philosopher without more proof[42] एतस्मादधिकानां प्रमाणानामलभ्यत्वात् आसुरिः केवल नाममात्र एव इति, चारित्रक इति नाङ्गीकरिष्यामः इति च The epic asserts that he taught Panchasikha, whence no doubt comes the statement in the Karika[42] अयं पंचशिखस्य बोधितवानिति भारतं दृढं वदति। अस्मादेव कारिकावाक्यमुत्पन्नमित्यत्र नास्ति संदेहः इति कीत्तु पंडितस्याभिप्रायः। आधाराणमदृश्यत्वात् तस्य व्यक्तेः चरितं संदेहास्पद मिति एतेषां विमर्शकाग्रेसराणां भावः। तथापि पंडिताः सर्वेऽपि तथा नोक्तवन्तः। Kapila is stated in the Sankhya Karika 70 to have taught his philosophy to Asuri who is mentioned in the Sathapatha Brahmana as a teacher Asurayana and Yaska who followed Asuri were the teachers of Jatukarnya a contemporary of Akshapada Gautama.[43] शतपथब्राह्मणमनुसृत्य दृष्टं चेत्, अक्षपादगौतमस्य सम कालीनस्य जातुकर्ण्यस्य उपदेष्टानाम् आसुरायणयास्कानां गुरुं आसुरिं प्रति

कपिलः उपदिदेशेति 70 सांख्यकारिका बोधयति। तस्मात् आसुरे व्यक्तित्वे संदेहः नास्ति। तथैव It is said that Asuri popularised it and Panchasikha made it atheistic[44] आसुरिः एव सांख्यं प्रसिद्धि कृतवान्। पंचशिखः तं नास्तिकं कृतवान् इति, Asuri probably lived before 600 B.C. if he be one with the Asuri of the Satapatha Brahmana[44] अयं शतपथब्राह्मणस्य आसुरि एव। सः क्रीस्तोः पूर्वं 600 संवत्सरकालीनः इति राधाकृष्णपंडितः स्वाभिप्रायं प्रकटितवान्। तथापि कपिलाचार्यस्य कालनिर्णये प्रतिपादितवत् कपिलेन सह तस्य शिष्य आसुरिः अपि तस्मिन् काले नाम स्वायंभुवमनोः काले आसीदिति अंगी करणीयम्।

पंचशिखः

'एतत्पवित्रमग्र्यं मुनिरासरयेऽनुकंपया प्रददौ। आसुरिरपि पंच शिखाय तेन च बहुधाकृतं तंत्रम्॥'(सां.का.70) पवित्रं परमं च एतत् ज्ञानं कपिलः अनुकंपया आसुरेः प्रसादितवान्। आसुरिः पचशिखाय बो धितवान्। तेन बहुधाकृतमिति ईश्वरकृष्णस्य वचनानुसारेण पंचशिख आसुरेः शिष्यरत्नमिति, सः एतत् सांख्यं बहुप्रकारैः विस्तारं कृतवानिति ज्ञायते। अस्मादेव गुरुशिष्यपरंपरया सांख्यं ईश्वरकृष्णपर्यन्तम् अविच्छिन्न मागतमिति 'शिष्यपरंपरागतं' (सां.का.70) इति ईश्वरकृष्णवचनेन ज्ञायते। कपिलप्राक्तानीति सांख्यप्रवचनसूत्रं, तत्वसमासाभ्यां केषांचनवादः वर्तते, न तु निर्धारितः। तथापि He seems to have been held in high esteem even by the advocates of other systems. His knowledge and integrity are praised even where his system is condemned[45] अन्यसिद्धांतिभ्यः अपि एषः महान् इव दृष्टः। अस्य सिद्धांतस्य खंडन समयेपि अस्य ज्ञानातिशयः प्रस्तुतः। तस्य कारणं एषः ब्रह्मकृपाजनित ज्ञानसंपन्नो भूत्वा, 'पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातं' (सां.का. 69) पुरुषार्थं इदं ज्ञानरहस्यं परमर्षिणा कपिलेन प्रकटितमेव। तस्मात् एषः किमपि ग्रंथं अविलिख्य, सिद्धांतप्रकटनां मात्रं कृतवानिति, त सिद्धांतराजं ग्रन्थरूपेण बहुप्रचारकर्ता प्रशिष्यः पंचशिखाचार्य एवेति व्याख्यकारस्य बलरामउदासीनस्य अभिप्रायः। पूर्वोक्तस्य ईश्वरकृष्णस्य वचनानुसरणम् बहुधाकृतकर्ता पंचशिख एवेति वक्तुं प्रमाणं तेन विरचित

षष्ठि तंत्रमिति, 60,000 श्लोकैः पूरितं तदिति चैनादेशीयग्रंथाः स्पष्टयं तीति केचन वदंति।

तस्मात् कारणादेव तस्य नाम बहुभिः सिद्धांतिभिः प्रमाणेन बहु ग्रंथेषु स्मृतम्। (1) योगसूत्रभाष्ये बहुत्र तस्य वाक्यानि व्यासेन उदाहृ तानि। (2) सांख्यप्रवचनसूत्रेषु द्विवारं तस्य नाम सूचितम्। भामतिकारेण वाचस्पतिमिश्रेण स्वस्य न्यायसूत्रभाष्ये, (2.2.10) पंचशिखाचार्यस्य भावं स्वीकृतम्। सांख्यकारिकायाः गौडपादः आदावेव 'पंचविंशति तत्वज्ञो यत्र कुत्राश्रमे रतः। जटी मुंडी शिखी वापि मुच्यते नात्र संशयः॥' (सां.का. गौ.1) इति पंचशिखस्य वाक्यं प्रमाणेन स्वीकृतवान् (सां.का.मा.22)।

तथैव पुराणग्रंथेष्वपि पंचशिखः जनकं प्रति सांख्यमुपदिष्टवानिति, जनकः पंचशिखमेव 'मम गुरुः' इति उक्तवानिति च दृश्यते।[46] षष्टि तन्त्रशास्त्रकर्तायमिति केचन, सांख्यप्रवचनसूत्राणां कर्ता अयमेवेति स्वप्ने श्वरादयः तत्वसमासस्य कर्तेति अन्यं च मन्यन्ते। The case of Pancha Sikha offers more difficulty, and he was often been treated as an authentic teacher[47] पंचशिखस्य विषयः अतिक्लिष्टोऽपि सः प्रामा णिकाचार्य इति परिगण्यते इति कीत्तु पंडितः, Panchasikha made it atheistic and attributed it to Kapila[48] सांख्यं पंचशिखः नास्तिकं कृत्वा कपिलेन अन्वयं कृतवानिति राधाकृष्णः वदन् It is, however, difficult to be definite about all this[48] तथापि तस्य स्थापनं कष्टमिति प्रति पादितवान्। किमर्थमित्युक्ते? भारतस्थः पंचशिखः जनकं गुरुः इति वचन समयेपि 'पंचशिखो नाम कापिलेयो महामुनिः' इति उक्तत्वात् पंचशिखः न नास्तिकः। तथापि असंपूर्णानि, क्लुप्तानि, अनंतर कालान्तरव्यक्तानि, सांख्यकारिकादि ईश्वरप्रतिपादनारहितसांख्यशास्त्रैः तुलना त्मकं कृत्वा, पंडिताः क्लिष्टत्वं प्रदर्शयन्ति। तस्मादेव It is difficult to decide whether the Panchasikha of the tradition is the same as the Panchasikha referred to in the epic since a divergence between the views attributed to him in the Mahabharata and those to be gathered from the Sankhya and Yoga works[48] महाभारतेपि सांख्य योगशास्त्रयोः पंचशिखस्य अन्वितेषु अभिप्रायभेदेषु व्यत्यासस्य सत्वात् सांप्रदायिक पंचशिखः महाभारत पंचशिखश्च एक एवेति निर्धारणं कर्तुं कष्टं स्यादिति राधाकृष्ण पंडितस्याभिप्रायः। एवं

प्रकारेग बहवः पंचशिखाः संतीति प्रमाणस्याभावात् पुराणेषु पंचशिख कापिलेय इति आस्तिकवाद एव प्रचारस्य सत्वात् विरुद्धयोः एनयो तत्वयोः समन्वयमेव युक्तम्।

इतरे

विंध्यवासो नाम एकः सांख्याचार्येषु प्रसद्धिः। एषः एकं सांख ग्रंथं विरचितवानिति श्रूयते। स एव ईश्वरकृष्णः इति केचन, वोढ इ अन्ये च वदन्ति। विंध्यवास इति नाम नेति, तादृशाः अधिकाः आर न्निति केषांचन भावः।

वार्षगण्यः अपि प्रशस्त एव। अस्य वाक्यानि व्यासभाष्ये भामती व्याख्यायां, सांख्यकारिकाभाष्ये च प्रमाणानीव स्वीकृतानि। अ मेव 'षष्ठितंत्रस्य' कर्तेति केषांचन भावः।

योगे प्रमाणप्रायः जैगीषव्यः। तस्य योगशक्त्या 'भगवतो जैग षव्यस्य संस्कार साक्षात्कारणाद्दशासु महसर्गेषु जन्मपरिणामक्रममनुपश्यत विवेकजं ज्ञानं प्रादुरभूत (यो.सू.भा.2.55, 318) भगवान् जैगीषव्य संस्कारस्य साक्षात्कारत्वात् दशसु महासर्गेषु जन्मपरिणामक्रमज्ञानं संप्राप वान् इति उक्तम्। बुद्धचरित्रे अयं जैगीषव्यः, जनकः पराशरश्च सांख्ये मुक्तिं प्राप्तवन्त इति वर्तते (12.67)। महाभारते देवलस्य सांख्यमुपदिष वानयमिति श्रूयते।

असितदेवल इति देवल इति एकः जैगीषव्यस्य सन्निध सांख्यमधीतवान्। प्रख्यातस्य तस्य नारदेन संवादः महाभारते दृश्यते। ध शास्त्रस्य कर्तृत्वात् याज्ञावल्क्यस्मृतिव्याख्यायां अपरार्के अयं प्रमाणिकः तादृशैः सुप्रसिद्धैः धर्मशास्त्रकारिभिः अपि सांख्यस्य स्वीकृतत्वात् अवश खंडनीयमिति 'देवलप्रभृतिभिश्च कैश्चिद् धर्मसूत्रकारैः स्वग्रन्थेष्वाश्रित तेन तत्प्रतिषेध एव यत्नोतीव कृतः' (1.4.28) इति श्री शंकराः ब्रह्मस ूत्रभाष्ये सांख्यं खण्डितवन्तः। बृहस्पति कात्यायनयोः कालीनोयर्मि केषांचन भावः। सनकसनंदादयः, नारदश्च भारतपुराणे सांख्योपदेष्टारावि उक्तौ। इतरेषां चरितं न लभ्यते।

ईश्वरकृष्णः

एतावत्पर्यन्तं सांख्यकारिकायाः कालात्पूर्वीकानुद्दिश्य विचारितम

इदानीं सांख्यमारिकाकारस्य ईश्वरकृष्णस्य विषयं ज्ञातुं यत्नं कुर्मः। 'शिष्यपरंपरयागतमीश्वरकृष्णेन चैतदार्याभिः। संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धांतम्॥' (सां.का.70) शिष्यपरंपरागतमेतत् आर्यछंदे सिद्धांतस्य संपूर्णस्य ग्राहकेण ईश्वरकृष्णेन संक्षिप्तं कृतमिति कारिकायाः समाप्तौ ईश्वरकृष्णेन उक्तम्। अस्मिन् कारिकाग्रंथे सप्तति श्लेकानां सत्वात् 'सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्ठितंत्रस्य' (सां.का.10) अस्मिन् सप्तति ग्रंथे षष्ठितंत्रस्य संपूर्णविषयाः गृहीताः इति चोक्तवान्। सुप्रसिद्धमेतच्छास्त्रं। It provides a clear and definite exposition of the Sankhya to this day.[49] अद्यावधि स्पष्टं निर्धारितं च सांख्यविवरणं प्रसादयति। तस्मादेव It has been the basis of all later Sankhya treatises and criticisms[49] अनंतरव्याख्यानां खण्डनानां च आधारमेतदेवेति सोवानी लिखितवान्। The oldest systamatic manual which has been preserved is the Sankhya Karika of Iswara Krishna[50] ईश्वरकृष्णस्य सांख्यकारिका एव अस्माकम् अतिप्राचीनसक्रमविवरणग्रन्थः इति, The oldest and completely preserved[51] प्रचीनतमं समग्रं च इति माग्डोनेल् उक्तवान्। तथैव The Sankhya Karika of Iswara Krishna the earliest available as well as the most popular text book of the school[52] ईश्वरकृष्णस्य सांख्यकारिका एव प्रथमः सुप्रसिद्धः उपलभ्यमानग्रन्थः इति राधाकृष्णपंडितः, Sankhya Karika is a work of oldest exposition of Kapila's philosophy that has come down to the present time[53] आधुनिककालावधिस्थितेषु कापिलेयसिद्धांतविवरणेषु सांख्यकारिका एव अतिप्राचीनग्रन्थः इति जान्डेविस् च उक्तवन्तौ। फ्रान्स् देशस्थ संस्कृतभाषाकोविदः आगष्टु बार्तु पंडितः The pearl of the whole scholastic literature of India[54] भारतीयतत्वशास्त्र वाड.मये शुक्तिरेतदिति वर्णितवान्। माक्सुमुल्लर् अपि our first definite text is the Sankhya of Iswarakrishna[55] ईश्वरकृष्णस्य सांख्यकारिका एव सुस्पष्टप्राचीनग्रंथः इति उक्तवान्। अस्यैव 'हिरण्य सप्तति' इति 'सुवर्ण सप्तति' इति च प्रतीतिः। जैनग्रन्थेषु 'कनकसत्तरि' विना 'कनकसप्तति' इति वदन्ति। चैनादेशे एतत् 'सांख्यसप्तति' इति प्रख्यातः। एतादृशं बहुलप्रशस्तम् एतत् 'परमार्थो' नाम भारतप्रचारकेण ~557-569 A.D. समये चैनाभाषायाः अनुवादं कृत्वा प्रचारितम्। तस्मादेव बहुभिः भाष्यैः

अलंकृत: सांख्यकारिका ग्रन्थ:। तथापि तत्कर्ता अग्राह्येति विचारकर:। From Buddhist sources we hear of an older contemporary of Vasubandhu (320. A.D) Varshaganya, who wrote a Sashti tantra on the Sankhya, his pupil Vindhyavasa correceted his master's views in a set of 70 verses known as the golden seventy verses. It is natural to identify Vindhyavasa with Iswarakrishna and though the identity is unproven, it is improvable[55] क्रीस्तो: अनंतरं 320 वर्षस्त वसुबन्धो: ज्येष्ठ: समकालीन: आसीत् इति बौद्धग्रन्थेभ्य: ज्ञायते। सांख्यमुद्दिश्य एकं षष्टितंत्रं विरचितवान् वार्षगण्य:। स एवायम् तस्य शिष्य: विंध्यवास: स्वस्य गुरो: भावानां सवरणेन 70 श्लोकान् लिखितवान्। ईश्वरकृष्णं विंध्यवासेन सह एकेन दृष्टं स्वाभाविकमेव। तस्य निर्धारणाभावेरपि न तु असंभव: इति माक्स्मुल्लर ज्ञापयति। नाम ईश्वरकृष्ण: अयं विंध्यवास एवेति, अयं 320 अनंतर कालीन: इति ऊह्यते। क्रीस्त्वनंतरं 5 शताब्दीय: इति केचन, 280-360 कालीन:[56] इति अन्ये च निर्णीतवंत:। कालीपादभट्टा चार्य: ईश्वरकृष्णं क्रीस्त्वनंतर प्रथमशताब्दकालीन इत्युक्तवान्[57] 'ईश्वरकृष्णो नाम्ना कालिदासेन कृत: कारिका:[58] ईश्वरकृष्णनाम्ना कालिदास: करिका: विरचितवानिति स्वप्ने श्वरस्य भाव:। तत्तु समंजसम्। तस्य प्रमाणं नास्ति। Iswarakrishna's Sankhya Karika composed probably in the age immediately preceding the beginning of the Christian era is the earliest exposition of the Sankhya that we have[59] क्रीस्तो: कालात् किंचित्पूर्व विरचिता: सांख्यकारिका एव अस्माकं सांख्यविवरणग्रंथेषु प्रथम इति श्रीनिवास अय्यंगारु महोदयै: उक्तरीत्या, बहुभि: कारणै: ए.बी.धृव इत्यादि पंडिता: कारिकाया: काल: क्रीस्तो: पूर्वं प्रथमशताब्द: इति निर्णयंति। तस्मात् कालविप्लुतं नाममात्राविशिष्टं प्रख्यात कापिलसांख्य सिद्धांत: अस्माकं क्लुप्तरीत्या प्रसादितवंतम् ईश्वर कृष्णमुद्दिश्य एतस्मा दधिकविषय: न लभ्यते। स महान् तस्य रचनामूलेन सर्वतात्विकलोकस्य स्तुतिपात्र:, वंदनीय:, चिरस्मरणीय इत्युक्ते नातिशय:।

कारिकाया: भाष्यकर्तार:

एतासां सांख्यकारिकानां क्रीस्त्वनंतरं प्रथमशताब्दे माठर: वृत्ति

नाम्ना एकां व्याख्यां लिखितवान्। कारिकानां प्रथमविवरणग्रन्थोऽयमिति केषांचन भावः। तं संक्षिप्तं कृत्वा गौडपादः भाष्यं लिखितवानिति केषांचन भावः। तथापि वृत्तिः भाष्यात्, अनंतरमेवेति, भाष्यमेव प्रथम मिति, अनंतरमेव माठरस्य वृत्तिः इति राधाकृष्णस्याभिप्रायः। गौडपादः 'अल्पग्रंथं स्पष्टं पमाणसिद्धांतहेतुभिर्युक्तम्। शास्त्रं शिष्यहिताय समासतोऽहं प्रवक्ष्यामि॥' (सां.का.गौ.1) शिष्यस्य हितापेक्षया एतच्छास्त्रं अल्पस्पष्ट प्रमाण सिद्धांतहेतुभिः लिखामीति प्रथमं उक्तवान्। 'सांख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि। यत्रैताः सप्ततिरार्या भाष्यं चात्र गौडपाद कृतम्॥ (सां.का.गौ.69) संसारविमुक्तेः कारणं सांख्यं कपिलमुनिः लिखि तवान्, तस्मात् सप्ततिश्लोकाः, गौडपादभाष्यं च समाप्तमिति स्मृत्वा गौडपादः भाष्यं लिखितवान्। एतद् भाष्यमुत्तममिति Excellent commentry on the Sankhya Karika[60] माक्डोनेल् लिखितवान्। एतस्मात् सुप्रसिद्धः, माण्डूक्योपनिषदः कारिकाकारः, श्री शंकरभगवात्पादैः संस्तुतः अद्वैताचार्यः एकः गौडपादः आश्रिता। सः अयं च एक एवेति संदेहः समुत्पद्यते। तस्मात् Goudapada the eminent vedantist and teacher of Sankara's teacher Govinda, wrote a commentry to Iswara krishna's Sankhya[61] शंकरस्य गुरोः गोविंदस्य गुरुः गौडपादो नाम प्रख्यात वेदांती ईश्वरकृष्णस्य सांख्यस्य भाष्यं रचितवानिति रोयर् लिखि तवान्। इमं वषियमेव विमर्शन् Goudapada wrote a commentary on the karika, wether this commentator is the same as the author of the Karika on the Mandukyopanishad cannot be decided in view of the divergence cf thought between the two works[62] कारिकानां गौडपादः एकं भाष्यं विरचितवान्। माण्डूक्योपनिषदः कारि काकर्ता अयमेवेति प्रतिपादनं कष्टसाध्यम्। तयोःद्वयोः ग्रंथयोः भाववैरुध्य मस्तीति राधाकृष्णपंडितस्य अभिप्रायः। प्रख्यातः अद्वैताचार्यः सांख्यग्रंथस्य अतिक्लुप्ततया व्याख्यां लिखितवानिति, पुनः माठरमनुसृत्य लिखतवानिति च उक्तं चेत्, तत्सर्वमसत्यमिति केषां पंडितानामभिप्रायः। विरुद्धभावबोध कानां कारिकानां अद्वैती विवरणं लिखिष्यति वा? इति संशयः उत्पद्यते। तथपि अल्पग्रंथलेखनं न तु कारणम्। पंडिताः सदा उद्ग्रंथानेव लिखि ष्यंति इति वाक्यम् अनुभवदूरम्। अद्वैती गौडपादः व्यत्यस्ताभिप्रायान् प्रतिपादयन् सांख्यस्य व्याख्यां लिखितवान् इत्यत्रापि संशयः नास्ति। व्या

ख्यातारः स्वप्रत्येकभावान् अविहायैव विशालबुद्ध्या परसिद्धांतग्रहणं करिष्यंति इति ज्ञातव्यम्। तस्य उदाहरणं वाचस्पतिमिश्र एव। सः वैशेषिकस्य, इतर दर्शनपंचकस्यापि निष्पक्षपातदृष्ट्या भाष्यानि लिखितवा निति विदितमेव। तथैव गौडपादोऽपि सांख्याकारिकाभाष्यं निर्मितवानिति वक्तुं शक्यते। एतस्मादन्यस्यमधिकस्य कारणस्यादृश्यत्वात् अयं विषयः अनिश्चय एवेति भावनीयः। तस्मात् एषः क्रीस्त्वनंतरं 200 वर्षकालीनः इति, 400 वर्षकालीन इति, 700 वर्षकालीन इति च प्रतिपादनमयुक्तम्।

वाचस्पतिमिश्रः अपि तत्वकौमुीद नाम्ना कारिकानां समीचीनं भाष्यं लिखितवान्। कारिकापठनं सामान्यतः वाचस्पतीय व्याख्यया एव कुर्वन्ति। तस्मात् सुप्रशस्तमित्यत्र नास्ति संदेहः। नारायणो नाम पंडितः वाचस्पति व्याख्ययाः 'चंद्रिका' इति टीकां लिखितवान्। सांख्यकारिकानां 'जयमंगला' इति व्याख्या वर्तते। अस्य कर्ता श्री शंकराः एवेति केषांचन भावः। वात्सायनस्य कामशास्त्रस्य 'जयमंगलां' इति व्याख्यायाः लेखकः शंकरार्यः लिखितवानिति अन्येषां भावः।

सांख्यग्रंथाः - षष्टितंत्रम्

सांख्यदर्शनस्य सांख्यकारिका तंत्रात् इतरे ग्रंथाः श्रूयंते। तानुद्दिश्य किंचित् परिशीलयामः। संख्यकारिकायाः पूर्वग्रन्थेषु उत्कृष्टं षष्ठितंत्रम्। 'सप्तत्यांकिल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्ठितंत्रस्य' (सां.का.70) इति कारिकाग्रन्थे सूचितं षष्ठितंत्रमुद्दिश्य किंचित् विचारयामः। षष्ठितंत्रे 'आख्यायिका विरहिताः परवादविवर्जिताश्चापि'(सां.का.70) इति कारिका कारेणोक्तरीत्या आख्यायिकानि, परवादखंडनानि च विहाय सप्तति लिखितमिति विदितम्। एतत् षष्ठितंत्रंमिति एकस्य ग्रन्थस्य नाम नवेति विषयः अनिर्धारितः। सांख्ये षष्ठिविषयाः सन्तीति, षष्ठितंत्रमित्युच्यते इति वदंति। 'षष्टितंत्रम्' मंडलद्वयात्मकग्रंथः इति, तस्मिन् 32 प्रकृतयः, 28 विकृतयश्च चर्चिताः इति 'अहिर्बुध्न्यसंहिता'[63] ज्ञापयति। जैनग्रंथाननुसृत्य दृष्टश्चेत्, षष्ठितसहस्रश्लोकात्मकः ग्रंथः इति अभिप्रायः। पद्यरूपेण एकः, गद्यरूपेण एकश्च षष्ठितंत्रग्रंथद्वयमासीदिति अन्येषामभिप्रायः।[63] षष्ठितंत्रस्य कर्ता पंचशिखो वा? वार्षगण्यो वा? इति मीमांसा वर्तते। 'पंचशिखेन मुनिना बहुधा कृतं तंत्रम्। षष्ठितंत्राख्यं षष्ठिखंडं कृतमिति॥ तत्रैव हि षष्ठिरर्था व्याख्याताः।'[63] इति वाक्यानुसारेण 'षष्ठितंत्रम्'

षष्टिखंडात्मक: ग्रंथ: इति, तस्य कर्ता पंचशिख: इति, तस्मिन् षष्टि विषया: चर्चिता: इति विदितं भवति। तथापि 'कपिलमहर्षिप्रणीत षष्टि तंत्राख्यस्मृते:'(वे.सू.2-1-1) इति भास्कराचार्येण उक्तत्वात्, इतरकारणा नामाधारेण च तस्य कर्ता सांख्यदर्शनाचार्य: कपिल मुनिरेवेति उदयवीर शर्मण: सिद्धांत:(वे.सू.2.1.1)। कालीपादभट्टाचार्योऽपि तमेवाङ.गीकृत्य, तं प्रथमं षष्टितंत्र ग्रंथं पंचशिखाचार्य: स्वस्य षष्टितंत्रे विस्तारितवान् इति मन्यते(सां.का.26)। एतयो: द्वयो: अभिप्रायप्रकारेण कपिलप्रोक्तं षष्टितंत्रं, पंचशिख कृत षष्टितंत्रमिति ग्रंथद्वयमासीदिति ऊह्यते। तथापि षष्टितंत्रं 60 भागात्मकग्रंथ: इति, तस्मिन् 60 विषया: चर्चिता: इति, तस्मादेव षष्टितंत्रमिति सिद्धमिति, तस्य कर्ता पंचशिखाचार्य एवेति हिरियन्नपंडित: प्रतिपादितवान्।[64] इदानीं षष्टितंत्रस्यालभ्यत्वात् तस्य कर्तु:विषये, तस्मिन् विषये च निर्धारणं न कृतम्।

सांख्यप्रवचनसूत्रम्

सांख्यसिद्धांते अस्माकमुपलभ्यमानेषु ग्रन्थेषु प्रधानानि सांख्य सूत्राणि। अस्य नामांतरं सांख्यवचनसूत्रमिति। 'श्रुत्यविरोधिनीरुपपत्ति: षड ध्यायीरूपेण विवेकशास्त्रेण कपिलमूर्ति: भगवान् उपदिदेश' श्रुत्यविरोधं, षडध्यायात्मकं ग्रंथविवेकशास्त्रमेतत् कपिलभगवानुपदिष्टवान् इति विज्ञान भिक्षुनोक्तरीत्या षडध्यायत्मक: अयं ग्रंथ:। प्रथमाध्याये 164 सूत्राणि सन्ति। द्वितीयाध्याये 47 सूत्राणि, तृतीयाध्याये 84 सूत्राणि, चतुर्थाध्याये 32 सूत्राणि, पंचमाध्याये 129 सूत्राणि, अंतिमे षडध्याये 70 सूत्राणि च सन्ति। अस्मिन् ग्रंथे सर्वाणि सूत्राणि 526 संति। अस्य कर्ता कपिला चार्य एवेति विज्ञानभिक्षुना उक्त्या 'कर्दमाद्देवाहूत्यमभिजातस्य सेश्वरसांख्य वादिन: कपिलस्योपदेशी सूत्राणि'(सां.सू) कर्दमदेवहूतयो: पुत्रस्य सेश्वर सांख्यवादिन: कपिलस्य उपदेशसूत्राणीति मेधाकारशास्त्री लिखति। तथापि There is no evidence to show that Sankhya pravachana sutra and Tatwa samasa generally attributed to Kapila were composed by him.[65] साधारणत: सांख्यप्रवचनसूत्राणां, तत्वसमासस्य च कपिलस्य कर्तृत्वमापादितुं आधारा: न सन्तीति राधाकृष्णस्य अभिप्राय:। किमर्थमित्युक्ते, सांख्यस्य ग्रन्थकर्तार:, गौडपाद, माठर, वाचस्पति इत्या दय: खंडनकर्तार: शंकरमाधवादयश्च सांख्यप्रवचनसूत्राणि उद्दिश्य किमपि

The word Sankhya was originally used in the sence of counting and it was then applied to the system of Kapila which enumerates the 25 prinicples[63] गणनमित्यर्थे एव सांख्यपदस्य प्रथम प्रयोगः इति, तत्र पंचविंशति तत्वानां गणनस्य कपिलसिद्धांतस्य अन्वयि तमिति गार्ब्, जाकोबि पंडिताभ्यामभिप्रायः। The term Sankhya is from the noun 'SANKHYA' number and also calculation, reasoning[64] संख्य इति सर्वनामपदात् सांख्यपदमुत्पन्नमिति तस्य गणनं विचारण मिति स्यादिति जान्डेविस् पंडितस्याभिप्रायः। महाभारते 'सांख्यं प्रकुर्वते चैव प्रकृतिं च प्रचक्षते। तत्वानि च चतुर्विंशत्तेन सांख्यं प्रकीर्तितम्॥ (12.341) संख्यारूपविचारणं कुर्वन् प्रकृतेः चतुर्विंशतितत्वानां चर्चितत्वा सांख्यमिति उक्तम्। अस्य सांख्यस्य सामान्यतः ज्ञानमिति, चतुर्विंशतितत परिज्ञानमिति, अर्थद्वयं भारतमनुसृत्य वर्तते। विज्ञानभिक्षुः द्वयोः अन्व कृतवान्। एतयोः द्वयोः भावयोः कं प्रतिपादनीयमिति निशिचतुं कष्टमि चतुर्विंशति तत्वानि परिशील्य, अतत्वानीति परित्यज्य, पंचविंशतितमस् तत्वस्य पुरुषस्य स्वीकरणमेवास्य श्लोकस्य तात्पर्यम्। प्रकृतिपुरुषयो विचक्षणाज्ञानं बोधयन् प्रकृतितंत्रस्य वर्जनं सांख्यदर्शनस्योपदेशो भवति तस्मात्कारणात् It is not unlikely that this final abandonment (प संख्यान) gave it's name to the system[65] परिसंख्यानमिति परित्यागा अस्य दर्शनस्य सांख्यमिति नाम सिद्धमिति एकः भावः। सांख्यानां प संख्यानि साधनानि सूचयन् एवमेव जाकोबि पंडितोऽपि उक्तवान्।

It is also suggested that the system derived it's nan from it's first founder Sankha, though there is little evidence f this[66] प्रथमस्थापकाचार्यस्य सांख्यस्य नाम्नः अनुसारेण अस्य सांख्यमि नाम सिद्धमिति वदन्ति। किंचिदपि तस्य प्रमाणाभावात्, 'षड्दर्शन ग

23. Dr. S.S. Suyanarayana Sastry, Sankhya Karika
24. Dr. S. Radha Krishnan : Indian Philosophy, Vol.2, P.249
25. Swami Vivekananda : The Complete Works, Vol.2, P.443, Vol.5, P. 222
26. Dr.Har Datta Sharma : Sankhya Karika, P.4
27. J.N. Mukharjee : Sankhya P.1
28. Swami Vivekananda : The complete Works, Vol.2, P.438
29. Dr. A.A. Macdonell : A History of Sanskrit Literature, P.385
30. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.2
31. Dr. A.A. Macdonell : India's Past
32. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.2
33. J.N. Mukharjee : Sankhya
34. Dr. S.S. Suryanarayana Sastri : Sankhya Karika
35. Malladi Suryanarayana Shastri : Samskruta Vacmaya Charitra, Vol.2
36. Prof. S. Das Gupta : The History of Indian Philosophy, Dr. S.S. Sastry: Sankhya Karika
37. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.3
38. Dr. Har Datta Sharma : Sankhya Karika, P.4
39. Dr. Jacobe, Har Datta Sharma : Sankhya Karika, P.4
40. F. Max Muller : The Six Systems of Indian Philosophy, P.1, 40, IX
41. Prof. S. Das Gupta : The History of Indian Philosophy, Dr. S.S. Sastry : Sankhya Karika
42. Dr. Nandalal Sinha : The Sutras of Goutama
43. Dr. S.S. Suryanarayana Sastry : Sankhya Karika
44. J.N. Mukharjee : Sankhya
45. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.251
46. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.4
47. Dr. S. S. Surynarayana Sastry : Sankhya Karika
48. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.4
49. Dr. S.S. Suryanarayana Sastry : Sankhya Karika
50. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.4
51. Kalyana Kalpataru : 1936
52. F. Max Muller : The Six Systems of Indian Philosophy, P.XVII
53. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.770, 28
54. J.N. Mukharjee : Sankhya
55. Dr. V.V. Sovani : A Critical Study of the Sankhya System,
56. Mahabharata : Shanti, 13, 218
57. Dr. S.S. Suryanarayana Shastri : Sankhya Karika
58. Dr. V.V. Sovani : A Critical Study of the Sankhya System
59. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.249

60. Dr. Har Datta Sharma : Sankhya Karika, P.2
61. Dr. S.S. Suryanarayana Shastri : Sankhya Karika
62. J.N. Mukharjee : Sankhya
63. Dr. Har Datta Sharma : Sankhya, P.2
64. Dr. John Davis : Sankhya Karika
65. S.S. Suryanarayana Sastri : Sankhya Karika
66. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.249
67. Sri Sankara Bhagavatpada : Vishnu Sahasramana Stotra, 70
68. Dr. A.B. Dhruva : S.S.S. Sastry : Sankhya Karika
69. Sri Madhavacharya : Sarva Darsana Sangraha
70. Pandit Gopadev : Vaiseshika Darsanam (Telugu)
71. Dr. S. Radhakrishnan : Indian Philosophy, Vol.1, P.18
72. Swami Vivekananda : The Complete Works, Vol.3, P.458.

23. Dr. S.S. Suyanarayana Sastry, Sankhya Karika
24. Dr. S. Radha Krishnan : Indian Philosophy, Vol.2, P.249
25. Swami Vivekananda : The Complete Works, Vol.2, P.443, Vol.5, P. 222
26. Dr.Har Datta Sharma : Sankhya Karika, P.4
27. J.N. Mukharjee : Sankhya P.1
28. Swami Vivekananda : The complete Works, Vol.2, P.438
29. Dr. A.A. Macdonell : A History of Sanskrit Literature, P.385
30. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.2
31. Dr. A.A. Macdonell : India's Past
32. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.2
33. J.N. Mukharjee : Sankhya
34. Dr. S.S. Suryanarayana Sastri : Sankhya Karika
35. Malladi Suryanarayana Shastri : Samskruta Vacmaya Charitra, Vol.2
36. Prof. S. Das Gupta : The History of Indian Philosophy, Dr. S.S. Sastry: Sankhya Karika
37. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.3
38. Dr. Har Datta Sharma : Sankhya Karika, P.4
39. Dr. Jacobe, Har Datta Sharma : Sankhya Karika, P.4
40. F. Max Muller : The Six Systems of Indian Philosophy, P.1, 40, IX
41. Prof. S. Das Gupta : The History of Indian Philosophy, Dr. S.S. Sastry : Sankhya Karika
42. Dr. Nandalal Sinha : The Sutras of Goutama
43. Dr. S.S. Suryanarayana Sastry : Sankhya Karika
44. J.N. Mukharjee : Sankhya
45. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.251
46. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.4
47. Dr. S. S. Surynarayana Sastry : Sankhya Karika
48. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.4
49. Dr. S.S. Suryanarayana Sastry : Sankhya Karika
50. Dr. V.V. Sovani : A Critical Study of the Sankhya System, P.4
51. Kalyana Kalpataru : 1936
52. F. Max Muller : The Six Systems of Indian Philosophy, P.XVII
53. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.770, 28
54. J.N. Mukharjee : Sankhya
55. Dr. V.V. Sovani : A Critical Study of the Sankhya System,
56. Mahabharata : Shanti, 13, 218
57. Dr. S.S. Suryanarayana Shastri : Sankhya Karika
58. Dr. V.V. Sovani : A Critical Study of the Sankhya System
59. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.249

60. Dr. Har Datta Sharma : Sankhya Karika, P.2
61. Dr. S.S. Suryanarayana Shastri : Sankhya Karika
62. J.N. Mukharjee : Sankhya
63. Dr. Har Datta Sharma : Sankhya, P.2
64. Dr. John Davis : Sankhya Karika
65. S.S. Suryanarayana Sastri : Sankhya Karika
66. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.249
67. Sri Sankara Bhagavatpada : Vishnu Sahasramana Stotra, 70
68. Dr. A.B. Dhruva : S.S.S. Sastry : Sankhya Karika
69. Sri Madhavacharya : Sarva Darsana Sangraha
70. Pandit Gopadev : Vaiseshika Darsanam (Telugu)
71. Dr. S. Radhakrishnan : Indian Philosophy, Vol.1, P.18
72. Swami Vivekananda : The Complete Works, Vol.3, P.458.

श्रीमदीश्वरकृष्णप्रणीता:

सांख्यकारिका:

दु:खत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकांतात्यंततोऽभावात्॥ 1
दृष्टवदानुश्रविक: सह्यविशुद्धिक्षयातिशययुक्त:।
तद्विपरीत: श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥ 2
मूलप्रकृतिरविकृतिर्महदाद्या: प्रकृतिविकृतय: सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृति: पुरुष:॥ 3
दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धि: प्रमाणाद्धि॥ 4
प्रतिविषयोऽध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिंगलिंगपूर्वकं आप्तश्रुतिराप्तवचनं च॥ 5
सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानात्।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्॥ 6
अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च॥ 7
सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धि:।
महदादितत्त्वकार्यं प्रकृतिविरूपं सरूपं च॥ 8
असदकरणादुपादानग्रहणात् सर्वसंभवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥ 9
हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगम्।
सावयवं परतंत्रं व्यक्तं विपरीतमव्यक्तम्॥ 10
त्रिगुणमविवेकि विषय: सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥ 11
प्रीत्यप्रीतिविषादात्मका: प्रकाशप्रवृत्तिनियमार्था:।
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा:॥ 12
सत्वं लघु प्रकाशकमिष्टमुपष्टंभकं चलं च रज:।
गुरुवरणकमेव तम: प्रदीपवच्चार्थतो वृत्ति:॥ 13
अविवेक्यादि: सिद्ध: त्रैगुण्यात्तद्विपर्ययाभावात्।

कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम्॥ 14
भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागात् अविभागाद्वैश्वरूप्यस्य॥ 15
कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च।
परिणामतः सलिलवत् प्रति प्रतिगुणाश्रयविशेषात्॥ 16
संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च॥ 17
जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥ 18
तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च॥ 19
तस्मात्तत्संयोगादचेतनं चेतनावदिव लिंगं।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः॥ 20
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पंग्वंधवदुभयोरपि संयोगस्तत्कृतः सर्गः॥ 21
प्रकृतेर्महान् ततोऽहंकारः तस्माद्गुणश्च षोडशकः।
तस्मादपि षोडशकात् पंचभ्यः पंचभूतानि॥ 22
अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग एश्वर्यम्।
सात्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्॥ 23
अभिमानोऽहंकारस्तस्माद्द्विविधः प्रवर्तते सर्गः।
एकादशकश्च गणस्तन्मात्रं पंचकश्चैव॥ 24
सात्विक एकादशकः प्रवर्तते वैकृतादहंकारात्।
भूतादेस्तन्मात्रः स तामसः तैजसादुभयम्॥ 25
बुद्धीन्द्रियाणि चक्षुः श्रोतघ्राणरसनस्पर्शनकानि।
वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः॥ 26
उभयात्मकमत्र मनः संकल्पकमिन्द्रियं च साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च॥ 27
शब्दादिषु पंचानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानंदाश्च पंचानाम्॥ 28
स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पंच॥ 29

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः॥ 30
स्वां स्वां प्रतिपद्यंते परस्पराकूतहेतुकां वृत्तिम्।
पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणम्॥ 31
करणं त्रयोदशविधं तदाहरण धारणप्रकाशकरम्।
कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च॥ 32
अंतःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।
सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणम्॥ 33
बुद्धीन्द्रियाणि तेषां पंच विशेषाविशेषविषयाणि।
वाग्भवति शब्दविषया शेषाणि तु पंचविषयाणि॥ 34
सांतःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि॥ 35
एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति॥ 36
सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः।
सैव च विशिनष्टि पुनः प्रधानपुरुषांतरं सूक्ष्मम्॥ 37
तन्मात्राण्यविशेषाः तेभ्यो भूतानि पंच पंचभ्यः।
एते स्मृता विशेषाः शांता घोराश्च मूढाश्च॥ 38
सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते॥ 39
पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिंगम्॥ 40
चित्रं यथाश्रयमृते स्थाण्वादिभ्यो यथा विना छाया।
तद्वद्विनाऽविशेषैः न तिष्ठति निराश्रयं लिंगम्॥ 41
पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसंगेन।
प्रकृतेर्विभुत्वयोगात् नटवद्व्यवतिष्ठते लिंगम्॥ 42
सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः॥ 43
धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बंधः॥ 44
वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात्।

ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः॥ 45
एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः।
गुणवैषम्यविमर्देन तस्य भेदास्तु पंचाशत्॥ 46
पंच विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्।
अष्टविंशति भेदा तुष्टिर्नवधाऽष्टधा सिद्धिः॥ 47
भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः।
तामिस्रोऽष्टादशधा तथा भवत्यंधतामिस्रः॥ 48
एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा।
सप्तदशवधा बुद्धेर्विपर्ययात् तुष्टिसिद्धीनाम्॥ 49
आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्या विषयोपरमात् पंच नवतुष्टयोऽभिहिताः॥ 50
ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोंकुशस्त्रिविधः॥ 51
न विना भावैर्लिंगं न लिंगेन भावनिर्वृत्तिः।
लिंगाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः॥ 52
अष्टविकल्पो दैवस्तैर्यग्योनश्च पंचधा भवति।
मानुषश्चैकविधः समासतोऽयं त्रिधा सर्गः॥ 53
ऊर्ध्वं सत्वविशालस्तमो विशालश्च मूलतः सर्गः।
मध्ये रजो विशालो ब्रह्मादिस्तंबपर्यन्तः॥ 54
तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।
लिंगस्याविनिवृत्तेः तस्माद् दुःखं स्वभावेन॥ 55
इत्येष प्रकृतिकृतौ महदादिविशेषभूतपर्यन्तः।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः॥ 56
वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥ 57
औत्सुक्यनिवृत्यर्थं यथा क्रियासु प्रवर्तते लोकः।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्॥ 58
रंगस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥ 59
नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति॥ 60

प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति।
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य॥ 61
तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥ 62
रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण॥ 63
एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्॥ 64
तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः॥ 65
रंगस्थ इत्युपेक्षक एको दृष्टाहमित्युपरमत्येका।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य॥ 66
सम्यक् ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीरः॥ 67
प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति॥ 68
पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम्।
स्थित्युत्पत्तिप्रळयाश्चिंत्यन्ते यत्र भूतानाम्॥ 69
एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकंपया प्रददौ।
आसुरिरपि पंचशिखाय तेन च बहुधा कृतं तंत्रम्॥ 70
शिष्यपरंपरयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः।
संक्षिप्तमार्यमतिना सम्यक् विज्ञाय सिद्धांतम्॥ 71
सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितंत्रस्य।
आख्यायिका विरहिताः परवादिविवर्जिताश्चापि॥ 72

सांख्यतत्वमीमांसा

सृष्टिविषयः

'Philosophy is the self comprehension of reality'

Mukharjee

'Philosophy carries us to the gates of the promised land'

Radhakrishnan

सत्यज्ञानापरोक्षत्वमेव तत्वशास्त्रम्। मोक्षसन्निधेः साधनं तत्व शास्त्रम्। 'प्रकृतिर्वियोगो मोक्षः' इति हरिभद्रस्य सूत्रानुसारेण प्रकृते वियोग एव मोक्षः भवति। प्रकृतिः प्रत्यक्षेन नित्यानुभूतदुःखमूलेन च वर्तते। तस्मात् प्रत्यक्षानुभवगोचरस्य तस्य दुःखस्य निर्मूलनार्थं तत्कारणस्वरूपं सर्वप्रकृतिं ज्ञात्वा, प्रयत्नतः तन्निरासः कृत्वा, 'केवल भावान्मोक्षः'(सां. का.गौ.68) केवल भावरूपमोक्ष सर्वेऽपि प्राप्तुमेव सर्वमुमुक्षुलोके 'अनु कंपेन'(सां.का.70) 'सत्कारूण्येन'(सां.का.गौ.1) भगवता श्रीकपिलाचार्येण अस्माकं प्रसादितम् उत्तमं तत्वशास्त्रराजं सांख्यम्। पूर्ववचनानु सारेण 'प्रधीयते इति प्रधानः'(यो.सू.भा.2.18) इति व्युत्पत्तिरीत्या सर्व कार्याणा माधारेण स्थित्वा, 'अविद्या ज्ञानविरोधत्वात्'(तत्वत्रय.48) ज्ञानस्य विरोध त्वात् अविद्या भूत्वा, 'ज्ञानेन चापवर्गः'(सां.का.44) मोक्ष प्रधानं ज्ञानं तिरस्कुर्वन्, 'अत्यन्तदुःखनिवृत्या कृतकृत्यता'(सां.सू.65) अत्यन्तनिवृत्तेः कृतकृत्यत्वमप्राप्तस्सन् मुमुक्षुणामवरोधो भवति प्रकृतिः। एवं अंत्यकाले संप्राप्तस्य दुःखनिवृत्तिरूपकैवल्यस्थितेः प्रकृतिजन्यदुःख एव कारणमिति कारिकाग्रंथः 'दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।'(सां.का.1) त्रिविधरूपदुःखस्य सत्वात् तन्निवारणोपायविचारणमावश्यकमिति, 'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः'(सां.सू.1.1) दुःखत्रयनिवृत्तिरेव अत्य न्तपुरुषार्थः इति सांख्यप्रवचनसूत्रग्रंथोऽपि आरब्धः। तस्मात् सूक्ष्मविषय ग्रहणस्य प्रारंभः स्थूलात्, अपरोक्षज्ञानस्य प्रत्यक्षात् इति क्रमेण अप्र त्यक्षभूतस्य अलौकिकमुक्तेः साधनार्थं, नित्यप्रत्यक्षानुभूतस्य दुःखस्य कार

णस्य निवारणार्थं प्रयत्नं बहुशंसनीयम्। तस्मात् दुःखकारणस्य सर्गस त्पत्तिः कथमिति रहस्यं प्रथमस्य मुख्यत्वात् तद्विचारयामः।

'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पंग्वंधवदुभयोर संयोगस्तत्कृतः सर्गः॥'(सां.का.21) प्रकृतिपुरुषयोरैक्यं दर्शनार्थमिति, म दादिकार्यभूतपर्यंतं पुरुषस्योपभोगार्थमिति, 'प्रधानस्यापि पुरुषेण संयो कैवल्यार्थं' (सां.का.गौ.21) प्रधानपुरुषयोः संयोगः कैवल्यार्थमिति स्प यन्, सः संयोगः पंग्वंधवत् इति सांख्यशास्त्रस्य तात्पर्यमुक्तम्। त संयोगस्य फलितमेव सर्ग नाम सृष्टिरिति, सृष्टेः कारणं सुव्यक्तं भवि 'रागविरागयोर्योगः सृष्टिः' (सां.सू.2.9) रागरूपप्रकृति। विरागरूपुरुषय संयोग एव सृष्टिरिति सांख्यप्रवचनसूत्रमपि ज्ञापयति। तस्मात् सर्वः सृ रपि प्रथमतः पुरुषस्य भोगार्थं, क्रमेण कैवल्यार्थं चेति भावः। पुनः प्र तिरूपसृष्टिः 'नानाविधायैरुपायैरुपकारिण्यनुपकारिणः पुंसः। गुणवत्यगुण सतस्तस्यार्थमपार्थकं चरति॥'(सां.का.60) पुरुषः अवगुणो भूत्वा, अ कारिश्च भूत्वा, विद्यमानेपि, स्वार्थाभावेऽपि, गुणवतित्वात्, उपकारि त्वाच्च तस्योपयोगो भवति। पुनः प्रकृतिः 'इत्येष प्रकृतिकृतौ महदा विशेषभूतपर्यंतः प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः।'(सां.क 56) महदादिविशेषभूतपर्यंतं प्रकृतिकार्यमेतत्सर्वमपि पुरुषस्य मोक्षार्थं प्र भवति। एवं प्रकृतिः परार्थप्रवृत्तित्वेऽपि स्वार्थमिव गोचरति। कथमित्यु 'प्रधानसृष्टिः परार्थं स्वतोप्यभोक्तृत्वादुष्टकुंकुमवहनवत्'(सां.सू.3.58) स्व अभोक्तृत्वदपि कुंकुमवाहक उष्ट्र इव प्रधानं परार्थं सृष्टिः इति ज्ञापयि अस्य वाकयस्यानुसारेण दृष्टः चेत्? 'सुकुमारतरप्रकृतिः'(सां.का.61) पु षस्य भोगर्थमेव सृजतीति विदितं भवति।

पुरुषार्थं द्विविधं, 'दर्शनार्थं कैवल्यार्थं'(सां.का.21) इति, 'पु स्य प्रधानेन सहसंयोगो दर्शनार्थं'(सां.का.गौ.21) प्रधानेन पुरुषस्य संयो दर्शनार्थमिति, 'प्रकृतिं महदादिकार्यं भूतादिपर्यंतं पुरुषः पश्यति'(सां.क गौ. 21) महदादिकार्यभूतपर्यंतं प्रकृतिं पुरुषः पश्यतीति, 'प्रधानस्या पुरुषेण संयोगः कैवल्यार्थमिति'(सा.का.गौ.21) प्रधानः पुरुषेण संयो कैवल्यार्थमिति पुरुषार्थमेव प्रकृतिः प्रवर्तते इति पूर्वमेवोक्तम्। तत्र प्र मतः दर्शनार्थप्रसंगः मुख्यो भूत्वा 'शब्दाद्युपलब्धिलक्षणः'(सां.का.गौ.4 शब्दाद्यनुभव रूपेण प्रकाशते। पुरुषस्य सा दर्शनापेक्षा 'अनादितवा सर्गस्य'(सां.का.गौ.52) सर्गस्यानादित्वात् 'पूर्वपूर्व संस्कारादृष्टकारितत्वा

(सां.का.गौ.52) पूर्वपूर्व संस्कारजन्यं अदृष्टकारणेन संप्राप्तत्वात् प्रकृ
'सत्वरजस्तमसां साम्यावस्था प्रधानं'(सां.का.गौ.16) इति रीत्या त्रिगु
साम्यावस्थारूपेण विद्यमानेऽपि, 'स्वभावात् कृतगुणपरिणामेनेति'(सां.क
गौ.27) गुण परिणामेनेति स्वभावकृतेन एतन्नानात्वं सिद्ध्यति। तथा
व्यक्ताव्यक्तपुरुषाः इति तत्वत्रये 'सर्वकर्तृत्वात्.....प्रधानमेव कारणं। स
भावोप्यत्रैव लीनः। तस्मात्... कारणं, नापि स्वभाव इति तस्मात् प्रकृ
रेव कारणं'(सां.का. गौ.61) सर्वकर्तृत्वस्य सत्वात् प्रधानमेव कारणं
तु स्वभावः। अयं विषयः एव 'न प्रकृतेः कारणांतरमस्तीति'(सां.का.गौ
61) प्रकृतेः कारणांतरं नास्तीति निश्चितम्। तस्मात् अव्यक्तं नाम प्रकृति
'कारणमस्त्यव्यक्तं प्रवर्तते'(सां.का.16) इति कारणेन 'त्रिगुणतः स
दायाच्च परिणामतः सलिलवत्'(सां.का.16) त्रिगुणतः जलमिव परिणम
सृष्टेः कारणं भवति। तत् प्रति 'प्रतिगुणाश्रयविशेषात्'(सां.का.16) प्रति
णोपाधेः विशेषात् नानात्वं सृजति। पुनः 'मूलप्रकृतिरविकृतिः'(सां.का.3
'मूलप्रकृतिः प्रधानं'(सां.का.गौ.3) प्रधाननामकः प्रकृतिः कारणजन्यं का
न। तस्मात् सर्वकारणं च भूत्वा,'प्रकृतेर्महान्, ततोऽहंकारः, तस्माद्गुणश्
षोडशकः। तस्मादपि षोडशकात् पंचभ्यः पंचभूतानि।' (सां. का. 22
प्रकृतेः महन्नामकबुद्धिः, तस्मादहंकारः, तस्मात् पंचतन्मात्राणि, एकाद
न्द्रियाणि इति षोडशकं जन्यते। अस्मिन् षोडशके पंचतन्मात्रेभ्यः, पं
भूतानि उत्पन्नानि। प्रथमं प्रकृतेः 'महान् बुद्धिः, आसुरी, मतिः, ख्याति
ज्ञानम् इति प्रज्ञापर्यायैरुत्पद्यते'(सां.का.गौ.22) इति रीत्या विविधनाममभि
बुद्धिः जन्यते। प्रधाने साम्यावस्थायां अव्यक्तगुणत्रयस्य विषमपरिणामत्वा
बुद्ध्यादिसृष्टेः बुद्धौ प्रथमं 'योयमविवेक्यादिर्गुणः स त्रैगुण्यान्महदादौ'(स
का.गौ.14) अविवेकादिगुणाः त्रिगुणात्मकेषु महदादिषु अन्तः सत्वा
व्यक्ताः भूत्वा विराजन्ते। पुनः बुद्धिः 'अध्यवसायो बुद्धिः'(सां.सू.2.13
'धर्मो ज्ञानं विराग ऐश्वर्यं सात्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं'(सां.क
23) इति कारिकायाः अनुसरेण अध्यवसाय एव लक्षणरूपेण वर्तते
'यथा बीजे भविष्यद्वृत्तिकोंऽकुरस्तद्वदध्यवसायः'(सां.का.गौ.23) भविष
त्कालाङ्कुरः बीजे अन्तर्लीनतया यथा वर्तते तथा अध्यवसायः बुद्ध
वर्तते। धर्मज्ञानविरागऐश्वर्याणि तस्य सात्विकरूपाणि भवति
तद्विपरीताणि तामसिकानि। बुद्धिः धर्मज्ञानवैराग्यैश्वर्याणि सात्विकधर्मेण
तद्विपरीताणि अधर्माज्ञानरागानैश्वर्यैः तामसिकवृत्तिभिः सह एतानि अष

लक्षणानि सन्ति। पुनः बुद्धिः 'सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः'(सां.का.37) पुरुषस्य सर्वभोगदा इव वर्तते। 'ततोहंकारः'(सां.का. 22) बुद्धेः अहंकारः उद्भवति। स अहंकारः 'अभिमानोहंकारः'(सां.सू.2. 16), (सां.का.2.24) इति वचनानुसरेण अभिमानरूपेण वर्तते।

'तस्मात् द्विविधः प्रवर्तते सर्गः'(सां.का.24) तस्मात् द्विविधरूप सर्गः उत्पन्नं भवति। उत्पन्नद्वयं 'एकादशकश्च गुणस्तन्मात्रः पंचकश्चैव' (सां.का.24) 'षोडशके विद्यमानानि एकादशेन्द्रियाणि, पंचलक्षणोपेत'(सां. का.गौ.24) पंचतन्मात्राणि च जन्यन्ते। पुनः त्रिगुणभेदेन त्रिविधं स्यात्। कथमित्युक्ते? 'सात्विक एकादशकः प्रवर्तते वैकृतादहंकारात्। भूतादेस्त न्मात्रः स तामसः तैजसादुभयम्। (सां.सू.2.18,सां.का.25) सत्वगुणप्रधानात वैकृताहंकारात् एकादशकः, तामसिक भूतादेः तन्मात्रपंचकं, तैजसाहंक रात् उभयं च उत्पद्यते। गुणप्राधान्यतया अहंकारः त्रिविधं भूत्वा सत्व प्रधानेन वैकृतरूपेण, तमसः प्रधानेन भूतादिरूपेण, रजोगुणाधिक्यतय तैजसरूपेण च परिणम्य, तत्संबंधसृष्टीन् करोतीति पूर्वाचार्याणां वचनम (सां. का. गौ. 25)। वैकृतरूपएकादशके 'कर्मेंद्रियबुद्धींद्रियैरांतरमेकादशव (सां.सू.2.19) कर्मेंद्रियाणि, ज्ञानेंद्रियाणि मनश्च मिलित्व एकादशकं स्यात् तस्मिन् 'बुद्धींद्रियाणि चक्षुःश्रोत्रघ्राणरसनस्पर्शनकानि'(सां.का.26) श्रोः त्वक्चक्षुजिह्वाघ्राणाः इति धींद्रियपंचकं, 'वाक्पाणिपादपायूपस्थान् कर्मेंरि याण्याहुः'(सां.का.26) इति रीत्या कर्मेंद्रियपंचकं, 'उभयात्मकमत्र मनः (सां.का.27) द्विविधयोः इंद्रिययोः सामान्यस्य मनसः मेलनेन एकादशव भवति। तथैव भूतादिकार्याणि 'तन्मात्राण्यविशेषाः'(सां.का.38) अविशे तन्मात्रपंचकं शब्दस्पर्शरूपरसगंधरूपेण जन्यते। ते 'देवानामेते सुखलक्षण विषया दुःखमोहरहिताः'(सां.का.गौ.38) देवतागणविषयाः, शोकमोहशून्याः सुखदाः सविशेषाः इत्युच्यन्ते। पूर्वोक्त वैकृतिक भूतादिसृष्टिनां तैजसा कारः अत्यावश्यकः। कथमित्युक्ते? 'तैजसादुभयं'(सां.का.25) तैजसा उभयं सिद्ध्यतीति तात्पर्यम्। उभये एकादशगणः तन्मात्रपंचकं स्यात् तत्र सात्विकाहंकारः वैकृतिकः एकादशेंद्रियाणि जनयंति तैजासाहंका साहाय्येन। किमर्थमित्युक्ते? 'सात्विको निष्क्रियः स तैजसयुक्त इंद्रियोत्पत्त समर्थः' (सां.का.गौ.25) सात्विकः निष्क्रियः तैजसयुक्तेन इंद्रियोत्पत्ते समर्थो भवति। तथैव 'तथा तामसोऽहंकारो भूतादि संज्ञतः निष्क्रियत्वा तैजसेनाहंकारेण क्रियावतायुक्तस्तन्मात्राप्युप्तादयति'(सां.का.गौ.25) भूतां

नामक तामसाहंकारः तैजसाहंकारेण क्रियासमर्थवता तन्मात्राणि उत्पादयति। एवं प्रकारेण तैजसाहंकारः उभयात्मकेन प्रवर्तते। पुनः पंच तन्मात्रेभ्यः 'तेभ्यो भूतानि पंच पंचभ्यः'(सां.का.38) पंच भूतानि उत्पन्नानि। तान्येव 'पृथि व्यप्तेजो वाय्वाकाशसंज्ञानि'(सां.का.गौ.38) पृथिव्यप्तेजोवाय्वाकाशाः पंच भूतानि। अनेन प्रकारेण अहंकारात् द्विविध सृष्टिः भवति। 'महतोऽहं कारोऽहंकारात् पंचतन्मात्राण्युभयमिंद्रियं तन्मात्रेभ्यः स्थूलभूतानि'(सां.सू. 1.16) इति सांख्यसूत्रं सृष्टिक्रममुपदिशति।

शरीरोत्पत्तिः

'न विना भावैर्लिंगं न लिंगेन भावनिर्वृत्तिः। लिंगाख्यो भावाख्य स्तस्माद् द्विविधः प्रवर्तते सर्गः॥'(सां.का.52) भावाभावेन लिंगः, लिंगा भावेन भावव्याप्तिश्च न स्थास्यति। तस्मात् प्रथमपुरुषाधार भावलिंगरूप द्विविध सृष्टिः भवति। पूर्वोक्त वैकृतिकभूतादि द्विविध सृष्टिः सर्वसृष्टेः आधारो भवति। भावलिंगरूपद्विविधसृष्टिः पुरुषस्याधिष्ठानं भूत्वा, तस्य पुरुषार्थानामुपयुक्तं भवति। अत्र भावात् प्रत्ययरूपबुद्धिधरिति, लिंगः नाम तन्मात्रसर्गः इति च गौडपादस्य तात्पयम्। तन्मात्रसर्गः नाम लिंगं निर्व चनं कुर्वन् 'सूक्ष्मैः परमाणुभिः तन्मात्रैरुपचितं शरीरं त्रयोदशविधकरणोपेतं' (सां.का.गौ.42) परमाणुरूपतन्मात्राणां त्रयोदशकानि कारणानि सहकारणेन सन्तीति तस्य विवरणम्। तस्मात् चतुर्दशतत्वानीति उक्तवन्तः। अत्र लिंगः नाम सूक्ष्मशरीरमिति अन्वीयते। सः लिंगः भावरूपं बुद्धिं विहाय नास्तीति तस्यार्थः। तस्मात् 'पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यंतम्। संसरति निरुपभोगं भावैरधि वासितं लिंगं॥'(सां.का.40) पूर्वोत्पन्नं नाम 'यदा लोका अनुत्पन्नाः प्रधाना दिसर्गे तदा सूक्ष्मशरीरमुत्पन्नमिति'(सां.का. गौ.40) विश्वस्योत्पत्तेः पूर्वं प्रधानात् आदिसर्गकाले सूक्ष्मशरीरमुत्पद्यते इति अर्थः। तत् तिर्यग्देवमानुषस्थानेषु 'सूक्ष्मत्वात्' संयुक्ताभावेन संचरति। तस्य भावाः संति। धर्मादयः एव भावाः। तान् उपलभ्य संसृतिप्रवाहे संचरति। तस्मात् लिंगः अतिसूक्ष्मतया 'प्रलयकाले महदादिसूक्ष्मपर्यंतं कर णोपेतं प्रधाने लीयते'(सां.का.गौ.40) बुद्ध्यहंकार तन्मात्रैः कारणैश्च लिंगः प्रलयकाले प्रधाने लीयते। असंसरणकाले प्रधाने एव स्थित्वा 'पुनः सर्गकाले संसरति' पुनः सर्गकालस्य संसरितत्वात् 'तस्मात् लिंगं

सूक्ष्मं' (सां.का.गौ.40) लिंगं सूक्ष्ममित्युच्यते। तत् 'यावन्न ज्ञानमुत्पद्यते तावत्संसरति'(सां.का.गौ.40) ज्ञानस्य प्राप्तेः पर्यंतं स्वेच्छया विश्वं सर्वत्र संचरति। तथापि स्थूलशरीराभावेन सुखदुःखभोगाः न सिद्ध्यंति। तस्मात् मातृपितृजस्थूलशरीरप्राप्तानंतरमेव भोगसमर्थं भवति लिंगम्। पुनः 'चित्रं यथाश्रयमृते स्थाण्वादिभ्यो यथा विना छाया। तद्वद्विना विशेषैः न तिष्ठति निराश्रयं लिंगं॥'(सां.का.41) आश्रयाभावेन चित्रं यथा न स्थास्यति, स्थाण्वाद्यपेक्षाभावेन छाया यथा न तिष्ठति, तथा अविशेषैः निराश्रयं लिंगं न तिष्ठति। उक्तचर्चायां लिंगलिंगशरीरिणोः विभेदः सूचितः। मह दाद्यहंकार एकादशेंद्रियकं लिंगशरीरं लिंगस्याश्रयो भवति। 'लिंगं सूक्ष्मैः परमाणुभिस्तन्मात्रैरुपचितं शरीरं त्रयो दशविधकरणोपेत मानुषदेवतिर्यग्योनिषु व्यवतिष्ठते'(सां.का.गौ.42) तन्मात्रैः परमाणुभिः निर्मितं, त्रयोदशकरणोपेतं, देवनरतिर्यगादिशरीराणामनुवर्तते लिंग मिति निर्वचनम्।

पुनः लिंगं 'सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः'(सां.का.43) धर्मादयः भावाः सांसिद्धिक, प्राकृतिक वैकृतिक रूपैः स्थित्वा तैः ऐक्येन बीजांकुरन्यायेन अन्योन्याश्रयेन प्रवर्तते। लिंग भावाः त्रैविध्य भावानां 'तत्र सांसिद्धिका यथा भगवतः कपिलस्यादिसर्गे उत्पद्यमानस्य चत्वारो भावाः सहोत्पन्नाः-धर्मः ज्ञानं वैराग्यं ऐश्वर्यमिति' (सां.का.गौ.43) धर्मज्ञानवैराग्यैश्वर्याः सांसिद्धिकाः। सर्गकाले कपिलेन सह उत्पन्नाः। ब्रह्मपुत्रैः सनकादिभिः सह प्राकृतिकाः सहोत्पन्नाः। तथापि 'तेषामुत्पन्नकार्यकारणानां' कार्यकारणजन्यत्वात् प्राकृतिकाः इति उच्यन्ते। तस्मात् पूर्वजन्मकर्मफलहेतुकाः। वैकृतिकाः नाम गुर्वनुग्रहनिमित्तिकाः। गुरुबोधनाफलितेन जनिताः इत्यर्थः। ज्ञानात् वैराग्यं, तस्मात् धर्मः धर्मात् ऐश्वर्यं, च सिद्ध्यंति। आचार्यशरीरं वैकृतिकम् एते मानवसंबंधीकाः। इत्थं 'भावैरधिवासितं लिंगं संसरति'(सां.का.गौ.43) भावैः सह लिंगं नाम सूक्ष्मशरीरं संसरन् 'पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसंगेन। प्रकृतेर्वि भुत्वयोगात् नटवद्व्यवतिष्ठते लिंगं।'(सां.का.42) निमित्तनैमित्तिकरूपेण नाम 'धर्मादि यूर्ध्वगमनादि'(सां.का.गौ.42) रूपेण, 'पुरुषार्थः कर्तव्य इति प्रधानं प्रवर्तते'(सां.का.गौ.42) इति रीत्या पुरुषार्थसिद्धेः प्रधानस्य व्यव हरतित्वात् शक्तियोगे नट इव लिंगं व्यवहरति। पूर्वोक्तेन दर्शनकैवल्याभ्यां द्विविधपुरुषार्थाभ्यां धर्मादिप्रवृत्तिकारणेन, स्वर्गफलितार्थं लिंगं प्रवर्तते। 'यथा राजा स्वराष्ट्रे विभुत्वात् यद्यदिच्छति तत्तत् करोतीति तथा प्रकृतेः

सर्वत्र विभुत्वयोगात् निमित्तनैमित्तिकप्रसंगेन व्यवतिष्ठते पृथक् पृथक् देह धारणे लिंगस्य व्यवस्थां करोति'(सां.का.गौ.42) स्वराष्ट्रे सर्वाधिकारिः प्रभुः स्वेच्छानुसारेण यथा प्रवर्तते, तथा प्रकृतेः अधिकारे लिंगादिसर्वं कार्यकारणसंबंधेन प्रवर्तते। लिंगस्य पुनःपुनः देहधारणं प्रकृतिः निर्णयति। प्रकृत्यधीने लिंगं स्थूलदेहधारणं करोतीति तात्पर्यम्।

एतल्लिंगं, लिंगशरीरमीमांसा च अतिसूक्ष्मतया भाष्यकाराणां विविधाभिप्रायाणां कारणमभवत्। प्रतिपुरुषस्यापि एकं लिंगशरीरं सृष्ट्यादौ वर्तते इति वाचस्पतेः भावः। तथापि सांख्यसूत्राणामाधारेण 'सप्तदशैकं लिंगं'(सां.सू.3.9) बुद्धिर्विना अहंकारादितन्मात्रपर्यंतानि सप्तदशैकतत्वानि लिंगशरीरमिति विवृण्वन्, सृष्ट्यादौ समष्टिलिंगरूपमासीदिति, 'व्यष्टि भेदः कर्मविशेषात्'(सां.सू.3.10) कर्मतारतम्येन व्यक्तिभेदः सिद्धयतीति सूत्राणां व्याख्यानं लिखन्, 'यद्यपि सर्गादौ हिरण्यगर्भोपाधिरूपमेकमेव लिंगं' सृष्ट् यादौ हिरण्यगर्भरूपेण लिंगमेकमेवासीदिति 'तथापि तस्य पश्चाद्व्यक्तिभेदो व्यक्तिरूपेणांशतो नानात्वमपि भवति'(सां.सू.वि.3.10) इति विज्ञानभिक्षुः उक्तवान्। समष्टिरूपहिरण्यगर्भत्वं सांख्यसिद्धांतस्य विरुद्धमिति केषांचन भावः। महदहंकारमनोयिंद्रियदशकेन त्रयोदशकमिवास्ति लिंगमिति वाच स्पतेः भावः। उपरि त्रयोदशकं लिंगमिति, तत् तन्मात्रैः सह अष्टादशकेन लिंगशरीरं स्यादिति, लिंग लिंगशरीरमाश्रित्य वर्तते इति तस्य भावः। तथापि त्रयोदशकमेव लिंगशरीरमिति, तत् तन्मात्रेभ्यः अति रिक्ततया नास्तीति गौडपादस्याभिप्रायः। गौडपादस्य भाव एव समुचितं इति पंडिताः अङ्गीकृतवंतः।

लिंगं पूर्वोक्तरीत्या अनादिसिद्धिर्भूत्वा, पूर्वपूर्वसंस्कारभावभूयिष्टेन संसरन् 'सूक्ष्मा मातापितृजाः सहप्रभूतैस्त्रिधा विशेषाः स्युः। सूक्ष्मास्तेषां नियता मातापितृजा निवर्तंते।'(सां.का.39) तन्मात्राणि, मातापितृजाः, स्थू लभूतानीति त्रिविधम्। तत्र सूक्ष्मानि तन्मात्राणि नित्यानि। मातापितृजानि अनित्यानि। तत्र तन्मात्रोपाधिकं सूक्ष्मशरीरं सदा संसरति। मातापितृजं पंचभूतात्मकं स्थूलशरीरं जननमरणाभ्यामनित्यं स्यात्। संसृति भ्रमणं सूक्ष्म शरीरं 'कर्मवशात् पशुमृगपक्षिसरीसृपस्थावरजातिषु संसरति'(सां.का.गौ.39) कर्मवशात् तेषु तेषु जातिषु जन्यते। 'धर्मवशादिंद्रलोकेषु'(सां.का.गौ.39) पुण्यवशात् इन्द्रादि लोकान् अप्नोति। एवं लिंगशरीरं 'एवमेतत् नियतं सूक्ष्मशरीरं संसरति न यावत् ज्ञानमुत्पद्यते'(सां.का.गौ.39) ज्ञानोत्पत्तिपर्यंतं

संसरति। संसरणसमये 'धर्मेण गमनमूर्ध्वं'(सां.का.44) धर्मप्रवृत्तिमूलात् ऊर्ध्वजन्मगमनम् आप्नोति। 'ऊर्ध्वमित्यष्टौ स्थानानि गृह्यंते' ऊर्ध्वस्य अष्ट स्थानानि संति। तानि ब्रह्म, प्रजापति, सोम, इन्द्र, यक्ष, गंधर्व, राक्षस, पिशाच स्थानानि। तद्विपरीतानि पशुमृगाद्यधर्मसंजातानि। सूक्ष्म शरीरसंसरणानि सर्वाणि 'अष्टविकल्पो दैवस्तैर्यग्योनिश्च पंचधा भवति। मानुषश्चैकविधः समासतोयं त्रिधा सर्गः।'(सां.का.53) अष्टविधं दैवं, पंचविधं तिर्यगं, मानुषमेकं सर्वं त्रिविधम्। सम्मेलनेन चतुर्दशधा इत्युच्यते।

उक्तस्य त्रिविधरूपसृष्टेः 'ऊर्ध्वं सत्वविशालस्तमो विशालस्यय मूलतः सर्गः। मध्ये रजो विशालो ब्रह्मादिस्तंबपर्यंतं'(सां.का.54) ऊर्ध्व सृष्टेः सत्वाधिक्यता, अथः तमसाधिक्यता, मध्ये रजोप्राधान्यता च संति। आब्रह्मस्तंब सृष्टेः सर्वत्रापि एवमेव वर्तते। ऊर्ध्वं नाम अष्टदेव स्थानानीति, मूलं नाम पश्वादिस्थावरांतिमपर्यंतं विद्यमानसृष्टिः इति, मध्ये नाम मनुष्याः इति च समन्वयः। सर्वसृष्टिरपि षोडशविधसर्गाः इव पुनः विभक्तः। कथमित्यक्ते? 'अभौतिकः सर्गः लिंगसर्गः भावसर्गः भूतसर्गः दैवमानुषतैर्यग्योनाः, इत्येष प्रधानकृतः षोडशविधः सर्गः'(सां.का.गौ.54) देव, मानुष, जंगम, स्थावररूपचतुर्विध सर्गाः पुनः अभौतिक, लिंग, भाव, भूतरूपैश्च सर्वं षोढशकं भवतीति गौडपादस्य तात्पर्यमिति हर दत्तस्य अभिप्रायः। तथापि प्रधानात् महत्, महदः अहंकारश्च उत्पद्यत्वात् द्विविधसर्गौ स्याताम्। अहंकारात् वैकृतिक भूतादिरूप द्विविध सर्गः क्रियते। तस्मिन् वैकृतिकात् एकादशकसर्गैः पंचसर्गाः उत्पन्नाः। भूतादेः तन्मात्राणां सर्गषष्टः। एकादशकात् दशेंद्रियप्रवृत्ताः, मनसः जननेन अष्टसर्गाः स्युः। तन्मात्रेभ्यः स्थूलभूतसृष्टिना नवसर्गाः स्युः। लिंगः दशमसर्गः। सांसिद्धिक, प्राकृतिक, वैकृतिक भावैः त्रयो दशं, देवमानव तिर्यगैः षोडशसर्गाः भवंतीति वाक्यं समुचितम्। अस्मिन् विधाने पुरुषस्य दर्शनार्थं कैवल्यार्थमुपयुक्तः सृष्टिः अभवदित्ति सांख्यस्य तात्पर्यम्।

प्रकृतिरहस्यम्

'मूलप्रकृतिरविकृतिः'(सां.का.3) मूलप्रकृतिः अकार्यम्। 'प्रधीयते इति प्रधानः'(यो.सू.वा.2) सर्वकार्याणाम् अधिष्ठातेति प्रधानमिति सूत्र

रीत्या, 'मूलप्रकृतिः प्रधानात्'(सां.का.गौ.3) प्रधानत्वात् मूलप्रकृतिः इति, 'प्रकृतिविकृतिसप्तकस्य भूतभूतत्वात्'(सां.का.गौ.3) कार्यकारणे महदादि सप्तकस्य मूलभूतत्वात् प्रधानमिति 'मूलं च सा प्रकृतिश्च मूलप्रकृतिः' (सां.का.गौ.3) सर्वकारणकारणत्वात् मूलप्रकृतिः इति, 'मूले मूलाभावा दमूलं मूलं'(सां.सू.1.67) कारणरहितस्य कारणत्वात् मूलमिति, प्रधान प्रकृतिपदयोः अन्वयः। अपि च 'प्रकृतिरित्युच्यते विकारोपादानकत्वात्' (सां.का.गौ) सर्वविकाराणाम् उपादानकत्वेन प्रकृतिः इति, 'अविद्या ज्ञान निरोधत्वात्'(सां.का.गौ) ज्ञानविरोधित्वात् अविद्या इति, 'मायाविचित्रसृष्टि कारकत्वात्'(सां.का.गौ) विचित्रसृष्टिकारणत्वात् माया इति च प्रकृतेः नामान्तराणि अनेकानि संति। अस्य प्रकृतिशब्दस्य 'नामरूपविनिर्मुक्त यस्मिन् संतिष्टते जगत्। तं आहुः प्रकृतिः केचिन् मायाम् अन्ये परे त्वणूं।'(बृहद्ब्राशिष्ट. विज्ञानभिक्षु) जगत् नामरूपयोः विमुक्तेरनंतरं कुत्र लयः स्यात् सा प्रकृतिरिति वर्णितवान्। पुनः 'अव्यक्तं प्रधानम्'(सां.का. गौ.2) इति अव्यक्तमित्युक्तम्। तस्मादेषा प्रकृतिः सर्वकार्याणामपि उपा दानेन विद्यमानेऽपि 'सौक्ष्म्यात्तदनुपलब्धिः'(सां.का.8) अतिसूक्ष्मत्वात् इंद्रि याणामगोचरेण 'कार्यतस्तदुपलब्धिः'(सां.का.8) स्वतः अगोचरेण विद्यमा नेऽपि तज्जनितकार्यगणानां महदादीनां द्वारा ग्राह्यते। अस्मिन् विषये 'कार्यदर्शनात्तदुपलब्धेः'(सां.सू.1.110) इति सूत्रं वदति। पुनः तद्ग्रहणे 'श्रुतिलिंगादिभिस्तत्सिद्धिः'(सां.सू.5.21) श्रुतिमूलेऽपि तस्य गुणानां मूलेन च साध्यम्। हेतुमत्वादिलक्षणयुक्तस्य व्यक्तस्य व्यतिरेकैः नित्यत्व, सर्व गतत्व, अक्रियत्व, एकत्व, अनाश्रयत्व, अलिंगत्व, निरवयवत्व, स्वतंत्रत्वा दिलक्षण युक्तं प्रधानमिति, 'हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं। 'सावयवं परतंत्रं व्यक्तं विपरीतमव्यक्तम्'(सां.का.10) इति कारिकायामेव निर्वचितम्। अपि च 'त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्यक्तं तथा प्रधानम्' (सां.का.11) व्यक्ताव्यक्ते द्वेऽपि त्रिगुणात्मकाविवेक विषय, सामान्य, चेतनकार्यकारणादिलक्षणोपेते एव। तथापि 'सत्वरजस्त मसां साम्यावस्था प्रधानं'(सां.का.गौ.16) इति रीत्या त्रिगुणसाम्यावस्था एव प्रधानम्। नाम त्रिगुणविशिष्टमिति तात्पर्यम्।

इत्थं निर्वचितं प्रधानं प्रसवधर्मि इति कार्यसंतानयोः जनक संबंधेन, पुरुषस्य विषयो भूत्वा, तस्य पुरुषार्थसिद्धेः प्रवर्तते। तत् सर्वो पादानसत्वेन महदादितन्मात्रपर्यंतं व्यक्तेन विकारो भूत्वा, पुरुषस्य दर्शनार्थ

प्रवृत्तेः आकरं भवति। अचेतनेन विद्यमानेऽपि तत् 'वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य'(सां.का.57) अज्ञं क्षीरं वत्साभिवृद्धेः प्रवृत्त रीत्या, 'अचेतनत्वेपि क्षीरवच्चेष्टितं प्रधानस्य'(सां.सू.3.59) इति रीत्या अचेतनेन स्थित्वा, क्षीरमिव चेष्टितं भूत्वा प्रधानं व्यवहरति। पुनः 'सार्थ इव परार्थः आरंभः'(सां.का.56) तत् परार्थेन प्रवृत्तेऽपि स्वार्थमिव गोच रति। सदा 'उपकारिणि गुणवति'(सां.का.60) तस्मात् 'यथा कश्चित् परोपकारी सर्वस्योपकुरुते, नात्मनः प्रत्युपकारमीहते, एवं प्रकृतिः पुरुषार्थं चरति करोत्यपार्थकं'(सां.का.गौ.60) एकः परोपकारकः प्रत्युपकारमवांछन् सर्वेषां कथमुपकारं करिष्यति, तथा प्रकृतिः प्रतिकांक्षारहिततया पुरुषार्थं 'त्रिषु लोकेषु शब्दादिविषयैः'(सां.का.गौ.56) त्रिषु लोकेषु विद्यमानैः सर्व विषयैः उपकरोति।

दर्शनार्थ, कैवल्यार्थ द्विविधपुरुषार्थयोः आत्मनः प्राधान्यभूतदर्शन व्यवहारे उपयुक्तं भवति। 'प्रकृतिवियोगो मोक्षः' इति आत्मनः पाशेभ्यः पुरुषस्य मोक्षव्यवहारेपि 'प्रतिपुरुषविमोक्षार्थं'(सां.का.56) 'पुरुषविमोक्ष निमित्तं'(सां.का.57) 'पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तं'(सां.का.58) 'सैव च पुरुषार्थं प्रतिविमोचयत्येकरूपेण'(सां.का.63) 'पुरुषस्य दर्शनार्थं कैवल्यार्थं'(सां.का.21) इत्यादि कारिकावाक्यानां रीत्या 'विमुक्तमोक्षार्थं स्वार्थं वा प्रधानस्य'(सां.सू.21) इति सूत्रेणोक्तरीत्या प्रधानं पुरुषस्य मोक्ष प्राप्तेरपि उपकरोति। तत् 'रंगस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्। पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥'(सां.का.59) रंगस्य दर्श यित्वा नृत्यस्यानंतरं यथा नर्तकी निष्क्रमति तथा प्रकृतिः पुरुषस्य दर्शना र्थमुपयुक्तो भूत्वा निवर्तते। अपि च 'प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति। या दृष्टास्मीति पुनर्नदर्शनमुपैति पुरुषस्य॥'(सां.का.61) अहं दृष्टस्मीति पुरुषस्य पुनः अदृश्यत्वात् प्रकृतिः सर्वेतरात् सुकुमारमिति कारिकाकारः उक्तवान्। सांख्यसिद्धांतस्य प्रधानभूतं प्रधानमुद्दिश्य गौड पादोऽपि 'अतः प्रकृतेः सुकुकारतरं सुभोगतरं न किंचिदीश्वरादिकारण मस्तीति'(सां.का.गौ.61) अस्मात् कारणात् इतरकारणभूताः ईश्वरादयः प्रधानात् अधिकसुकुमारेण, सुभोग्येन च न संतीति उक्तवान्। अस्य प्रधा नस्य प्राधान्यं दत्वा तस्य सुकुमारतरं, गुणवति, उपकारिणि इत्यादिललित पदैः निर्णयन् सांख्यवादाः प्रधाने आत्मनां विद्यमान प्रेमाभिमानासक्तान्

व्यक्तं कृतवंतः।

पुरुषस्वरूपम्

एतादृशं सुकुमारतरं प्रकृतिमुपभुज्यमानस्य पुरुस्य स्वरूपं विचारयामः। 'प्रधानपुरुषावतीन्द्रियौ'(सां.का.गौ.6) प्रधानपुरुषयोः इंद्रियातीतत्वात् 'सामान्यतो दृष्टानुमानेन साध्येते'(सां.का.गौ.6) सामान्यतः दृष्टरूपअनुमान प्रमाणेन ज्ञातुमशक्यम्। कथमित्युक्ते? 'यस्मान्महदादि लिंगं त्रिगुणं'(सां.का.गौ.6) त्रिगुणात्मकः महदादिसृष्टिः यस्मात् जनितं तत् प्रधानमिति, 'यतश्वाचेतनं चेतनमिवाभाति अतोऽन्योऽधिष्टाता पुरुष इति'(सां.का.गौ.6) अचेतनं चेतनमिव गोचरति। तस्य अधिष्ठाता एकः चेतनः। स एव पुरुष इति पुरुषप्रधानयोः अनुमानेन ज्ञातव्यमिति भावः। तस्मात् अदृष्ट रूपः पुरुषः इंद्रियगोचरः। स पुरुषः संघातपरार्थत्वात् त्रिगुणादि विपर्यया दधिष्ठानात्। पुरुषोस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।'(सां.का.17) कार्याणां सर्वेषां परार्थत्वात्, त्रिगुणात्मकसृष्टेः अधिष्ठानस्यावश्यकत्वात्, विषयनियामकस्यावश्यकत्वात्, भोक्तृणः आवश्यकत्वात्, मोक्षार्थप्रवृत्तेः सत्वाच्च एतेषां सर्वेषां अधिष्ठानस्थाने पुरुषस्य आवश्यकता वर्तते। पूर्वोक्तप्रकारेण प्रधानं मात्रमेव परार्थं न। प्रधानजन्यमहदादितन्मात्रपर्यंत सृष्टिरपि परार्थमेव। 'स्वां स्वां प्रतिपद्यंते परस्पराकूतहेतुकां वत्तिम्। पुरुषार्थ ऐव हेतुर्न केनचित्कार्यते करणम्॥'(सां.का.31) इंद्रियवृत्तयः परस्परं संभ्रमेण अन्योन्येन प्रतिपद्यंते। तेषां प्रवृत्तिः पुरुषार्थं मात्रमेव स्यात्। तथैव 'ऐते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः। कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंति॥'(सां.का.36) गुणोत्पन्नानि करणानि दीपिका इव विषयान् प्रयच्छंति। बुद्धींद्रियकर्मेंद्रियाहंकारमनांसि पुरुषार्थं बुद्धिविषयान् व्यक्तयंति। अपि च लिंगप्रवृत्तिः 'पुरुषार्थहेतुकमिदं....लिंग'(सां.का.42) इत्युक्तरीत्या पुरुषार्थमेव प्रवृत्तं भवति। तथा महदादिसर्वप्रवृत्तेः अधिष्ठाता पुरुषः सर्वविषयभोक्ता भवतीति अनुमानितम्। सः 'महतोहंकारोहंकारात् पंचतन्मात्राण्युभयमिंद्रियम्। तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पंचविंशतिर्गणः'(सां.सू.1.61) इति सूत्रं पुरुषं पंचविंशतितत्वात्मिकेन परिगणति। तस्मादेव पूर्वचतुर्विंशतिकं अचेतनेन व्यक्ताव्यक्तमित्युक्ते 'ज्ञः'(सां.का.2) 'ज्ञः पुरुषः'(सां.का.गौ.2) ज्ञः पुरुषः इति, चेतनः इति च

उक्तः। एषः 'न प्रकृतिर्न विकृतिः पुरुषः'(सां.का.3) प्रकृतिविकृतिनोः अतीतः पुरुषः प्रधानस्य मूलकारणभूतः। महदादयः प्रकृतिजन्याः, तस्मात् विकृताः भवंतः षोडशकस्य प्रकृताः भवंति। तस्मात् कार्यकारणे इति ज्ञातव्यम्। षोडशकं नाम एकादशेंद्रियाणि, पंचभूतानि, केवलं कार्याणि च भवंति। तथापि पुरुषः अस्य कार्यकारणत्वस्य असंबंधिरूपेण वर्तते इति तात्पर्यम्। नाम तस्य कारणं नास्ति। तस्मात् कार्यमपि नास्ति। एषः 'तद्विपरीतस्तथा च पुमान्'(सां.का.11) व्यक्तोव्यक्तयोः विपरीतानि कानिचन लक्षणानि, तेषां गुणाश्च संति। कथमित्युक्ते? प्रथमतः विपरी तानि परिशीलयामः 'त्रिगुणं व्यक्तमव्यक्तं च अगुणः पुरुषः अविवेकि व्यक्तमव्यक्तं च विवेकी पुरुषः। तथा विषयो व्यक्तमव्यक्तं च अविषयः पुरुषः तथा सामान्यं व्यक्तमव्यक्तं च, असामान्यः पुरुषः। अचेतनं व्यक्त मव्यक्तं च चेतनः पुरुषः सुखदुःखमोहान् चेतयति संजानीते तस्माच्चेतनः पुरुषः। प्रसवधर्मिव्यक्तं प्रधानं च अप्रसवधर्मी पुरुषः। तस्मादुक्तं तद्विप रीतः पुमानिति'(सां.का.गौ.11) व्यक्तमव्यक्तं च त्रिगुणात्मकं चेत्, पुरुषः अगुणः। व्यक्ताव्यक्ते अविवेकिन्यौ। विवेकि पुरुषः। सामान्यं व्यक्ता व्यक्तं, पुरुषः असामान्यम्। व्यक्ताव्यक्ते अचेतने। चेतनः पुरुषः। सुख दुःखमोहानां ग्राहकत्वात् पुरुषः चेतनः भवति। व्यक्ताव्यक्ते कारणे भवतः। तथापि पुरुषः न तु प्रसवधर्मी। तस्मात् पुरुषः व्यक्ताव्यक्तयोः व्यत्यस्तः। अनंतरं सामान्य लक्षणानि अवलोकयामः। अहेतुकं अवि कृतिः प्रधानम्। तथैव पुरुषोऽपि अकारणः। प्रधानमिव स नित्यः। 'व्यापि प्रधानं तथा च व्यापि पुमान् सर्वगतत्वात्'(सां.का.गौ.11) सर्व गतत्वात् प्रधानमिव पुरुषोऽपि सर्वव्यापकः। पुरुषप्रधानयोः अक्रियानां सर्वगतत्वात् निष्क्रियत्वस्य हेतुः। अव्यक्तमिव पुरुषः एकः। सः प्रधान मिव अलिंगः। द्वावपि स्वतंत्रौ। एवं एकादशकारिका पुरुषस्य लक्षणानि अधिकतया विस्तारमकरोत्। महदादिसर्वसंघातानां भोक्ता स एव(सां.का. 17)। 'अथ स किमेकः सर्वशरीरेऽधिष्ठाता मणिरसनात्मकसूत्रवत्, अहो स्वित् बहव आत्मानः प्रतिशरीरमधिष्ठातार'(सां.का.गौ.18) मणिनां सूत्र मिव सर्वशरीराणां नियामकः पुरुषः एको वा? एकस्मिन् शरीरे एक इव अनेका वा? इति गौडपादः पृच्छति। उत्तररूपेण स एव निश्चितवान्। 'जननमरण करणानां प्रतिनियमादयुगवप्रवृत्तेश्च। पुरुष बहुत्वं सिद्धं त्रैगुण्य विपर्ययाच्चैव।'(सां.का.18) जननमरणेन्द्रियाणि प्रत्येकनियमरूपस्य सत्वात्,

एकस्मिन् काले एकप्रवृत्तिः सर्वेषामभावात् त्रिगुणविपर्ययः विविधरीतीनां सत्वाच्च पुरुषाः बहवः इति सिद्धः इति कारिकाद्वारा पुरुष बहुत्वं निर्णीतवान्। एकस्य शरीरस्य एकः पुरुषः इति, तस्मात् बहवः पुरुषाः इति सांख्यमतम्। एक एव पुरुषश्चेत् विविधरूप जननमरणानामवकाशः नास्ति। एकः उत्पन्नश्चेत् सर्वेऽपि तक्षणमेव उत्पन्नाः स्युः। तथैव एकः मृतःश्चेत् तस्मिन् काले सर्वेऽपि मृतिं प्राप्ताः स्युः। एकस्य शरीरेंद्रियाणां युक्तिमपि भग्नं चेत्, सर्वेऽपि देहाः तथैव प्राप्तव्याः। तथा नास्ति लोके। तस्मात् बहुपुरुषवादस्य अवकाशः वर्तते। तथैव एकः एकं कार्यं करोति चेत्, सर्वेऽपि तस्मिन् कार्ये एव निमग्नाः स्युः। तथा नास्ति लोके। कर्मप्रवृत्तौ तारतम्यं गोचरति। त्रिगुणविभागोऽपि विविधमिति ग्राह्यम्। 'जन्मादि व्यवस्थातः पुरुषबहुत्वं'(सां.सू.1.149) इति सूत्रमपि तथैव व्यक्तयति। तथापि 'उपाधिभेदेप्येकस्य नानायोगाकाशस्यैव घटादिभिः'(सां.सू.1.150) एक एवाकाशः घटाद्युपाधिभिः बहुधा यथा दृश्यते तथेति सूत्राणामाधारेण एकएव पुरुषः उपाधिभेदैः अनेकरूपैः गोचरतीति केचन व्याख्यातारः लिखितवंतः। एतादृशसमन्वयः उचित एव वा न वा इति विज्ञानिभिः आलोचनीयः। अयं विषयः कारिका ग्रंथे, ईश्वरकृष्णेन, विवरणे गौडपादेनापि च नोक्तः। तयोः तात्पर्यं संपूर्णपुरुषबहुत्वमेव। सूत्रग्रंथः वेदांत भावानां समन्वयं कर्तुं यत्नमकरोदिति गोचरति। पुनः सूत्रग्रंथः 'नाद्वैतश्रुतिविरोधो जातिपरत्वात्'(सां.सू.1.154) इति सूत्रात् सांख्यप्रवचनमस्मिन् विषये अद्वैतश्रुतिविरोधि न भवतीति, पुरुषैकत्वं जातिपरेण अन्वयं स्यादिति च उक्तः। पुरुषजातिः एकः, पुरुषाः बहवः इति भावः।

पुरुषः भोग्यानां मध्ये विद्यमानेऽपि 'तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं दृष्टत्वमकर्तृभावश्च।'(सां.का. 19) गुणविशिष्टत्वं विभेदात्, साक्षित्वं, कैवल्यं, माध्यस्थ्यं, दृष्टत्वम्, अकर्तृत्वादि लक्षणात्मकः पुरुषः। त्रिगुणानां कर्तृत्वात् पुरुषः साक्षि इव प्रकाशते। त्रिगुणादिकानामन्यत्वात्, कैवल्यरूपः। संबंधरहित 'परिव्राजकवत् मध्यस्थः पुरुषः'(सां.का.गौ.19) परिव्राजक इव पुरुषः उदासीनः। पुरुषः तथा उदासीनादिलक्षणयुक्तेऽपि 'तस्मात्तत्संयोगादचेतनं चेतनवदिव लिंगं गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः'(सां.का.20) पुरुषसंयोगेन अचेतनं लिंगं चेतनमिव भवति। सत्यस्य कर्तृत्वं गुणपरेऽपि, उदासीनः पुरुषः कर्ता भवति। चेतनाचेतनयोः कथं संयोगः? इति संदिग्धे, पुरुषं

दर्शनकैवल्यार्थं 'पंग्वंधवदुभयोरपि संयोगस्तत्कृतः सर्गः'(सां.का.21) पंग्वंधयोः संयोग इव स्यादिति, तस्य संयोगस्य जन्य एव सर्ग इति उत्तरम्। 'एवं पुरुषे दर्शनशक्तिरस्ति पंगुवत् न क्रिया'(सां.का.गौ.21) पंगोः इव पुरुषस्य दर्शनशक्तिः विद्यमानेऽपि निष्क्रियः। 'प्रधाने क्रिया शक्तिरस्त्यंधवत् न दर्शनशक्तिः'(सां.का.गौ.21) प्रधानस्य क्रियाशक्तिः अंधस्येव वर्तते। तथापि दर्शनशक्त्यभावः तयोः अन्योन्यतायाः कारण त्वात् सर्गः उत्पद्यते। प्रधानं पुरुषस्य पुरुषार्थसिद्धेश्च विविधप्रकारैः उप युक्तेऽपि, तस्य उदासीनत्वात् 'पुरुषोऽत्र प्रधानस्य न किंचित् प्रत्युपकारं करोति'(सां.का.गौ.56) पुरुषःप्रधानं प्रति किंचित्प्रत्युपकारमपि न करोति। तस्मात् 'अनुपकारिणः पुंसः'(सां.का.60) इति पुरुषः कीर्तिं लब्धवान्। तादृश असंगस्य, साक्षिमात्रस्य पुरुषस्य बंधमोक्षौ स्तः वा? नास्तिचेत्? 'कैवल्यार्थं' इति प्रधानप्रवृत्तेः हेतुः कः? इति प्रश्नः उत्पद्यते। पुरुषसन्निधानमहिम्ना लिंगस्य चेतनत्वं, पुरुषस्य कर्तृत्वं च अन्योन्याध्यास मूलेन संभवतश्चेत्, 'तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः लिंग स्यापि निवृत्तेः तस्मात् दुःखं स्वभावेन।'(सां.का.55) लिंगनिवृत्तिपर्यंतं जरामरणकृतंदुःखं पुरुषः अनुभवति। तस्मात् दुःखः विषयस्वभावः। तस्मादेव पुरुषः 'तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्। संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥'(सां.का.62) बद्धः न, मुक्तश्च न संसरणमपि तस्य नास्ति। नानाश्रयप्रकृतिरेव संसरन्, बंधयन् मुच्यते इति तात्पर्यम्। 'तेन पुरुषो बध्यते पुरुषो मुच्यते पुरुषः संसर तीति व्यपदिश्यते येन संसरित्वं न विद्यते'(सां.का.गौ.62) तस्मात् पुरुषः बद्धः, मुक्तः, संसरकः इति व्यवहारः संसृतिरहस्याज्ञानिभिः भवति। तस्मात् सत्यस्य पुरुषः बंधमोक्षविरहितः इति सांख्यवादः। तथापि 'प्रकृ तिश्च बध्यते प्रकृतिश्च मुच्यते संसरति'(सां.का.गौ.63) प्रकृतिः एव बध्यते मुच्यते संसरति च। कथमित्युक्ते 'रूपैः सप्तभिरेव तु बध्नात्यात्मान मात्मना प्रकृतिः। सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण।'(सां.का.63) ज्ञानं विना धर्मविरागादिसप्तकंद्वारा प्रकृतिः आत्मबंधनं करोति। सा प्रकृ तिरेव पुरुषस्य ज्ञानमूलेन स्वयमेव मोक्षमाप्नोति। तस्मात् यथार्थतः

ुरुषः सर्वबंधरहित एव।

मोक्षः, तत्सिद्धिः

'केवलभावान्मोक्षः'(सां.का.गौ.68) इति मुक्तिमुद्दिश्य किंचिद्विचार ग्रामः कारिकाग्रंथः आद्यंतपर्यन्तमपि पुरुषस्य 'दर्शनार्थं कैवल्यार्थं' इति पुरुषार्थद्वयं वदन्, तस्मिन् 'कैवल्यार्थं'(सां.का.17) 'कैवल्यं'(सां.का.19) प्रतिपुरुषविमोक्षार्थं'(सां.का.56) 'पुरुषविमोक्षनिमित्तं'(सां.का.57) 'पुरुषस्य वेमोक्षार्थं'(सां.का.58) 'नापि मुच्यते'(सां.का.62) 'पुरुषार्थं विमोचयत्' (सां.का.63) 'कैवल्यमाप्नोति'(सां.का.68) इति रीत्या बहुवारं प्रत्यक्षेन, अप्रत्यक्षेन च उक्तवती। अपि च 'दुःखत्रयाभिघातात् जिज्ञासा तदभि घातके हेतौ' (सां.का.1) दुःखत्रयस्य सत्वात् तन्निवारणोपायविचारणं कर्तव्यमिति आरंभयन् 'प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ। एकान्तिकमात्यंतिकमुभयं कैवल्यमाप्नोति॥'(सां.का.68) शरीरभेदप्राप्तिरनंतरं प्रकृतेः निवृत्तितया, एकान्तिकम्, आत्यन्तिकं च कैवल्यं पुरुषः आप्नोतीति कारिकाग्रंथे उपक्रमोपसंहारयोः निरूपितः। तस्मादस्य ग्रंथस्य फलं कैवल्यमेवेति निर्धारणं भवति। तत्र कैवल्यं नाम किमिति ज्ञानमावश्यकम्।

अविकारिः, उदासीनश्चेति निर्वचितः पुरुषः, अनिर्वचनीय कारणेन दर्शनापेक्षामुपलब्धवतः 'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः। अन्योन्याभिभवाश्रयजनकमिथुनवृत्तयश्च गुणाः॥'(सां.का.12) सुख दुःखमोहात्मिकान्, प्रकाशक्रियास्थितिशीलान्, परस्परावश्यक, आश्रयकारक संयुक्तवृत्तिसहितसत्वरजस्तमोगुणैः आवृतस्सन्, 'सत्वं लघुप्रकाशकमिष्ट मुपष्टंभकं चलं च रजः। गुरुवरणकमेव तमः'(सां.का. 13) प्रकाशलघुत्व युक्तं सत्वम्। उद्रेकचलनत्वयुक्तः रजः। आवरकम. ांद्यसहितः तमः। तस्मात् तेषां प्रवृत्तीनां वशो भूत्वा, 'भोक्तृभावः'(सां. का.17) भोक्तृभावं स्वीकृत्य, 'धर्मो ज्ञानं विराग ऐश्वर्य'(सां.का.23) इति सात्विकरूपाणि, 'तद्विपर्यस्त' (सां.का.23) इति अधर्म, अज्ञान, राग, अनैश्वर्य तामसिकवृत्तिभिः सहितस्सन्, संसृति बद्धो स्यात्। तदानीं तस्य एकादशेंद्रियाणि इति, बुद्धींद्रियकर्मेंद्रियमनसां सहायेन लिंगशरीरबद्धो भूत्वा, 'धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण। ज्ञानेन चापवर्गो

का.44) धर्मप्रवृत्तिभिः उत्तमजन्मा, अधर्मेण नीचगर्भप्रवेशः, ज्ञानेन अप वर्गः, विपर्यया बंधं च आप्नोति। तस्मिन् अधर्माज्ञानान्येव तस्य प्रबलबंधहेतवः भूत्वा, संसृतेः कारणानि भवंति। बंधानि नाम 'प्राकृतेन च बंधेन तथा वैकारिकेण च। दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते।'(सां.का.गौ.44) प्राकृत, वैकारिक, दाक्षिण इति बंधत्रयेन बद्धो स्यादिति, ज्ञानेतरेण मुक्तः न स्यादिति। नाम यज्ञ यागादि कर्मसंबंधबंधः दाक्षिणसंबंधः इति, प्रकृतिं पुरुषरूपेण संभावनं, आराधनं च प्राकृतबंधः इति, महदादिभूतपर्यंतं पुरुषरूपेण संभाव्य अर्चः वैकृतबंधः इति च भावः। अन्योन्याध्यासात् अचेतनलिंगस्य चेतनत्वं, अकर्तृणः पुरुषस्यय कर्तृत्वं च पूर्वं दृष्टम्। तस्मात् चेतनमिव गोचरं लिंगं पुरुषरूपेण संभा वनं भवति। पूर्वोक्त सांसिद्धिक, प्राकृतिक, वैकृतिकभावाः संसारनाशकाः भूत्वा ज्ञानवैराग्यधर्मैश्वर्यान् प्रापयति सति, प्राकृतादिसंबंधत्रयं संसारहेतु र्भवति। अपि च 'वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात्। ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः।'(सां.का.45) वैराग्ये प्रकृतिलयः, रागोद्भवात् संसारः, ऐश्वर्यात् आटंकराहित्यम्, अनैश्वर्यफलितेन वैरुध्यं च संभवति। कथमित्युक्ते? बुद्धेः धर्माद्यनैश्वर्यपर्यंतैः अष्टलक्षणैः 'एष प्रत्यय सर्गः'(सां.का.46) प्रत्ययरूपसृष्टिः उत्पन्नो भूत्वा, 'विपर्ययाशक्तितु ष्टिसिद्धाख्यः'(सां.का.46)विपर्यय, अशक्ति, तुष्टि, सिद्धि इति चतुर्विध प्रत्ययबद्धो भूत्वा, 'गुणवैषम्यविमर्दन तस्य भेदास्तु पंचाशत्'(सां.का.46) गुणविभेदे विविधप्रकारैः पंचाशत्(50) विधैः सृष्टिः भवति। नाम बुद्धिः गुणविभेदमनुसृत्य पंचशतरूपाणि आप्नोति इत्यर्थः।

तस्मिन् 'पंचविपर्यय भेदा भवंत्यशक्तिश्च करणवैकल्यात्। अष्ट विंशति भेदा तुष्टिर्नवधाऽष्टधा सिद्धिः।'(सां.का.47) विपर्ययरूपमज्ञानं पंच विधैः, इंद्रियवैकल्येन अशक्तिः अष्टविंशतिरूपैः, तुष्टिः नवविधैः, सिद्धिः अष्टरीतिभिः च सर्वाणि पंचाशत् रूपाणि सिद्धानि। तेषु पंचविपर्ययाः 'भेदस्तमसोऽष्टविधो मोहस्य च, दशविधो महामोहः। तामिस्रोष्टादशधा, तथा भवत्यंधतामिस्र।'(सां.का.48) 'तमः, मोह, महामोहः, तामिस्रः, अंध तामिस्रः'(सां.का.गौ.47) इति प्रकारेण विपर्ययं भवन्, तमः अष्टप्रकारैः, मोह अष्टप्रकारैः महामोहः दशविधैः, तामिस्रः अष्टादशप्रकारैः अंधता मिस्रः अपि अष्टादशविधैश्च, सर्वस्य द्विषष्टि भेदाः संवृत्ता इति'(सां.का. गौ.48) उक्तरीत्या, द्विषष्टि भेदैः संवृत्ताः भवंति। तथैव अशक्ताऽपि

एकादशेंद्रियवधाः सहबुद्धिवधैरशक्तिरुद्दिष्टा। सप्तदश वधा बुद्धेर्विपर्ययात् ष्टिसिद्धीनाम्।'(सां.का.49) एकादशेंद्रियाणां बुद्ध्या सहबाधप्राप्तिः अश ता इत्युच्यते। तुष्टेः ऐश्वर्यवैरुध्याः एव, सप्तदशबुद्धेः अशक्तताः र्वस्य 28 अष्टविंशति अशक्तताः भवंति। पुनः तुष्टिः 'आध्यात्मिकाश्च प्रः प्रकृत्युपादानकालभाग्याख्याः। बाह्यविषयोपरमात् पंच, नव तुष्टयो भिहिताः।'(सां.का.50) प्रकृति उपादान, काल, भाग्यानि, अंतराणि, ब्दादिविषयनिवृत्तं, बाह्यानि च मिलित्वा नवविधैः वर्तते। प्रकृतिज्ञानात्, नरहितसन्यासात्, कालपरिणामावेन अदृष्टविशेषेण च मुक्तेः प्राप्तिः ते रीतिः तुष्टौ विद्यते चेत्, अंतररूपतुष्टिः स्यात्। तथापि तैः मोक्षः सिद्ध्यति। बाह्यतुष्टिः पुचविधाः। नाम पंचविधाज्ञानेंद्रियविषयेभ्यः मोचनं पंचविधैः बाह्यतुष्टिः स्यात्। सिद्ध्यः अष्टविधाः भवंति। कथ त्युक्ते 'ऊहः शब्दोऽध्ययनं दुःखविधातास्त्रयः सुहृत्प्राप्तिः। दानं च सिद्ध ष्टौ सिद्धेः पूर्वोकुंशस्त्रिविधः।'(सां.का.51) ऊह नाम 'किमिह सत्यं ; परं किं नैश्श्रेयसं' इति चिंतनात् 'प्रधानादन्य एव पुरुष इति, अन्या द्धः' इति तत्वज्ञानस्योत्पद्यमानत्वेन 'येन मोक्षो भवति' इति ऊहसिद्धिः ात्। तथैव 'शब्दज्ञानात् प्रधानपुरुषबुद्ध्यहंकारतन्मात्रेन्द्रिय पंचमहाभूत षयं ज्ञानं'(सां.का.गौ.51) उपलभ्य, तथा मोक्षप्राप्तिःशब्दाख्येति सिद्धिः ात्। 'वेदादिशास्त्राध्ययनात् पंचविंशतितत्वज्ञानं प्राप्य मोक्षं याति।'(सां. ।.गौ.51) इति अध्ययनसिद्धिः स्यात्। 'आध्यात्मिकाधिभौतिकाधिदैविक खत्रयविघातायमोक्षंयाति' इत्युक्तरीत्या दुःखनिर्मूलनरूपमेव मोक्षहेतुरिति। त्रयःसिद्धयः। 'कश्चित् सुहृदज्ञानमधिगम्य मोक्षं गच्छति'मित्रात् ज्ञान ालभ्यमुक्तिप्राप्तिरेव सप्तमसिद्धिः। दानादिभिःमोक्षप्राप्तिःअष्टमसिद्धिः।

उपर्युक्ताविपर्ययाशक्तितुष्टिसिद्धीनां प्रथमत्रयं मुक्तेः प्रतिबंधकत्वात् त्याज्याः। मोक्षदायकसिद्धयः सेव्याः। 'स सिद्धेस्तत्वज्ञानमुत्पद्यते, मात् मोक्ष इति'(सां.का.गौ.51) इत्युक्तत्वात् सिद्धिरेव मुमुक्षुकोटिजनैः ञश्यं ग्राह्यः।

पुरुषः एवं प्रकारेण पंचशतसर्गे निमग्नो भूत्वा जरामरणकृतं खं प्राप्नोति चेतनः पुरुषः'(सां.का.55) जरामरणरूपदुःखमाप्नोति। अनेन कारेण 'दुःखत्रयाभिघाता'(सां.का.1) दुःखत्रयाभिघातैः बाधितः सन् दभिघातके हेतौ जिज्ञासा'(सां.का.1) तन्निवारणार्थं जिज्ञासा आवश्यकी ान। तस्मात् ...

पशुहिंसारूपक अविशुद्धता, इंद्रियादिनाशेन क्षयं अतिशयं च सत्वात् 'पंच विंशति तत्वज्ञो यत्र तत्राश्रमे वसेत्। जटी मुंडी शिखी वापि मुच्यते नात्र संशयः।'(सां.का.गौ.1) जटी, मुंडी, शिखी वा यस्मिन् कस्मिन् आश्रमे विद्यमानेऽपि पंचविंशतितत्वज्ञश्चेत् निस्संशयेन मुक्तिमाप्नोतीत्युक्तरीत्या, पंच विंशतिज्ञानरूपं 'तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्'(सां.का.2) कर्म व्यतिरिक्तव्यक्ताव्यक्तज्ञविज्ञानेन निश्श्रेयसप्राप्तिः सिद्ध्यते। इत्थं 'व्यक्ता व्यक्तविज्ञानात् मोक्षः' (सां.का.गौ.17) इति प्रतिपादितः। पुनः 'एवं व्यक्ताव्यक्तज्ञानां विभागो विख्यातः। यद्विभागान्मोक्षप्राप्तिः'(सां.का.गौ.20) अनेन प्रकारेण व्यक्ताव्यक्तज्ञविभागः कृतः सन्, तस्मात् मोक्षप्राप्तिः इति, 'व्यक्ताव्यक्तज्ञविज्ञानान्मोक्ष इति'(सां.का.गौ.23) 'एवमेतानि पंचविंशति तत्वानि। यस्तैस्त्रैलोक्यं व्याप्तं जानाति' (सां.का.गौ.23) इति पंचविंशति तत्वानि, तैरावृतान् त्रिलोकान् यः जानाति स मुक्तः स्यादिति, 'सैव च विशिनष्टि प्रधानपुरुषयोर्विषयविभागं करोति....'(सां.का.गौ.37) बुद्धिरेव प्रधानपुरुषविषयविमर्शं करोति। तस्मात् 'अपवर्गो भवति'(सां.का.गौ.37) इति, 'गुणपुरुषांतरोपलब्धिर्मोक्ष इति'(सां.का.गौ.42), 'अपवर्गः च पंच विंशति तत्वज्ञानं। तेन निमित्तेनापवर्गो मोक्षः'(सां.का.गौ.44) इति, 'स सिद्धेस्तत्वज्ञानमुत्पद्यते। तस्मात् मोक्ष इति'(सां.का.गौ.51) 'यदा पंचविंश तितत्वज्ञानं स्यात्.... एवं ज्ञानाल्लिंगनिवृत्तिस्ततो मोक्ष इति'(सां.का.गौ. 55) बहुविधैः मोक्षस्थितिः, तत्प्राप्तिसाधनं च विवृते।

हिरण्यगर्भः। तस्मात् योगशास्त्राणां पतंजलेः कर्तृत्वविषये विरुद्धो न भवति। तस्य ग्रंथे 'अनुशासन' इति पदे 'अनु' इत्युपसर्गात्, एतानि योग सूत्राणि प्रथम ग्रंथः नेति, अस्मात् पूर्वग्रंथः आसीदिति च स्पष्टं भवति। अनेन प्रकारेण पातंजलयोगग्रंथात् पूर्वमेव योगशास्त्रग्रंथाः संतीति Two verses from Hiranyagarbha's work are quoted in the Vishnu-purana (अंश.2, अ.13, 5, 5, 42, 45) and Varshaganya is mentioned by Vachaspati Mishra in his Bhamati Yajnavalkya Promulgated the same system in his Yoga, Yajnavalkya Gita[4] हिरण्यगर्भेन प्रोक्तौ श्लोकौ विष्णुपुराणे स्वीकृतौ। वाचस्पतिमिश्रः 'भामति' ग्रंथे वार्षगण्यस्य कृतीनां प्रसंगं कृतवान् याज्ञवल्क्यगीतायां अमुं सिद्धांतं याज्ञवल्क्यः विवृतवान् इति भाष्याचार्यः लिखति। अपि च श्री शंकराः स्वस्य ब्रह्मसूत्रभाष्ये योगकर्तृणः नाम नोक्त्वा, योगसिद्धांतं खण्डयन् 'अथ तद्दर्शनाभ्युपायो योगः' सम्यक् ज्ञानं मोक्षसाधनमिति निश्चितानंतरं ज्ञानसाधनं योगाभिधानमिति योगसूत्रमेव प्रमाणतया स्वीकृत वंतः। तथापि तस्य अपातंजलित्वात् it must either belong to Hiranyagarbha or Varshaganya[4] हिरण्यगर्भस्य, वार्षगण्यस्य वा संबंधि स्यात्। योगो नाम सम्यक् ज्ञानसाधनमिति पूर्वसूत्रे उक्ते 'चित्तवृत्तिनिरोध एव योग' इति पतंजलिना उक्तम्। तस्मात् योगशास्त्रमेतत् केवलं पतंज लिमहर्षिणैव नारंभः। 'सर्वेषामपि गुरुः कालेऽनवच्छेदात्'(यो.सू.1.26) ईश्वरस्य कालातीतप्राचीनगुरूणां सर्वेषां गुरोत्तमः इति पतंजलिनैव उक्तम्। तस्मात् अनादितः प्रवाहरूपेण एतच्छास्त्रमागच्छति इति निर्धार्यते।

योगशास्त्रम् - उपनिषदः

पूर्वोक्तप्रकारेण योगशास्त्रस्य सूत्रकर्ता पतंजलिः, प्रवक्ता हिरण्यगर्भः इत्युक्तेऽपि योगशास्त्रस्याधाराः एतेषां युक्त्यनुभवाः एव न। We know that all our great Philosophers whether Vyasa, Patanjali or Gotama and even the father of all Philosophy, the great Kapila himself, when ever they wanted an authority for what they worte, everyone of them found it in the Upanishads and no where else[5] व्यास, पतंजलि, गौतमाः, सर्वतत्वशास्त्रजनकः कपिल

श्चापि तेषां ग्रंथानां प्रामाणिकत्वस्यावसरसमये सर्वेऽपि अन्यद्विहाय उपनिषत्स्वेव बुद्धिं स्थापितवंतः इति विवेकानंदेन उक्तरीत्या योगशास्त्रस्य परम प्रमाणतमाः उपनिषदः एव विराजंते। उपनिषदः योगं बहुविधैः प्रस्तुवन् 'यथैव बिंबं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधातं'(श्वे.उ.2.14) मृदादिभिः मलिनपूरितं सुवर्णादिकं परिशुद्धयनंतरं तेजसा यथा प्रकाशते तथा योगिः, 'मुच्यते सर्वपाशैः'(श्वे.2.15) न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरं'(श्वे.उ.2.12) 'अप्रमत्तस्तदा भवति योगः' (कठ.6.11) इत्यादिभिः वचनैः योगशास्त्रं प्रशंसितवत्यः। Of the technicial names of the six systems of Philosophy, two only occur in the classical Upanishads, namely Sankhya and Yoga or Sankhya Yoga[6] षड्दर्शनानां विद्यमानेषु पारिभाषिकपदेषु सांख्य-योग विना सांख्य - योग इति द्वयं मात्रमेव सांप्रदायिकासु उपनिषत्सु अस्तीति, The Upanishads which speak of the Sankhya theories refer to the Yoga practices as well[7] सांख्यसिद्धांतवाचकाः उपनिषदः योगसाधनमपि सूचयन् Its origin may be traced to prevedic ideas[7] मूल योगः वेदपूर्वभावानां पर्यंतं गच्छति। तस्मात् सूक्ष्मदृष्ट्या परिशीलितं चेत्, Crude conception of the value of ecstasy and hypnotictrance are to be met with in the Rig-Veda which also mention the word Muni (X.136). In the Atharvana Veda, the idea is very common that Super-natural powers can be obtained through the practice of austerities . Soon the conception of Tapas appears, giving a more ethical character to the discipline[7] ऋगवेदे स्पष्टरूपेण समाधेः उपयोगमुद्दिश्य केचन भावाः संति। अत्र 'मुनि' इति पदमपि वर्तते। साधनात् अमानुषशक्तयः संप्राप्ताः स्युः इति भावः अथर्वणवेदे सामान्येन वर्तते। अतः तपः नाम भावः साधनाय अधिकतर धार्मिकत्वं प्रसादयन् परिणमितः इति राधाकृष्णन् वाक्येषु सत्यं व्यक्तं भवति। अथोपनिषत्सु Katha, Swetaswatara, and theMaitrayana refer to the practical side of religious realisation as distinct from the theoritical investigation of the Sankhya Yoga as a technical term occurs in the Katha, the Taithiriya, the Maitrayana Upanishads, but it cannot be said that the Yoga mentioned in them is identi-

cal with the Yoga of Patanjali.[7] सांख्यस्य आध्यात्मिकशास्त्रीयविचारणा दन्येन प्रकारेण कठ, श्वेश्वतर, मैत्रायणि उपनिषदः आध्यात्मिकानुभूतेः अनुष्ठेय विधानानि सूचितवत्यः। कठ, तैत्तरीय, मैत्रायण्युपनिषत्सु योग शब्दः सांकेतिकरूपेण गोचरेऽपि तत्रस्त योगः पातंजलेः एकीभूतमिति वक्तुमसाध्यमिति राधाकृष्णपंडितः लिखति। कालक्रमेण योगविद्यायां परि णामाः संभवेऽपि पातंजले आधाराः उपनिषदः इति वक्तुं संशय एव नास्ति। तस्मात् अस्माकमुपलभ्यमानेषु अष्टोत्तरशतोपनिषत्सु विंशति योगो पनिषदः इति शास्त्रज्ञैः विभक्ताः। ताः काः इत्युक्ते 1.अद्वयतारक 2. अमृतबिंदु 3.योगतत्व 4.मंडलब्राह्मण 5.योगकुंडलि 6.योगचूडामणि 7. योगशिख 8.ब्रह्मविद्या 9.क्षुरिक 10.त्रिशिखिब्राह्मण 11.दर्शन 12.अमृतनाद 13.तेजोबिंदु 14.ध्यानबिंदु 15.नादबिंदु 16.पाशुपतब्रह्म 17.महावाक्य 18. वराह 19.शांडिल्य 20.हंसोपनिषदः। एताः उपनिषदः संपूर्णतया योगप्रति पादकाः एव। अनंतरं 1.श्वेताश्वतर 2.कठ 3.महा 4.अन्नपूर्णा 5.अक्षि 6.आध्यात्म 7.सौभाग्यलक्ष्मि 8.सरस्वतीरहस्यादयोपि योगमार्गप्रवर्तकाः एवेति ज्ञातानि भवंति। एतासु उपनिषत्सु योगानुष्ठानजनितविभूतीः, अनु भवसहस्राश्च विवृताः।

तस्मादेव 'आगमेनानुमानेन ध्यानाभ्यासरसेन च त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्'(यो.भा.1.48) आगमानुमानध्यानाभ्यासैः प्रज्ञां प्रदर्श्य, योगी परमोत्कृष्टयोगमाप्नोतीति भाष्यकारः व्यासभगवान्, श्रुतेः प्रमाणं मुख्यमित्युक्तवान्। अपि च पतंजलिमुनींद्रोऽपि 'प्रत्यक्षानुमानागमाः प्रमाणानि'(यो.सू.1.7) इत्यादिसूत्रैः आगममपि मुख्यप्रमाणेन स्वीकृतवान्। तस्मात् योगशास्त्रं, हैरण्यगर्भं, पातंजलमपि च वेदसंबद्धमेवेत्यत्र नास्ति संदेहः। भगवद्गीताशास्त्रे योगस्य प्राधान्यात् योगशास्त्रमित्यभिधानं संप्राप्तं। अपि च In one form or another, Yoga is to be found among all Indian ascetics including Buddhists and Jains[8] येनकेनापिरूपेण योगः भारतीय सन्न्यासिषु सर्वेषु, बौद्धजैनयोरपि दृश्यते इति माक्डोनेल् लेखनरीत्या, योगः सर्वसिद्धांतानामपि साधनमार्गं भूत्वा, अनुष्ठितस्सन् सर्वं च व्याप्य प्रकाशते। साक्षात् हिरण्यगर्भेन प्रोक्तः, याज्ञवल्क्यादि महर्षिगणप्रेष्ठश्च वार्षगण्यादिसिद्धानामाधारभूतस्सन्, गुरुदत्तात्रेयादिईश्वरांश संभूतीनां प्रापकं संपाद्य, आदिशेषावतारभूतेन ऋषितिलकेन दर्शनभूतः

ाग: पूर्वोक्तरीत्या, सुप्रसिद्धः, सर्वाकर्षणीयः सर्वोपयुक्तश्चेत्यत्र नास्ति संदेहः।

योगसूत्रग्रन्थः

दर्शनषट्के साधनशास्त्रमिति, अनुभवग्रंथः इति च सुप्रसिद्धं पातं ालदर्शनं अध्यायचतुष्टयम्। Since the criticisms of the other :hools occur in the fourth part of the Yoga Sutras, and since ıe word 'इति' denoting the conclusion of a work occurs at the nd of the third, it is suggested that the fourth part is a later ddition[9] योगसूत्रे चतुर्थाध्याये अन्यसिद्धांतखण्डनस्य सत्वात् तृतीय ध्यायस्यांते ग्रंथांतसूचिकस्य 'इति' पदस्य सत्वाच्च, चतुर्थ प्रकरणं क्षिप्तमिति दासगुप्तस्य भावः। तस्मात् तस्य वादप्रकारेण प्रकरण यग्रंथः पातंजलं भवति। पुनः सूक्ष्मबुद्ध्या दृष्टं चेत् The first chap-er thus, in fifty one aphorisms, gives what may be called the heory or the science of Yoga. An ardent and intelligent person an earn enough from this chapter alone to become a practical 'ogin[10] प्रथमप्रकरणे 50 सूत्रेभ्यः योगशास्त्रस्य विधानं सर्वं ज्ञापयति। ुद्धिमान् आर्तश्च अनुष्ठानपरो योगि कथंभविष्यतीति विषयं प्रथमाध्याया व ज्ञातुं शक्यते इति रामप्रसादस्योक्तरीत्या समाधिप्रकरणमेव समग्रं ्यात्। तथापि न्याय, वैशेषिक, वेदांतदर्शनेष्वपि परसिद्धांतखण्डनाय एकस्य कस्य प्रकरणस्योपयुक्तत्वात् तद्वदस्मिन् योगदर्शनेऽपि कैवल्यपादः प्रक्षिप्तः ति वचनम् अनुचितमिति द्योतते। 'इति' पदस्य प्रयोगः पादांत सूचि केति अन्वयः। अपि च भोजसंकलितसूत्रेषु 'कैवल्यमिति' इति नास्ति। केवलं 'कैवल्यम्' इति तृतीयपादांते वर्तते। तस्मात् पाठांतरस्य संप्राप्ते इति' इत्यभवदिति मन्तव्यम्। तथैव प्रथमपाद एव समग्ररूपेण विद्यमा ोपि, तदंशविवरणार्थं तदनंतरग्रंथस्यावश्यकतास्तीति वचनम् उचितम्।

इत्थं पादचतुष्टयालंकृतः पातंजलयोगः अल्पाक्षरं संपूर्णार्थकं, सूत्र विधानग्रंथरचनं च। पादचतुष्टयं सर्वं 195 (पंचनवोत्तरशतम्) सूत्रैः निर्मितमेतच्छास्त्रम्। तस्मिन् समाधि प्रकरणं नाम प्रथमाध्याये 51 (एक पंचाशत्) सूत्रैः योगानुशासनमारभ्य 'योगः चित्तवृत्ति निरोधः'(यो.सू.1.2) इति योगस्य निर्वचनमुक्त्वा, तत्फलितेन 'तस्यापि निरोधे सर्वनिर्बीज समाधिः'(यो.सू.51) इति सूत्रेण अध्यायस्य परिसमाप्तिं कुर्वन्, ग्रंथतात्प

र्यस्तु निर्बीजो नाम असंप्रज्ञातसमाधिरिति सूत्रकारः विवृतवान्। अस्मिन् प्रकरणे योगलक्षणम्, समाधिद्वयस्वरूपं, चित्तवृत्तयः विपर्ययरूपं, वृत्तेः निरोधोपायाः, अभ्यासस्य स्वरूपम्, वैराग्यस्य लक्षणम्, संप्रज्ञातसमाधिः ईश्वरप्रणिधानम्, सबीजनिर्बीजसमाध्यादिमुख्यविषयाः विवृताः। 'साधन' प्रकरणं नाम द्वितीये प्रथमसप्तविंशति सूत्रेषु योगस्याधिष्ठानं सांख्यसिद्धां तस्य तात्पर्यं स्मृत्वा, अष्ठविंशति सूत्रात् अष्टांगयोगविधानं विवृण्वन्, 'यमनियमासनप्राणायामप्रत्याहारधारणध्यानसमधयोऽष्टावंगानि'(यो.सू. 2 29) इति अष्टांगानां यमादि प्रत्याहारपर्यंतस्थूलयोगः बोधितः। अनंतरं 'विभूति' इति तृतीय प्रकरणं ध्यानयोगो नामधारणेन आरभ्य, धारण ध्यान समाधि स्वरूपाणि, संप्रज्ञातासंप्रज्ञातचित्तस्य परिणामं, इंद्रियाणां जयोपायं, तेषाम् इंद्रियाणां जयस्य फलं, विवेकेन संजनितं फलं, मोक्षप्रकारं च पतंजलि योगिपुंगवः उपचरितवान्। कैवल्याख्यां चतुर्थपादं जन्मादि पंचसिद्धैः आरभ्य चतुर्विधकर्मजाताय:, वासनाक्षयं, वासनाक्षयोपपत्तिः, वस्तुज्ञान भेदः, धर्ममेघसमाधिः, जीवन्मुक्तिः, कैवल्यस्वरूपादिविषयाणां मीमांसा नंतरं 'कैवल्यं स्वरूपप्रतिष्ठा' इति अंतिमसूत्रेण ग्रंथस्य समाप्तिर्भवति। ग्रंथस्याद्यंतयोः उपक्रमोपसंहारयोः कैवल्यफलप्रदाता असंप्रज्ञातसमाधिरेव स्मरितस्सन् ग्रंथे सर्वत्र तत्संबंधनिषयस्यैव चर्चितत्वात् केवलमेतत् साधन शास्त्रमेव। तस्मादेव The main interest of Patanjali is not metaphysical theorising, but the practical motive of indicating how Salvation can be attained by disciplined activity[11] पतंजलेः तात्पर्यं तत्वमीमांसां त्यक्त्वा मुख्यतः साधनमार्गे कैवल्यप्राप्तेः अनुष्ठेय पद्धतेः बोधनमेव इति राधाकृष्णादि पंडितवर्गस्य भावः समुचितः। Religion is not in books, not in theories, not in dogmas, not in talking, not even in reasoning, it is being and becoming[12] ग्रंथेषु वा सूत्रेषु वा विश्वासेषु वा संभाषणेषु वा तर्केऽपि वा नास्ति। अनुष्ठाने एव तादात्म्यमस्तीति विश्वास एव पतंजलिमुनिवरेण्यस्यादर्शो भूत्वा, अस्य शास्त्रस्योत्पत्तेः कारणमभवदिति स्पष्टम्।

योगशास्त्रम् – प्राणायामश्च

अष्टांगयोगांतर्गतविषयरहस्यानामनवगाहनेन The Yoga has come

› mean in the thoughts of many, posturing and nose closing[13] ासनप्राणायामावेव योगः इति बहूनामभिप्रायः। पतंजलेः अभिप्रायः तथा भावेऽपि केचन जनाः तथा मन्यंते। अतः The regulation of reath receives considerable emphasis, though Patanjali men- ons it as an optional measure[14] पतंजलिः प्राणायामं ऐच्छिक धानेन सूचितवान्। तथापि तस्य अधिकतरप्राधान्यं दत्तमिति पंडिताः ांताक्रांताः बभूवः। अपि च 195 सूत्रात्मके योगशास्त्रे 1.34, 2.49, 0, 51, 52 सूत्रेष्वेव अतिक्लुप्ततया प्राणायामविधानस्य सूचितत्वात्, स्याप्राधान्यत्वं योगे ग्राह्यम्। 'प्रच्छर्दनविधारणाभ्यां वा प्राणस्य'(यो.सू. .34) इति सूत्रे प्राणशब्दस्य 'श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः'(यो. .2.49) इति सूत्रेण श्वासप्रश्वासरूपमित्येव ग्राह्यमित्यनुमानितम्। अनेना यनैव 'कौष्ठ्यस्य वायोर्नासिकापुटाभ्यां प्रयत्नविशेषाद्वमनं प्रच्छर्दनं'(यो. T.1.34) नासिकायाः पुटद्वाराभ्यां प्रयत्नविशेषेण अंतरस्य वायोः रेचन ति भाष्यकारेण निर्वचनमुक्तम्। 'बाह्यस्य वायोराचमनं श्वासः, कौष्ठ् स्य वायोर्निःसारणं प्रश्वासः, तयोर्गतिविच्छेद उभयाभावः प्राणायामः' यो.भा.2.49) बाह्यवायोः पूरणं श्वासः, अंतर्वायोः, निस्सारणं प्रश्वासः। नयोः द्वयोः निरोध एव प्राणायामः इति तस्य निर्वचनम्।

'प्राण' शब्दस्य निर्वचनेऽपि पंडितलोके अभिप्रायभेदः दृश्यते। अरा इव रथनाभौ प्राणो सर्वं प्रतिष्ठितम्। ऋचो यजूंषि सामानि यज्ञः त्रं ब्रह्म च'(1.6) ऋग्यजुस्सामयज्ञब्रह्मक्षत्रादि सर्वमपि रथचक्रे अरा इव णे स्थितमिति, 'आत्मन एष प्राणो जायते'(3.3) आत्मनः प्राणः ायते इति प्रश्नोपनिषदि, 'प्राणो ब्रह्म'(छां.4.10.5) प्राण एव ब्रह्मेति, प्राणोह्येवैतानि सर्वाणि भवति'(छां.7.15.4) इति, 'प्राणो वै ब्रह्मेति'(बृ. .4.1.3, कौषि.ब्रा.2.1) च असंख्याक उपनिषत्प्रमाणानामाधारेण 'Prana ; not exactly breath. It is the name for the energy that is in the Iniverse[15] 'प्राण' नाम न तु संपूर्णश्वासा। विश्वगतशक्तेः नाम वेति उक्त्वा, स्वमि विवेकानंदः Whatever you see in the Uni- erse, whatever moves or works, or has life, is a manifestation f this Prana. The sum-total of the energy displayed in the uni- erse is called Prana[15] जगति यस्मिन्नपि चलनस्य सत्वेऽपि, जीवस्य

मेव प्राणः इति निर्वचनमुक्तवान्। इदं ज्ञात्वा 'The term Prana is the world seed'[16] प्राणः विश्वस्य बीजमिति, 'अव्याकृत एव प्राणः सर्व भावानामुत्पत्तेः प्राक् प्राण बीजात्मनैव सत्यं'(मांडूक्य.शंकरभाष्य.1.2) प्राण एव अत्याकृतः। सर्वसृष्टेः पूर्वं सत्वेन बीजात्मना प्राणः अस्तीति प्रमाणानामाधारेण कोकिलेश्वरशास्त्रिरपि उक्तवान्। तस्मात् कल्पात् प्रागव स्थायां प्राणः अव्यक्तरूपेण स्थित्वा कल्पारंभे व्यक्तं रूपं धरतीति तात्पर्यम्। पुनः It is this Prana that is manifested as motion the nervous motion in the Human beings or animals, and the same Prana that is manifesting as thoughts and so on[17] प्राण एव स्पंद नरूपेण व्यक्तोः भूत्वा, मृगनरादिजीवानां नाडीस्पंदनेन भावदिरूपैश्च परिण मतीति, Now this throwing out and restraing the Prana is what is called Pranayama[17] बहिः प्रदेशात् प्राणस्य निरोध एव प्राणायामः इति विवेकानंदस्य तात्पर्यम्। पतंजलिः प्राणायामस्य विवरणानि नोक्त वान्। तदनंतरयोगाचार्याः आसनप्राणायामानां प्राधान्यं दत्वा, अभिवृद्धिं च कृत्वा महावैज्ञानिकशास्त्ररूपेण कृतवंतः। तदनंतरभावजालं यथा विद्यमा नेऽपि 'First, you must remember that this Prana is not breath. But that which causes the motion of the breath, that which is the Vitality of the breath is the Prana'[17] प्रथमतः 'प्राणः' वायुः नेति ज्ञातव्यम्। श्वाससंचलनस्य यत् कारणं, तस्य कः आधारः सः प्राणः इति विवेकानंदस्योक्तिः। तथापि It is the energy that is in each body and it's most apparent manifestation is the motion of the lungs[17] तत् प्रतिशरीरेऽपि विद्यमानशक्तिः श्वासाशयस्पंदनमेव तस्य प्रत्य क्षरूपं। तस्मात् We begin by controlling the breath, as the easiest way of getting the control of Prana[17] प्राणस्य बंधनाय सुलभो पायेन श्वासनिरोधेन आरंभयामः इति विवेकानंदः समन्वयं कृतवान्।

योगशास्त्रम् - सांख्यं च

तस्मात् अष्टांगमध्यस्थ प्राणायामस्य मात्रमेव प्राधान्यं दत्वा, तस्मात् मुख्यं योगशास्त्रस्य तात्पर्यं समाधिं न विस्मरणीयम्। योगसौधस्य यमादयः प्रथमोपाय धर्माः, धर्ममेघादयः शिखराः। मध्यस्थाः आसानादि

ानपर्यंता: अंगा: अंतर्भागा:। सर्वाणि सोपानानि अधिगम्य कार्यस्य
ाध्यमेव योगसिद्धि: इत्युच्यते। अष्टांगानां एकस्य लुप्तेऽपि योग:
ासमग्र:, निष्फल: योगसिद्धिदूरश्च स्यात्। तस्मात् जागरूकतया व्यव
रणीय:।

'विशेषाविशेषलिंगमात्रा लिंगानि गुणपर्वाणि'(यो.सू.2.19) इत्यादि
त्राणामनुसारेण दृष्टं चेत् The Yoga system of Cosmogony is the
ame as that of the Sankhya[18] योगशास्त्रस्य सृष्टिसिद्धांत: सांख्य
िद्धांत एवेति रामप्रसादेन उक्तरीत्या, योग: सांख्यमेव सिद्धांतरूपेण स्वी
ृतत्वात् सांख्यप्रोक्तं व्यक्ताव्यक्तज्ञविज्ञानं, ब्रह्मसूत्रेषु श्रीशंकरादिभि:
द्वैतिभि: सृत्यधिकरणे निराकृतं सांख्यमिव, योगप्रत्युक्त्यधिकरणे 'एतेन
ोग: प्रत्युक्त:'(वे.सू.2.1.3) इति सूत्रे योगोऽपि पूर्वपक्ष: कृत:। तात्त्विक
ूपेण सांख्यसैव स्वीकृतत्वात् Yoga Shastra promulgated by Patan-
ali which also bears the name of the Sankhya Pravachana[19]
तंजलिप्रोक्तं योगशास्त्रं सांख्यप्रवचननाम्ना व्यवह्रीयते। तस्मात् The Yoga
utra designates itself Sankhya Pravachana exposition of
ankhya[20] सांख्यप्रवचनमिति नाम्ना योगशास्त्रं वक्तव्यं इति श्रीनिवास
ायंगार् महाशयोऽपि लिखितवान्। Closely allied Philosophy with
he Sankhya is the Yoga[21] सांख्येन सन्निहिततात्त्विकसंबंध: योगस्य
ास्तीति कीत्तु पंडितोऽपि उक्तवान्। तस्मात् योगशास्त्रस्य परमसिद्धांत:
ांख्यसिद्धांत एवेति निश्चय:।

तथापि The other philosophers, though occasionally dif-
ering from Patanjali in some philosophical points, have as a
ule, acceeded to his method of practice a desided consent[22]
ेषुचित् तात्त्विकविषयेषु केचन तत्वज्ञा: एकस्मिन् पतंजले: व्यतिरेकेण
िद्यमानेऽपि सर्वेऽपि तस्य साधनाविधानस्य ऐक्यं सम्मतिं प्रकटितवंत:
ति विवेकानंदस्य वचोरीत्या, सर्वसिद्धांतानामपि साधनापद्धतिं प्रसाद्य,
तंजलिमुनिचंद्रं महोपकारं कृतवानित्युक्तं युक्तमेव। Believe nothing
ntil you find it out for yourself[22] यावत्पर्यंतं प्रत्यक्षेन न पश्याम:
ावत् पर्यंतं न विश्वसनीयमिति अनुभूते: प्राधान्यं दत्वा, The Hindus
lone of Mankind, have penetrated behind the viel, and possess

loving, but wisdom itself[23] मानवेषु सर्वेषु हैंदवाः मात्रमेव भूमिका मधिगम्य, केवलज्ञानप्रियत्वं नाम परोक्षज्ञानादन्यत् ज्ञानमेव प्राप्तवंतः इति भारतावन्याः ख्यातिं संपादितवान् प्रथमयोगाचार्यः पतंजलियोगींद्रः।

केवलसाधनानुष्ठानजनितानुभवानंदानामाधारस्य योगानुभूतेः योगेत रापेक्षा अनावश्यकेति, तदेव समग्रं संपूर्णमिति च घंटापथेन 'योगेन योगो ज्ञातव्यो योगो योगात् प्रवर्तते। योऽप्रमत्तस्तु योगेन स योगी रमते चिरम्॥'(यो.भा.3.6) योगेन योगः ग्राह्यः। योगात् योगः व्यक्तो भवति। यः योगेन अप्रमत्तः सः योगी चिरं रमते। नित्यानंदविभूतिमाप्नोति इति व्यासभगवान् भाष्ये उक्तवान्। तस्मात् योगसाधनं संपूर्णं सापेक्षिकमेव।

योगसूत्रम् - ईश्वरः

कपिलप्रोक्ते सांख्यसिद्धांते अव्यक्तभावस्य ईश्वरस्य प्राधान्यं दत्वा, तस्य सृष्टेः मूलकारणत्वस्य नोक्तेऽपि असंप्रज्ञातादि समाध्यनुभूतेः ईश्वरानुग्रहस्याप्यावश्यकत्वात् कापिलं सांख्यमिति, पातंजलं सेश्वरसांख्य मिति च केषांचनाभिप्रायः। The system of Kapila, called the Sankhya or rationalistic, in it's original form, and in it's theistic development by Patanjali[24] स्वस्य सत्यस्वरूपे कपिलं अथवा सांख्यं यौक्तिकरूपेण, पातंजलं सेश्वररूपेण शुद्धतत्वशास्त्रं सर्वमपि भारता वन्यै प्रसादितवानिति जान्डेविस् पंडितः लिखति। तस्मादधिकविस्पष्ट वाक्येषु The Sankhya Philosophy declares itself fearlessly as un-Iswara, Lordless leaving to another Philosophy, the Yoga, to find in the old Sankhya system some place for an Iswara or a personal God[25] प्राचीनसांख्ये सगुणदैवरूपेण ईश्वरस्य स्थानं कल्पयितुं योगसिद्धांतस्यावकाशं ददन् सांख्यतत्वं निरीश्वरमिति निर्भयेन प्रकटितमिति माक्स्मुल्लर् पंडितस्य भावः। तथापि सांख्यं निरीश्वरमिति वचनं दोष भूयिष्टं भवति। अपि च योगदर्शनमपि सेश्वरमिति, लोपभूयिष्टमेव स्यात्। तथापि बाह्येन दृष्ट्वा ईश्वरभावलोपेन सांख्यं निरीश्वरमिति, ईश्वरपदभावेन योगदर्शनं सेश्वरमिति च न प्रतिपादनीये। कथमित्युक्ते? योगे विद्यमान ईश्वरः The Iswara, here referred to is not the Lord

भक्तपालकरूपेण मात्रमस्ति। योगशास्त्रे ईश्वरः सर्वज्ञबीजरूपेण कालातीतो भूत्वा प्राचीनगुरुवरेण्येति प्रकाशितवानपि The Iswara of Yoga Darsana therefore, is nither the reality behind Nature, nor any universal being in which Human selves find their unity[26] योगदर्शने ईश्वरस्य प्रकृतेः अधिष्ठानतत्वं विश्वात्मत्वं न स्तः। He is nither the ruler of nature nor the moral governer of the Universe.[26] सः विश्व पालकः न। प्रकृतेः नियंताऽपि न। सः Who was never touched by Klesha, the defects of ignorence[26] अज्ञानदोषक्लेशैः अस्पर्शनीयो भूत्वा, out of the multitude of Purushas in the Universe, he is special Purusha[26] विश्वे विद्यमानेषु असंख्याकपुरुषेषु ईश्वरः एकः विशिष्टपुरुषमात्रमेव। तस्मात् Yoga is in its tenets as athesitic as Sankhya[26] सांख्यमिव योगदर्शनमपि निरीश्वरमेवेति श्रीनिवास अय्यंगार् महाशयः लिखितवान्। He is nowhere spoken of as the creater, nor even as the consiousness permitting through all existence[27] ईश्वरः सृष्टिकर्तेति, सर्वेषां जीवानामधिष्ठानचैतन्यमिति च योगशास्त्रे कुत्रापि नोक्तम्। He is spoken of only as an object of devotion, devotion to whom leads to highest results[27] भक्तेः लक्ष्यरूपेण सः उक्तः। तस्मिन् भक्तिः सर्वोत्तमफलदायकमित्युक्तमिति गंगानाथ्झा पंडितः उक्तवान्। तस्मात् सांख्यं सिद्धांतशास्त्रं भूत्वा, The idea of super-natural beings may rouse to a certain extent the power of action in man, but it also brings spiritual decay. It brings dependence, it brings fear, it brings superstition[28] अमानुषपुरुषभावनं मानवहृदये किंचित् कर्मप्रवृत्तिः कृतेऽपि तत् आध्यात्मिकक्षीणत्वमपि करिष्यति। अस्वातंत्र्यं, भीतिं, मूढविश्वासमपि जनयिष्यति इति विवेकानंदेनोक्तरीत्या, सांख्यदर्शने ईश्वरपराधीनत्वमनुचितमिति भावेन ईश्वरस्य प्रशंसाभावेऽपि पातंजलदर्शनं साधनशास्त्रं भूत्वा, संप्राज्ञातासंप्रज्ञाताद्यनुभूतेः अवरोधानि विपर्ययादीनि निवारयितुं अभ्यासवैराग्यादीनामिव 'ईश्वरप्रणिदानाद्वा'(यो.सू. 1.23) ईश्वरप्रणिधानात् अपि साध्यमिति, ईश्वरं साधनोपायमात्रेण स्वी

कृतवान्। तस्मात् पातंजलं केवलं साधनशास्त्रमिति वचनं समुचितम्।

नामतात्पर्यम्

'योगः समाधिः'(यो.भा.1.1) योगो नाम समाधिः इति व्यासस्य निर्वचनम्। नाम 'युजर् योगे'(यो.भा.वाचस्पति.1.1) इति व्युत्पत्तेः अनुसारेण संयोगः इत्यर्थस्य सर्वेऽपि 'युज् समाधौ'(यो.भा.वा.1.1) इत्युत्पत्त्यनुसारेण योगः समाधिरिति अर्थः। The word Yoga comes from a Sanskrit root which means 'to go' 'to trance' 'to meditate'[29] समाधिस्थितिः विना ध्यानमिन्नमिति संस्कृतव्युत्पत्तेः योगपदजन्यमिति रामप्रसादः लिखितवान्। तस्मात् समाधिसाधननिरोधोऽपि योग एव। अतः योग शब्दस्य चित्तवृत्तिनिरोध एवेति परमार्थ इति 'योगः चित्तवृत्तिनिरोधः' (यो.सू.1.2) इति सूत्रस्याधारेण वाचस्पतिः उक्तवान्। तथैव राजमार्तांडकारो भोजदेवोऽपि 'युज् समाधौ'(1.1) इत्युत्पत्तिमेव स्वीकृतवान्। 'योगविषयस्य शास्त्रस्याधिकृतत्वं वेदितव्यं'(यो.भा.वा.1.1) अस्य शास्त्रस्य योगविषय एव अधिकृत इति ग्राह्यः। तस्मादेतच्छास्त्रं योगशास्त्रमिति 'दृश्यते तत्वमनेनेति दर्शनम्' इत्यर्थेन योगदर्शनमिति च प्रख्यातनामानि।

राजयोगः

अस्य शास्त्रस्य राजयोग इति नाम अपि प्रख्यातम्। हिरण्यगर्भ प्रोक्तमेतच्छास्त्रमेव न योगः, शिवप्रोक्तं नाम अन्यत् योगशास्त्रं दृश्यते। तत् तंत्रशास्त्रे प्रख्यातम्। शिवप्रोक्त योगः औपनिशदं न। खिलवैदिकमिति प्रतीतिः। हैरण्यगर्भयोगस्तु उपनिषदाधारकारणेन राजयोग इति प्रख्यातः।[30] अपि च To a later period belong the treatease on Hatha Yoga which are practical manuals giving rules on external aspects of Yoga, such as posture, breathing, diet and so on, as opposed to Raja Yoga of Patanjali, which is chiefly concerned with meditation[31] पातंजलराजयोगात् विरुद्धप्रकारेण आसनप्राणायामाहारादिबाह्ययोगांगानां नियमावळिविधायक हटयोगादिक संक्षिप्त ग्रंथाः अनंतरकाले उद्भूताः। राजयोगः मुख्यतः समाधिं विवृणोतीति राजयोगहठयोगयोः तारतम्यं माक्डोनेल् विशदीकृतवान्। The excercises of mental concen-

tration or in later commentaries distinguished by the name of Raja Yoga, the external expedients are called Kriya Yoga[32] बाह्योपकरणानि क्रियायोग इति, मानसिकध्यानाधिकसाधनानि राजयोग इति च, विचक्षणानंतरं व्याख्यातार: कृतवंत: इति तस्य भाव:। अमुं विषयमेव विचारयन् Yoga tatva speakes of four kinds of Yoga - Mantra Yoga, Laya Yoga, Hatha Yoga and Raja Yoga. Patanjali's Yoga is of the last kind, since it deals at length with the powers of stilling the mind and attaining Samadhi[33] मंत्र, लय, हठ, राजरूपै: योग: चतुर्विधा: इति योगतत्वं ज्ञापयति। समाधिप्राप्ते: मनस: उपशमनार्थं उपयुक्ता: शक्ति: विवृणोति। तस्मात् अंतिम: राजयोग एव पातंजलयोग: इति राधाकृष्णपंडित: लिखितवान्। अपि च साधनाव तारभूत: अनुभवस्वरूप: श्रीरामकृष्णपरमहंसदेवोऽपि एवमुक्तवान् There are two kinds of Yoga. Hatha Yoga and Raja Yoga. The Hatha Yogi practices phisical excercises, his goal is to acquire super-natural powers: Longivity and the eight psycic powers. But the aim of Raja Yoga is the attainment of devotion, ecastic love, knowledge and renunciation of these two Raja Yoga is the better[34] हठयोग: राजयोग: इति योग: द्विविध:। हठयोगी शारीरक व्यायामं करोति। अष्ठसिद्धय: चिरंजीवत्वं अमानुषशक्तयश्च तस्य गम्यं। तथापि राजयोगस्य गम्यं भक्तिज्ञानवैराग्यै: भक्त्युन्मत्ततया च वर्तते। अनयो: द्वयो: उत्तम: राजयोग:। पूर्ववाक्यानामनुसारेण पातंजलं केवल समाधिरिति परमावधिना, चित्तवृत्तिनिरोध एव योगमार्ग: इत्युक्तत्वात् राज योग: प्रशस्त नाम्न: समुचित एव। अपि च पतंजलिमहर्षे: प्रोक्तत्वात् पातंजलमिति नाम्ना प्रसिद्धम्। पूर्वोक्तरीत्या सेश्वरसांख्यमिति, सांख्यसिद्धां तमेव स्वीकृत्य, तत् सिद्धे: साधनोपायानां विवृतत्वात् 'सांख्यप्रवचनमिति' च विविधरीतिभि: योगशास्त्रं व्यवह्रीयते।

01. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.249
02. Pt. N. Bhashyacharya : The Age of Patanjali, P.22
03. Dr. S. Radhakrishnan : Indian Philosophy, Vol.2, P.338
04. Pt. N. Bhashyacharya : The Age of Patanjali, P.24
05. Swami Vivekananda : The Complete Works, Vol.3, P.395
06. F. MaxMuller : The Six Systems of Indian Philosophy, P.84

07. Dr. S. Radhkrishnan : Indian Philosophy, Vol.2, P.338
08. A.A. Macdonell : India's Past
09. Prof. S. Das Gupta : The History of Indian Philosophy, P.230
10. Ramaprasad : Patanjali Yoga Sutras, P.5
11. Dr. S. Radhkrishnan : Indian Philosophy, Vol.2, P.338
12. Swami Vivekananda : The Complete Works, Vol.3, P.395
13. Rama Prasad : Patanjali Yoga Sutras, P.VIII
14. Dr. S. Radhkrishnan : Indian Philosophy, Vol.2, P.249
15. Swami Vivekananda : The Complete Works, Vol.1, P.223
16. Prof. Kokileswara Shastri : A Realistic Interpretation of Sankára Vedanta, P.70
17. Swami Vivekananda : The Complete Works, Vol.1, P.223, 267
18. Rama Prasad : Patanjali Yoga Sutras, P.5
19. Madhavacharya : Sarvadarsana Sangraha (Telugu)
20. V.T. Srinivas Iyangar : Oulines of Hindu Philosophy, P.113
21. Prof. A.B. Kieth : A History of Sanskrit Literature, P.472
22. Swami Vivekananda : The Complete Works, Vol.1, P.223
23. Douglas Ainslie : Preface, Science of Religion
24. John Davis : Sankhya Karika, Preface
25. F. Max Muller : The Six Systems of Indian Philosophy, P.9
26. V.T. Srinivasa Iyangar : Outlines of Hindu Philosophy, P.113
27. Prof. Ganganath Jha : Yoga Darsana, Preface, P.1
28. Swami Vivekananda : The Complete Works, Vol.1, P.223
29. Rama Prasad : Patanjali Yoga Sutras, P.5
30. Sri Nirvikalpananda Swami : Bharateeya Tatwa Shastram, Part I (Telugu)
31. Prof. A.A. Macdonell : India's Past
32. Prof. A.A. Macdonell : A History of Sanskrit Literature, P.385
33. Dr. S. Radhakrishnan : Indian Philosophy, vol.2, P.338
34. Sri Ramakrishna Paramahamsa : Gospel of Sri Ramakrishna, P.168

पातंजल योगसूत्राणि

1. समाधि पादः

1. अथ योगानुशासनम्
2. योगश्चित्तवृत्तिनिरोधः
3. तदा दृष्टुः स्वरूपेऽवस्थानम्
4. वृत्तिसारूप्यमितरत्र
5. वृत्तयः पंचतय्यः क्लिष्टाक्लिष्टाः
6. प्रमाणविपर्ययविकल्पनिद्रास्मृतयः
7. प्रत्क्षनुमानागमाः प्रमाणानि
8. विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्
9. शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः
10. अभावप्रत्ययालंबना वृत्तिर्निद्रा
11. अनुभूतविषयासंप्रमोषः स्मृतिः
12. अभ्यासवैराग्याभ्यां तन्निरोधः
13. तत्र स्थितौ यत्नोभ्यासः
14. स तु दीर्धकालनैरंतर्यसत्कारासेवितो दृढभूमिः
15. दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्
16. तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्
17. वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः
18. विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषो अन्यः
19. भवप्रत्ययो विदेहप्रकृतिलयानाम्
20. श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्
21. तीव्रसंवेगानामासन्नः
22. मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः
23. ईश्वरप्रणिधानाद्वा
24. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः
25. तत्र निरतिशयं सर्वज्ञबीजम्
26. पूर्वेषामपि गुरुः कालेनानवच्छेदात्

28. तज्जपस्तदर्थभावनम्
29. ततः प्रत्यक्चेतनाधिगमोऽप्यंतरायाभावश्च
30. व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानव स्थित.
त्वानि चित्तविक्षेपास्तेंतरायाः
31. दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः
32. तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः
33. मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावना तश्चित्तप्रसादनम्
34. प्रच्छर्दनविधारणाभ्यां वा प्राणस्य
35. विषयती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनी
36. विशोका वा ज्योतिष्मती
37. वीतरागविषयं वा चित्तम्
38. स्वप्ननिद्राज्ञानालंबनं वा
39. यथाभिमतध्यानाद्वा
40. परमाणुपरममहत्वांतोऽस्य वशीकारः
41. क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थदंजनता समापत्तिः
42. तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः
43. स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का
44. एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता
45. सूक्ष्मविषयत्वं चालिंगपर्यवसानम्
46. ता एव स बीजः समाधिः
47. निर्विचारवैशारद्ये अध्यात्मप्रसादः
48. ऋतंभरा तत्र प्रज्ञा
49. श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्
50. तज्जः संस्कारो अन्यसंस्कारप्रतिबंधी
51. तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः

2. साधन पादः

01. तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः
02. समाधि भावनार्थः क्लेशतनूकरणार्थश्च

03. अविद्यास्मिता रागद्वेषाभिनिवेशाः क्लेशाः
04. अविद्या क्षेत्रमुत्तरेषां प्रसुप्त तनुविच्छिन्नोदाराणां
05. अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या
06. दृग्दर्शनशक्त्योरेकात्मतेवास्मित
07. सुखानुशयी रागः
08. दुःखानुशयी द्वेषः
09. स्वरसवाही विदुषोऽपि तथा रूढो अभिनिवेशः
10. ते प्रतिप्रसवहेयाः सूक्ष्माः
11. ध्यानहेयास्तद्वृत्तयः
12. क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः
13. सति मूले तद्विपाको जात्यायुर्भोगाः
14. ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्
15. परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः
16. हेयं दुःखमनागतम्
17. द्रष्टृदृश्ययोः संयोगो हेयहेतुः
18. प्रकाशक्रियास्थितिशीलं भूतेंद्रियात्मकं भोगावपवर्गार्थं दृश्यम्
19. विशेषाविशेषलिंगमात्रालिंगानि गुणपर्वाणि
20. द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः
21. तदर्थ एव दृश्यस्यात्मा
22. कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्
23. स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः
24. तस्य हेतुरविद्या
25. तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्
26. विवेकख्यातिरविप्लवा हानोपायः
27. तस्य सप्तधा प्रांतभूमिः प्रज्ञा
28. योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः
29. यमनियमासनप्राणायामप्रत्याहारधारणध्यानसमाधयोऽष्टवांगानि
30. अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः
31. जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं
32. शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः
33. वितर्कबाधने प्रतिपक्षभावनम्

34. वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वक मृदुमध्यादि मात्रा दुःखाज्ञानानंतफला इति प्रतिपक्षभावनम्
35. अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः
36. सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्
37. अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्
38. ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः
39. अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः
40. शैचात्वंगजुगुप्सा परैरसंसर्गः
41. सत्वशुद्धिसौमनस्यैकाग्रेंद्रियजयात्मदर्शनंयोग्यत्वानि च
42. संतोषादनुत्तमः सुखलाभः
43. कार्येंद्रियसिद्धिरशुद्धिक्षयात्तपसः
44. स्वाध्यायादिष्टदेवतासंप्रयोगः
45. समाधिसिद्धिरीशरप्रणिधानात्
46. स्थिरसुखमासनम्
47. प्रयत्नशैथिल्यानंतसमापत्तिभ्याम्
48. ततो द्वंद्वाऽनभिघातारः
49. तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः
50. बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः
51. बाह्याभ्यंतरविषयाक्षेऽपी चतुर्थः
52. ततः क्षीयते प्रकाशावरणम्
53. धारणासु च योग्यता मनसः
54. स्वविषया संप्रयोगे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहारः
55. ततः परमावश्यतेंद्रियाणाम्

3. विभूति पादः

01. देशबंद्धश्चित्तस्य धारणा
02. तत्र प्रत्ययैकतानता ध्यानम्
03. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः
04. त्रेयमेकत्र संयमः

06. तस्य भूमिषु विनियोगः
07. त्रयमंतरंगं पूर्वेभ्यः
08. तदपि बहिरंगं निर्बीजस्य
09. व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तावैयौनिरोध परिणामः
10. तस्य प्रशांतवाहिता संस्कारात्.
11. सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः
12. ततः पुनः शांतोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः
13. एतेन भूतेंद्रियेषु धर्मलक्षणावस्था परिणामा व्याख्याताः
14. शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी
15. क्रमान्यत्वं परिणामान्यत्वे हेतुः
16. परिणामत्रयसंयमादतीतानागतज्ञानं
17. शब्दार्थाप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतऋतज्ञानं
18. संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम्
19. प्रत्ययस्य परचित्तज्ञानम्
20. न च तत्सालंबनं तस्याविषयीभूतत्वात्
21. कायरूपसंयमातद्ग्राह्यशक्तिस्थंभे चक्षुष्प्रकाशसंप्रयोगे अंतर्धानम्
22. सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञानमरिष्ठेभ्यो वा
23. मैत्र्यादिषु बलानि
24. बलेषु हस्तिबलादीनि
25. प्रवृत्या लोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्
26. भुवनज्ञानं सूर्ये संयमात्
27. चंद्रे ताराव्यूहज्ञानम्
28. धृवे तद्गतिज्ञानम्
29. नाभिचक्रे कायव्यूहज्ञानम्
30. कंठकूपे क्षुत्पिपासा निवृत्तिः
31. कूर्मनाड्यां स्थैर्यम्
32. मूर्धज्योतिषि सिद्धदर्शनम्
33. प्रातिभाद्वा सर्वम्
34. हृदये चित्तसंवित्
35. सत्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात् स्वार्थ

संयमात् पुरुषज्ञानम्

36. ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायंते

37. ते समाधावुपसर्गाव्युत्थाने सिद्धयः

38. बंधकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः

39. उदानजयाज्जलपंककंटकादिष्वसंग उत्क्रांतिश्च

40. समानजयाज्वलनम्

41. श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रोत्रम्

42. कायाकाशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्

43. बहिरकल्पितवृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः

44. स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वसंयमाद्भूतजयः

45. ततो अणिमादि प्रादुर्भावः कायसंपत्तधर्मानभिघातश्च

46. रूपलावण्य बल वज्र संहननत्वानि कायसंपत्

47. ग्रहणस्वरूपास्मितान्वयार्थवत्संयमादिंद्रियजयः

48. ततो मनोजवित्वं विकरणभावः प्रधानजयश्च

49. सत्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च

50. तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्

51. स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात्

52. क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम्

53. जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः

54. तारकं सर्वविषयं सर्वथा विषयमक्रमं चेति विवेकजं ज्ञानम्

55. सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति

4. कैवल्य पादः

01. जन्मौषधि मंत्र तपः समाधिजाः सिद्धयः

02. जात्यंतरपरिणामः प्रकृत्यापूरात्

03. निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्

04. निर्माणचित्तान्यस्मितामात्रात्

05. प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम्

06. तत्र ध्यानजमनाश्रयम्

07. कर्मा शुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्

08. ततत्सद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्

09. जातिदेशकालव्यवहितानामप्यानंतर्यं स्मृतिसंस्कारयोरेकरूपत्वात्
10. तासामनादित्वं चाशिषो नित्यत्वात्
11. हेतुफलाश्रयालंबनैः संगृहीतत्वादेषामभावे तदभावः
12. अतीतानागतं स्वरूपतो अस्त्यध्वभेदाद्धर्माणाम्
13. ते व्यक्तसूक्ष्मा गुणात्मानः
14. परिणामैकत्वाद्वस्तुतत्वम्
15. वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पंथाः
16. न चैकचित्ततंत्रं वस्तुतदप्रमाणकं तदा किं स्यात्
17. तदुपरागापेक्षीत्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्
18. सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्
19. न तत्स्वाभासं दृश्यत्वात्
20. एकसमये चोभयानवधारणम्
21. चित्तांतरदृश्ये बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च
22. चित्तेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्
23. द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्
24. तदसंख्येयवासनाभिश्चित्रमपि परार्थ संहत्यकारित्वात्
25. विशेषदर्शिन आत्मभावभवनानिवृत्तिः
26. तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्
27. तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः
28. हानमेषां क्लेशवदुक्तम्
29. प्रसंख्यानेप्यकुशीदस्य सर्वथा विवेकख्यातेर्धर्ममेघःसमाधिः
30. ततः क्लेशकर्मनिवृत्तिः
31. तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्याज्ज्ञेयमल्पम्
32. ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्
33. क्षणप्रतियोगी परिणामापरांतनिर्ग्राह्यः क्रमः
34. पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चिति शक्तिरिति

योगतत्वम्

Patanjali systematised the conceptions of the Yoga and ›t them forth on the background of the metaphysics of the ankhya (Indian Philosophy, Vol.2, P.342) योगभावान् क्रमेण ावृण्वन् पतंजलिः, सांख्यसिद्धांतमाधारेण स्वीकृतवान् इति राधाकृष्णपंडि स्य वचनानुसारेण योगशास्त्रेण सांख्यतत्वादः स्वीकृतः। तस्मात् 'विशेषा शेषलिंगमात्रालिंगानि गुणपर्वाणि'(यो.सू.2.19) इत्यादि सूत्रेषु 'सांख्य गादयः'(यो.भा.4.21) इति भाष्यपाठे, अपि चानेकसंदर्भेषु प्रस्फुटतया ांख्यशब्दस्मरणेन सह सांख्यसिद्धांतमनुवदन् योगशास्त्रं कपिल, पंचशिख, गीष्व, वार्षगण्यादि योगिपुंगवानां नामस्मरणेन सह तेषां वाक्यानि प्रमा ानीति स्वीकृत्य, स्तौति योगशास्त्रम्। अतः सिद्धांतिकतया योगः सांख्य मेवेति निस्संदेहः। तथापि सर्वेषु (195) सूत्रेषु स्वल्पसंख्याकसूत्राणि द्धांतप्रतिपादनायोपयुक्ते, अधिकसंख्या साधन, अनुभव, विषयमीमांसा मेव निमग्ना। अतः शास्त्रदृक्पथः न सिद्धांतिकः, साधनपरमेवेति पूर्वमे क्तम्। तथापि 'यथा चिकित्साशास्त्रं चतुर्व्यूहं रोगो रोगहेतुरारोग्यं भैष मिति'(यो.भा.2.15) 'एवमिदमपि शास्त्रं चतुर्व्यूहमेव' तथैव एतच्छास्त्रं ुर्विधम्। कथमित्युक्ते? 'संसारः संसारहेतुर्मोक्षो मोक्षोपाय इति'(यो.भा. 15) इतिरीत्या चतुर्विधमेतच्छास्त्रम्। तस्मिन् 'दुःखबहुलः संसारो हेयः ानपुरुषयोः संयोगो हेयहेतुः, संयोगस्यात्यंतकीनिवृत्तिर्हानं, हानोपायः यग्दर्शनं'(यो.भा.2.15) दुःखबहुलत्वकारणात् संसारः हेयो भवति। ानपुरुषयोः संयोग एव हेयकारणम्। संयोगस्य निवृत्तिरेव निरासः। यग्दर्शनमेव उपायः इति व्यासस्य वाक्यानुसारेण परमावधेः कैवल्य तेः साधनायाः आवश्यकता यावदावश्यकः, तथैव सिद्धांतस्यावश्य वात्, साधनाभागं संपूर्णतया विवृण्वन्, साधनादृष्टिं कुत्र केंद्रीकरणीय ते सिद्धांतविषयानपि पतंजलिः अस्मिन् योगशास्त्रे क्लुप्तं विवृतवान्। ः त्रयमपि योगसिद्धांत भागं किंचित् ग्रहीतुं यत्नं करिष्यामः।

पुरुष प्रधानविषयः

'अकारः स्वरूपं सदा विशुधिः शीलमौदासीन्यं विद्या चैतन्यं'

'विवेकः शुद्धः'(यो.भा.वा.1.16) पुरुषः विवेकः शुद्धः, 'पुरुषः शुद्धः प्रसन्नः केवलोनुपसर्गः'(यो.भा.1.29) पुरुषः शुद्धः प्रसन्नः, केवलः, दुःख रहितः, 'पुरुषमुदासीनः'(यो.भा.वा.2.17) पुरुषः उदासीनः इत्यादि वाक्यैः पुरुषः स्वरूपतः विशुद्धः, उदासीनः चैतन्यमात्रश्चेति विदितः भवति। उदासीनत्वे एव प्रसन्नता तस्मात् दुःखाभावश्च सिद्ध्यतः। तस्मात् सः 'निष्क्रियः पुरुषः'(यो.भा.1.9) 'निष्क्रिये क्षेत्रज्ञे'(यो.भा.2.17) इत्यादीनां वाक्यानामनुसारेण पुरुषः निष्क्रियो भवति। यदा निष्क्रियत्वं वर्तते, तदा सः 'अनुत्पत्तिधर्मा पुरुषः'(यो.सू.4.18) इति उक्तरीत्या जन्माद्यवस्थारहि तस्सन् 'पुरुषस्यापरिणामित्वात्'(यो.सू.4.18) 'अपरिणामिनि'(यो.भा.2.17, 4.22) इत्यादि वचनानुसारेण परिणामानामतीतो भूत्वा, 'यस्मिन् परि णम्यमाने तत्वं न विहन्यते तन्नित्यम्'(यो.भा.4.33) इति परिणामिनित्य मपि न भूत्वा, 'द्वयी चेयं नित्यता कूटस्थनित्यता परिणामिनित्यता' इति उक्तयोः द्वयोः 'तत्र कूटस्थनित्यता पुरुषस्य'(यो.भा.4.33) व्यासप्रोक्तरीत्या कूटस्थनित्यः स्भावतः नः प्रच्युतः, नित्यः पुरुषः आसीत्। तथा निर्वि कारत्वात् 'शुद्धः कूटस्थनित्यतयोदव्ययरहितः'(यो.भा.वा.1.16) शुद्धो नाम कूटस्थः, जननमरणरहितः, 'प्रसन्नः क्लेशवर्जितः'(यो.भा.वा.1.16) क्लेश विरहितः प्रसन्नश्च। 'केवलो धर्माधर्मोपेतः'(यो.भा.वा.1.16) धर्माधर्मातीत केवलो भूत्वा, प्रकाशन्, 'पुरुषः शुद्धो अनंतः'(यो.भा.वा.1.16) अनंत रूपो पुरुषः वर्तते। तस्मात् स्थूलत्वं किंचिदपि नास्ति। तस्मात् सः 'पुरुषः सूक्ष्म इति'(यो.भा.1.45) अतिसूक्ष्मतया विराजते। तथापि 'इदम नादि दुःखश्रोतः'(यो.भा.2.15) इति उक्तरीत्या इयं दुःखप्रवंती अनादी। अतः 'अनादविद्या'(यो.भा.1.4) 'मोहरूपा अविद्या'(यो.भा.2.24) इत्युक्ता अविद्यया पुरुषः आकर्षितो भवति। तस्मात् हेयस्य हेतुः 'प्रधानपुरुष संयोगः'(यो.भा.2.15) सिध्यति।

अनंतरं प्रधनस्य विषयोऽपि किंचित् परिशीलनीयः। प्रधानं नाम 'लिंगमात्रस्याप्यलिंगं सूक्ष्मो विषयः। न चालिंगात्परं सूक्ष्ममस्ति।'(यो.भा.1.45) लिंगात् सूक्ष्मलिंगं। अलिंगात् सूक्ष्मतरं नास्तीति, 'सूक्ष्मविषयत्वं चालिंगपर्यवसानम्'(यो.सू.1.45) अलिंगेन सूक्ष्मविषयत्वं संपूर्णं स्यात् इत्य नेन सूत्रेणोक्तरीत्या, प्रधानं अतिसूक्ष्मतत्वम्। तदेव 'प्रधीयत अधीयते विश्वं कार्यमेभिः'(यो.भा.वा.2.18) इति व्युत्पत्तिप्रकारेण सर्वस्य विश्वस्य पोषितत्वात् अनादेः सर्गस्य अधिष्ठानेन अविद्यासंबंधेन पुरुषसन्निधिमा

प्नोति। प्रधानाविद्ययोः संबंधः कः? इति परिशीलयामः। सर्गांतरे स्व चित्तेन सः अविद्या प्रधाने लयीभूता। सर्गारंभे प्रधानं 'तत्तत्पुरुषसंयोगीनीं तादृशमेव बुद्धिं सृजति'(यो.भा.वा.2.54) तत्तत्पुरुषसंबंधीनीं बुद्धिं पूर्ववत् सृजति। 'एवं पूर्वपूर्वसर्गेष्वित्यनादित्वात्'(यो.भा.वा.2.24) 'अविद्या स्वचि त्तेन सह, निरुद्धा स्वचित्तस्योत्पत्तिबीजम्'(यो.भा.2.23) 'प्रधीयते जन्यते विकारजातमनेनेति प्रधानम्'(यो.भा.वा.2.23) इत्युक्तरीत्या, सर्वस्योत्पादन कारणं भवति प्रधानम्। 'एते गुणाः प्रधानशब्दवाच्या भवंति'(यो.भा.वा. 2.18) इति वाचस्पतेः वाक्यानामनुसारेण प्रधानमेव त्रिगुणरूपम्। तथापि 'सत्वरजस्तमसां साम्यावस्था न क्वचित् पुरुषार्थ उपयुज्यत'(यो.भा.वा.2. 19) नाम आदौ 'निस्सत्ता सत्ता' (यो.भा.2.19) 'अलिंगावस्थायां न पुरुषार्थो हेतुः'(यो.भा.2.19) इत्युक्तत्वात् 'नासौ पुरुषार्थकृतेति नित्याख्य यते'(यो.भा.2.19) न पुरुषार्थकृतत्वात् लिंगं नाम प्रधानं नित्यमित्याख्या यते। तथापि प्रधानविकाराणां 'त्रयाणां त्ववस्थाविशेषाणामादौ पुरुषार्थता कारणं भवति'(यो.भा.2.19) लिंगमात्राविशेषविशेषाणां त्रयाणां प्रथमकारणं पुरुषार्थता भवति। तदैव 'अर्थो हेतुर्निमित्तं कारणं भवति'(यो.भा.2.19) अर्थत्वं हेतुत्वं निमित्तकारणं च भवति। तस्मात् प्रस्तुतं प्रधानं अकारण मिति निर्णयम्। तदेव अलिंगमित्युक्तमिति विस्पष्टम्।

पूर्वोक्तरीत्या लिंगमात्रं नाम महत् 'सत्तामात्रेण' पुरुषार्थतायाः सत्वात् तस्मिन्नंतर्गतेन अविद्याप्राबल्येन चिद्रूपस्य पुरुषस्य प्रतिबिंबः बुद्धिः नाम महत् संभवति। इत्थं संभूतः पुरुषप्रधानयोः संबंधहेयः 'द्रष्टृदृश्ययोः संयोगः'(यो.सू.2.17) इति 'पुरुष बुद्धि'(यो.भा.वा.1.3) संयोगः इति, 'प्रकृति पुरुषसंयोग'(यो.भा.1.24) इति, 'सत्वपुरुष'(यो.भा.2.2) संबंधः इति च बहुविधैः व्यवह्रीयते। सामान्यदृष्टेः एतानि पदानि सर्वाणि पर्याय पदानामिव गोचरेऽपि, विशेषदृष्टेः व्यत्यस्ताः एव। पूर्व ग्रंथे उक्तरीत्या पुरुषः प्रधानं वा यथातथा न तु भोगापवर्गकारणे तथापि 'यथा जयः पराजयो वा योधृषु वर्तमानः स्वामिनि व्यपदिश्यते'(यो.भा.1.24) इत्युक्त रीत्या, पुरुषप्रधानयोः संबंधः अन्वीयते। त्रिगुणविशिष्टे प्रधाने साम्या वस्थायः अनाद्यविद्यासंजनितसंचलनेन गुणाः 'परिणामिनित्यता गुणानाम्' (यो.भा.4.33) इत्युक्तरीत्या परिणामिनित्यत्वात्, तेषां विषयपरिणाम संभवे, सत्वाधिक्यतया महत प्रधानात उत्पद्यते। तस्याः एव बुद्धिः इति,

त्वात् सत्ता इति, 'तन्मात्रं तन्महत्तत्वं'(यो.भ.वा.2.19) तदेव महत् इति, सत्वप्राधान्यलक्षणयुक्तत्वात्, सत्वमिति च बहुविधैः बुद्धिः उच्यते।

इयं बुद्धिः 'प्रकाशः सत्वस्य धर्मः'(यो.भा.2.18) प्रकाशलक्षण युतसत्वगुणप्रधानेन प्रकाशभूयिष्टस्सन् 'शांत'(यो.भा.वा.1.4) स्थितेः 'सत्वं प्रकाशसुखात्मकः प्राधानिकः परिणामविशेषः'(यो.भा.3.35) सत्वं नाम बुद्धिः प्रकाशसुखस्वरूपेण मुख्यतः परिणामविशेषत्वात्, 'स्वतंत्रमपि'(यो. भा.2.17), 'वस्तुतो बुद्धिसत्वं स्यादभवेत् स्वयं प्रकाशम्'(यो.भा.वा.2. 17), 'तयोर्दृग्दर्शनशक्त्योरनादिरर्थकृतः'(यो.भा.2.17), 'न तु बुद्धिबोध रहितो अतो अस्य पुरुषस्य बुद्धिबोधः स्वभावः सवितुरिव प्रकाशः'(यो. भा.वा.1.3) इत्युक्तत्वात् 'सन्निधिमात्रोपकारिणोऽयस्कांतमणिकल्पाः' सन्निधि मात्रेणैव पुरुषार्थानामुपकारिणी भूत्वा, अयस्कांतइव समाकर्ष्य, 'यथा हि चंद्रमसः'(यो.भा.वा.4.22) जले चंद्रस्य प्रतिबिंब इव, 'चंद्रमसइव स्वच्छ सलिलप्रतिबिंबितस्य'(यो.भा.वा.3.35) स्वच्छ जले शशिनः प्रतिबिंब इव, पुरुषं आत्मनि दर्पणे प्रतिबिंब इव, 'चित्तेः स्वबुद्धिसंवेदनं बुद्धेस्तदाकारा पत्तौ चिति प्रतिबिंबाधारतया तद्रूपताप्तौ सत्याम्'(यो.भा.वा.4.22) पुरुषस्य स्वबुद्धिग्रहणं, बुद्धेः पुरुषाकृतेः प्राप्ते नाम आत्मनि पुरुषं प्रतिबिंबी कृत्य, आकृतिं प्राप्त इव, पुरुषस्य प्रतिबिंबं बुद्धिः स्वीकरोति।

तथा प्रतिबिंबोद्भवपर्यंतं स्वतंत्रावस्थायां स्थितः पुरुषः 'द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः'(यो.भा.2.17) इति, 'न पुरुषो बुद्धेः संवेदी'(यो. भा.2.20) इति; 'बुद्धौ सन्निधिमात्रेणैव पुरुषस्य द्रष्टृत्वं'(यो.भो.2.20) इति च बहुविधैः वाक्यैः सः दृक् इति, द्रष्टेति च व्यवह्रियते। सः 'बुद्धेश्चैतन्यबिंबो ग्राहेण चैतन्य शांताद्याकाराध्यारोपश्चंद्रमस इव'(यो.भा. वा.3.35) बुद्धेः पुरुषप्रतिबिंबे, जलचंद्रन्यायेन शांत, घोर, मूढ, चित्त वृत्तयः पुरुषस्याध्यारोपाः भवंति। तथापि सत्यतः 'यथा निर्मले जले संक्रांतोऽपि चंद्रमाः संक्रांत प्रतिबिंबतया संक्रांत इव, एवमत्राप्यसंक्रांतापि संक्रांतप्रतिबिंबा चिति शक्तिः संक्रांतेव'(यो.भा.वा.2.20) इति, 'पुरुषस्य हि चैतन्यं स्वरूपमनौपाधिकम्'(यो.भा.वा.1.3) 'शांतादिरूप औपाधिको हि स स्फटिकस्येव स्वभाव स्वच्छ धवळस्य जपाकुसुमसन्निधानोपाधिररुणिमा' (यो.भा.वा.1.13) 'न खलु शुक्तिकायाः प्रमाणविपर्ययज्ञानगोचरत्वेऽपि स्वरूपोदयव्ययौ भवतः'(यो.भा.वा.1.3) 'न जातु कूटस्थनित्या चिति

शक्तिः स्वरूपाच्यवते'(यो.भा.वा.1.3)।

एवं प्राकारैः कल्पित पुरुषबुद्धयोः संयोगज अन्योन्याध्यास फलितेन 'अपिरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामन्यर्थे प्रति संक्रांतेव तद्वृत्तिमनुपतीति'(यो.भा.4.22) पुरुषः 'एतेन ग्रहणधारणोहापोह तत्वज्ञानाभिनिवेशा बुद्धौ वर्तमानाः पुरुषे अध्यारोपित सद्भावाः स हि तत्फलस्य भोक्तेति'(यो.भा.2.18) च उच्यते। बुद्धिस्तु 'स्वरूपं तु पररूपेण'(यो.भा.2.21) पररूपं धृत्वा, 'चित्तं सर्वार्थग्रहणसमर्थं भवति'(यो.भा. 4.22) चेतनमिव प्रवर्तते। एवं उभावपि 'अनादिरर्थकृतः संयोगः'(यो.भा. 2.17) अनादिपुरुषार्थकृतसंयोगे बद्धास्सन्, 'हेयहेतु'(यो.सू.2.17) बंधव्ये निबद्धस्सन्, 'व्युत्थाने यश्चित्तवृत्तयस्तदविष्टवृत्तिः पुरुषः'(यो.भा.1.4) बुद्धिगतचित्तवृत्तिषु व्युत्थानस्थितिर्नाम सर्गे लयो भूत्वा 'दृश्यत्वेन खं भवति पुरुषस्य स्वामिनः'(यो.भा.1.4, 2.17) स्वामिनः पुरुषस्य चित्तः दृश्यत्वेन स्वाम्यं भवति। नाम 'पुरुषः स्वामी दृश्येन स्वेन'(यो.भा.2.23) दृश्यत्वेन बुद्धिः स्वाम्यमिव, पुरुषः स्वामी च भवतः इति तात्पर्यम्। 'अत एव च शब्दाद्याकारपरिणतबुद्धिः सत्वोपनीतां शब्दादीन् भुंजानः स्वामी भवति द्रष्टा'(यो.भा.वा.2.17) तस्मात् बुद्धि सत्वविकाराणां शब्दादीनां भोक्ता, द्रष्टा एव स्वामी भवति सति, 'तादृशं चास्य बुद्धिसत्वस्वं भवति'(यो.भा.वा.2.17) तत्संबंधी बुद्धिः तस्य स्वाम्यं भवतीति वाक्यानुसारेण एतत् संयोगानंतरं द्वयोः स्वाम्यस्वामिभावसंबंधेन सः 'स हि तत् फलस्त्यभोक्तेति'(यो.भा.1.24), 'अस्ति च पुरुषस्य भोक्तृशक्तिश्चित्तस्य भोग्यशक्तिः'(यो.भा.वा.1.4, 2.6) भोक्तृभोग्यभावसंबंधः 'दृग्दर्शनशक्त्योः' (यो.भा.2.6) नाम 'पुरुषो दृक्शक्तिर्बुद्धिर्दर्शनशक्तिः'(यो.भा.2.6) इत्युक्तत्वात् दृग्दर्शनभावसंबंधः 'द्रष्टा चिद्रूपः पुरुषः दृश्यं बुद्धिसत्वम्'(यो.भा. 2.17) इति, 'द्रष्टृदृश्ययोः संयोगः'(यो.सू.2.17) इत्यादि वाक्यैः द्रष्टृ दृश्य भावसंबंधः इति च बहुविधैःएकार्थःविवृतः। बुद्धिसत्वसंयोगजनितेन 'युत्थानं' नाम अनादि सर्गः स्पष्टं भवति। कथमिति परिशीलयामः।

सृष्टिचिंतनम्

'तत्र कूटस्थनित्यता पुरुषस्य'(यो.भा.4.33) पुरुषस्य कूटस्थनित्यत्वात् सः अनादि भवति। 'नालिंगावस्थायामादौ पुरुषार्थता कारणं

भवति' (यो.भा.2.19) इत्युक्तत्वादपि अनादि भवति। 'दृग्दर्शनशक्त्यो र्नित्यत्वादनादिः संयोगः'(यो.भा.2.22) दृग्दर्शनशक्त्योः अनादित्वात् संयोगोऽपि अनादि स्यात्। अपि च दृग्दर्शनशक्ति अनाद्यौ। 'अनाद्यविद्या'(यो.भा.वा.1.4) अविद्यापि अनादि। 'अविद्यावासनयोश्च संतानो बीजांकुर संतानवत् अनादिः'(यो.भा.वा.1.4) अविद्यावासनयोः संबंधः बीजांकुर न्यायेन अनादि। 'इदमनादि दुःखश्रोतः'(यो.भा.2.15) इदं दुःखप्रवंति अनादि। 'संसारनित्यत्वं'(यो.भा.वा.2.17) संसारः नित्यः नाम अनादि। 'क्लेशकर्मतद्वासनासंतानाश्चायमनादि'(यो.भा.वा.2.17) क्लेशाः, कर्मवासना संतानश्च अनादि इति वाक्यपरंपरया सर्वं अनादि भवति, सर्गोऽपि नित्यः अनादि इत्युक्ते। सृष्टेः मीमांसा एव अनावश्यकी स्यात्। तथापि 'त्रयाणां त्ववस्थाविशेषणामादौ पुरुषार्थता कारणं भवति'(यो.भा.2.19) लिंगमात्रावि शेषविशेषाः इत्युक्ताः महदहंकार तन्मात्रषट्क, एकादशेंद्रिय, पंचभूत सहितषोडशकाः पुरुषार्थानां कारणत्वात्, आदेः सत्वाच्च पुरुषमिव अपरिणामि नित्याः न, परिणामि नित्याः नाम प्रधानजनिताः इत्यर्थः सिद्ध्यति। ते तु बीजन्यायेन साम्यावस्थकाले प्रधाने अंतर्गतस्सन्, व्युत्थानकाले व्यक्तं भवतीति तात्पर्यम्। तथा व्यक्तरूपं धरितुं, तस्मिन् अंतर्लीनाः संस्काराः हेतवः भवंति। कथमित्युक्ते।

'तथा जातीयकाः संस्कारावृत्तिभिरेव क्रीयंते। संस्कारयिश्च वृत्तय इति'(यो.भा.1.5) एकाजातिसंस्काराः ताः जातिवृत्तिः कारयंति। अपि च ताः वृत्तयः संस्कारान् उदयंति। 'एवं वृत्तिसंस्कारचक्रमनिशमावर्तते'(यो.भा.1.5) एतत् संस्कारवृत्तिचक्रं अविच्छिन्नलीलया परिभ्रमति। तथापि 'तदेवं भूतं चित्तमवसिताधिकारमात्मकल्पेन व्यवतिष्ठते प्रळयं वा गच्छतीति'(यो.भा.1.5), 'क्लेशकर्मतद्वासनासंतानश्चायमनादिः प्रतिसर्गावस्थायां च सः अंतःकरणेन प्रधानसाम्यमुपगतोऽपि सर्गादौ पुनस्तादृगेव प्रादुर्भवति' (यो.भा.वा.2.17) कथमित्युक्ते? 'वर्षापाय इवोध्भिज्जभेदो मृद्भावमुपगतोऽपि पुनर्वर्षासु पूर्वरूप इति'(यो.भा.वा.2.17) इति दृष्टांतः उक्तः। तस्मात् अनादिसृष्टितत्वमपि आविर्भावतिरोभावरूपयोः सत्वात् सृष्टेः चिंतनमावश्यकम्।

सृष्टिकल्पे ईश्वरसंबंधोऽपि आसीदिति विदितः। कथमित्युक्ते? 'तत्र निरतिशयं सर्वज्ञबीजं'(यो.सू.1.25) ईश्वरे निरतिशयं सर्वज्ञबीजं वर्तते। 'एतद्विवर्धमानं यत्र निष्क्रांतमतिशयात् स सर्वज्ञ इति'(यो.भा.वा.1.

25), 'ईशनशील'(यो.भा.1.24) 'इच्छामात्रेण सकलजगदुद्धरणक्षमो'(यो.भा. 1.24) भूत्वा, 'प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्यतीरेकेणानुपपत्तेः'(यो. भा.1.4), इत्युक्तत्वात् 'तस्य स्वप्रयोजनाभावे'(यो.भा.1.25), 'तस्यात्मानु ग्रहाभावेऽपि, भूतानुग्रहः प्रयोजनम्'(यो.भा.1.25) इति, 'कारुणिकत्वात्' (यो.भा.1.25) 'ज्ञानधर्मोपदेशेन कल्पप्रळयमहाप्रळयेषु संसारिणाः पुरुषा नुद्धरिष्यामि'(यो.भा.1.25) इत्यस्मात् कारणात् ईश्वरोऽपि सृष्टेः कारणं भवति।

तथापि 'संसारिणः' इत्युक्तत्वात् ईश्वरः अनाद्यविद्याबद्धजीवानां सृष्टेः कारणं भवतीति स्पष्टम्। नाम अज्ञजीवान् अनुगृह्णाति, उपदिशति, तर्तुमुपयुक्तो भवतीति स्फुटम्। तस्मादीश्वरसंकल्पकस्यापि पुरुषांतरसंस्कार संतानरूपकर्माशयः तददिष्ठाता अविद्या च परमकारणे इति वक्तव्ये। किंचित् परिशीलयामः।

'कर्मा शुक्लाकृष्णं योगिनस्त्रिविधमितरेषां' (यो.सू. 4.7) कृष्ण, शुक्लकृष्ण, शुक्ल, शुक्लकृष्णरहितरूपैः कर्म चतुर्विधाः। 'तत्र कृष्ण दुरात्मनां'(यो.भा.4.7) कृष्णं दुरात्मनां संबंधी। 'शुक्लकृष्णः बहिः साधन साध्य'(यो.भा.4.7) शुक्लकृष्णं बाह्यसाधनापरेण परपीडनानुग्रहद्वारे वर्तते। 'शुक्ल तपःस्वाध्यायध्यानवतं' शुक्लं तपःस्वाध्यायध्यानपरैः परपीडारहि तेन वर्तते। 'अशुक्लाकृष्णा सन्यासिनां' अशुक्लकृष्णं क्षीणक्लेशानां इति उक्तः। 'ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां'(यो.सू.4.8) चतुर्विध कर्मभ्यः कर्मविपाकाय वासनाः अभिव्यक्ताः स्युः। तथा कर्मजनितवास नाचयः 'जातिदेशकालव्यवहितानामस्यानंतर्यं स्मृतिसंस्कारयोरेकरूपत्वात्' (यो.भा.4.9) जन्मदेशकालभेदैः पुरुषे भेदाः संभवेऽपि, संस्कार स्मृतेः एक्यतासंबंधः अविच्छिन्नतया वर्तते इति भावः। कथमित्युक्ते? 'यथा अनुभवास्तथा संस्काराः। ते च कर्मवासनानुरूपाः'(यो.भा.4.9) अनुभव मनुश्रुत्य संस्काराः संति। ते तु कर्मवासनारूपाः। पुनः 'यथा च वासना स्तथा स्मृतिः'(यो.भा.4.9) वासनानामनुसारेण स्मृतिः वर्तते। द्वे अपि परस्परापेक्षिकाः भूत्वा, 'संस्कारेभ्यः स्मृतिः, स्मृतेश्च पुनः संस्काराः'(यो. भा.4.9) संस्कारेभ्यः स्मृतिः पुनः स्मृतेः संस्काराश्च उद्भवंतः। तेषां निमित्तनैमित्तिकभावः अविच्छिन्नेन वर्तते। 'तासामनादित्वं चाशिषो नित्य त्वात्'(यो.सू.4.10) तृष्णायाः नित्यत्वात् स्मृतिसंस्काराः अपि अनादि भवंति। एवं प्रकारेण अनादिस्मृतिसंस्काररूपप्रवाहः पुरुषकर्मबद्धत्वस्य

हेतुर्भवति।

अपि च 'क्लेशमूलः कर्माशयः'(यो.सू.2.12) पूर्वोदाहृतस्य वासनारूपकर्माशयस्य क्लेशाः एव मूलाः। स कर्माशयः 'पुण्यापुण्य'(यो. भा.2.12) रूपेण, 'कामलोभमोहक्रोधभवः'(यो.भा.2.12) तेभ्यः संजनितः। 'तद्विपाको जात्यायुर्भोगाः'(यो.सू.2.13) जन्मायुर्भोगरूपेण तत्फलेन परिणमिति। तादृश समर्थकर्माशयो नाम वासना संतानः क्लेशानामाधारभूतेन अविद्याश्रयेन अविनाभावसंबंधेन 'बीजांकुरसंतान'(यो.भा.वा.1.5) इव अविद्यावासनाः अनाद्यः भूत्वा, 'सर्गप्रळयकाले अविनाशाः भूत्वा परिभ्रमंति'(यो.भा.वा.2.24)। वासनानामाश्रयभूता अविद्या 'मोहरूपा अविद्या'(यो.भा.2.24) मोह इति, 'विपर्ययज्ञान'(यो.भा.2.24) इति च वर्णिता। किंचित् सूक्ष्मतया परिशील्य, दृष्टा चेत् 'बुद्धिरविशुद्धा अनुदासीना जडा चेति तत्रात्मबुद्धिरविद्या'(यो.भा.वा.2.6) 'मोहः पूर्वाविद्या जनितः संस्कारस्तमो वा विद्यायास्तामसत्वादिति'(यो.भा.वा.2.6) इति अविद्यायाः तमोरूपत्वात्, मोहोऽपि तमरूप इति विवृतः। अनेन अविद्या मोहप्रभावेणैव बुद्धिपुरुषयोः संयोगः सिद्ध्यति।

सर्गस्य मुख्यकारणमविद्याऽपि 'अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः'(यो.सू.2.3) अविद्या, अस्मिता, राग, द्वेष, अभिनिवेशाः इति क्लेशाः पंचविधः। तथापि 'अस्मितादयोप्यविद्योपादानस्तदविनिर्भागवर्तिनि' (यो.भा.वा.2.3) अस्मितादि चतुष्टयं अविद्यात्मना सः संति। तान्विहाय न संति। तस्मात् 'अविद्याक्षेत्रमुत्तरेषां'(यो.सू.2.4) अविद्या एव चतुष्टयस्य अधिष्ठानं भवति। इत्थमविद्याप्रतिष्ठिताः क्लेशाः क्लेशपदेन 'ते च बाधनालक्षणं परितापमुपजनयंतः क्लेशशब्दवाच्या भवंति।'(यो.भा.2.3) बाधारूप परितापं जन्यमानानि लक्षणानि संतीति ग्राह्यम्। तत्राविद्या तु मिथ्याज्ञानरूपेण 'अतद्रूपप्रतिष्ठं'(यो.सू.1.8) अन्यरूपप्रतिष्ठितं भवति। 'यत् ज्ञानप्रतिभासिरूपं, तद्रूपाप्रतिष्ठमेवातद्रूपप्रतिष्ठ'(यो.भा.वा.1.8) इति ग्राह्यम्। स्वस्य रूपं त्यक्त्वा पररूपधारणमेव तस्य लक्षणमित्युक्तम्। क्लेशभूताः अविद्यादयः एव शास्त्रपरिभाषायां 'तमो मोहो महामोहस्तामिश्रोन्धतामिश्र इति'(यो.भा.1.8) तत्रापि 'अनित्याशुचिदुःखानात्मसु नित्यशुचि सुखात्मख्यातिरविद्या'(यो.सू.2.5) अनित्यानि नित्यानीति, अशुद्धाः शुद्धाः इति, दुःखं सुखमिति च संभावना एव अविद्या इत्युच्यते। 'दृग्दर्शनशक्त्योरेकात्मतेवास्मिता'(यो.सू.2.6) प्रकृतिपुरुषयोः एकात्मभाव

एव अस्मिता इत्युच्यते। 'सुखानुशयी रागः'(यो.सू.2.7) सुखदृष्टिरेव रागः। 'दुःखनुशयी द्वेषः'(यो.सू.2.8) दुःखदृष्टिरेव द्वेषः इत्युक्तः। 'स्वरस वाहि विदुषोऽपि तथारूढोऽभिनिवेशः'(यो.सू.2.9) स्वतः प्रवाहेन विबु धानां ग्राह्य जीवनतृष्णा एव अभिनिवेशो भवति। अविद्याक्षेत्रे अस्मितादि क्लेशचतुष्टयं 'प्रसुप्ततनुविछिन्नोदाराणां'(यो.भा.2.4) प्रसुप्तः नाम 'चेतसि शक्तिमात्रप्रतिष्ठानां बीजभावोपगमः'(यो.भा.2.4) स्वस्य बीजस्थितेः चित्ते शक्तिरूपेण लयः। पुनः विछिन्नाः नाम 'तेन तेनात्मना पुनः पुनः समुदा चरंतीति विछिन्नाः'(यो.भा.2.4) 'सर्व एवैते क्लेशविषयत्वं नातिक्रमंति' (यो.भा.2.4) तस्मात् क्लेशाः बहुळबलीयाः इति स्पष्टं भवति। अस्मि तादि क्लेशचतुष्टयमविद्यायां चरति सति, अविद्या चित्ते व्यवहरति। अविद्यावासनासंयुक्तेन, प्रळयकाले प्रधाने अंतर्गतस्सन् सांतःकरणवासनैः सर्गे अभिव्यज्यतेति भावः। अविद्यावासना बुद्धिसंबंधः पूर्वपूर्वसर्गानुसारेण कर्माशयद्वारे अनादि इति पूर्वमेव विवृतः।

'ते स्पंदमाना गुणाधिकारं धृढयंति'(यो.भा.2.3) अविद्यादि पंच क्लेशपुंजः कदा स्पंदति तदा गुणाः प्रवृत्ताः स्युः। ते गुणाः 'शांत घोर मूढ'(यो.भा.वा.1.3) शांत्यादिलक्षणैः सत्वं, घारादिलक्षणैः रजः, मूढ त्वादि विशिष्टत्वेन तमश्च संति। अपि च 'प्रकाशशीलं सत्वं क्रिया शीलं रजः स्थितिशीलं तमः'(यो.भा.2.18) इत्युक्तरीत्या प्रकाशक्रियास्थिति शीलाः त्रिगुणाः प्रकाशंते। ते तु साम्यावस्थायां 'गुणत्वेऽपि च व्यापार मात्रेण प्रधानांतर्लीनानुमिता स्थिताः'(यो.भा.2.18) अस्य गुणत्रयस्य साम्या वस्था एव। 'प्रधानशब्दवाच्य भवंति'(यो.भा.2.18) एते तु पूर्वोक्त क्लेश स्पंदनप्रभावेण प्रवृत्ताः संतः, 'परस्परोपरक्तप्रविभागाः परिणामिनः'(यो.भा. 2.18) परिणामिनि प्रकृतौ अंतर्गताः संतः परस्परसंबंधेन कार्यरूपं धरंति। तस्मादेव 'परिणाममवस्थापयंति'(यो.भा.2.3) इत्युक्तानि। अपि च 'इतरेत रोपाश्रयेणोपार्जितमूर्तयः'(यो.भा.2.18) परस्परापेक्षिकाः मूर्तिमंताः भवंति। अतः 'कार्यकारणस्रोता उन्नमयंति'(यो.भा.2.3) कार्यकारणवाहिनीं आरंभ यंति। कार्यकारणरूपेण 'गुणानां परिणामे चत्वारि पर्वाणि'(यो.भा.1.45) गुणाः परिणम्य चतुर्विधास्स्युः। तेषां नामानि 'विशिष्टलिंगमविशिष्टलिंगं लिंगमात्रमलिंगं चेति'(यो.भा.1.4, 5) विशिष्टलिंगं, अविशिष्टलिंगं, लिंग मात्रं, अलिंगं चेति संति। विशिष्टलिंगं भूतानि, अविशिष्टलिंगं तन्मात्रेंदि

चतुर्लिंगेषु अलिंगं नाम प्रधाने गुणाः साम्यावस्थारूपेण अव्यक्ताः भवंति 'भोगापवर्ग'(यो.भा.3.44) पुरुषार्थहेतुकाः न भवंति। तथापि तेष्वंतर्ग वासनासहित अविद्यासंचयः, 'अनादिवासनाविचित्रया चित्तवृत्य समंतः'(यो.भा.2.15) अनादिवासनावैचित्र्येण बद्धैः चित्तवृत्तैः बद्धस्सन्नि वाक्यानुसारेण 'वासनाभिरनादिकालसम्मूर्छितमिदं चित्तं'(यो.भा.2.13) बुद्ध्य अविनाभावसंबंधेन 'परस्परानुग्रहतंत्री भूत्वा, कर्मविपाकं चाभिनिर्हरंति(यो भा.2.3) परस्परसाहाय्येन कर्मपरिपाकस्योपयुक्तेन गुणाः व्यवहरंति ना सृष्टेः उपयुक्ताः भवंति।

एतावत्पर्यंतं सृष्टेः आधारतत्वानां परिशीलनं कृतम्। इदानीं सृष्टि क्रमविषयः विचारणीयः। 'विशेषाविशेषलिंगमात्रा लिंगानि गुणपर्वाणि'(यो सू.2.19) गुणपरिणामः विशेषाविशेषलिंगमात्रलिंगरूपैः वर्तते इति इत पूर्वमेवोक्तम्। तत्रालिंगं नाम प्रधानं पूर्वमेवोल्लेखितम्। तदनंतरं बुद्धिमे महदिति चित्तः इति च वदिष्यंति। 'लिंगमात्रं महत्तत्त्वं तस्मिन्नेते सत्त मात्रे महत्वात्मन्यवस्थाय विवृद्धिकाष्ठामनुभवंति'(यो.भा.2.19) लिंगमा महत्वं वर्तते। तस्मिन् सर्वाणि कार्याणि सूक्ष्मावस्थाकाले लयरूपे संति। नाम 'लिंगमात्रमलिंगस्य प्रत्यासन्नं तत्र तत्संसृष्टं विविच्यते क्रम नतिवृत्तेः'(यो.भा.2.19) गुणाः लिंगमात्रे महति स्थित्वा, सन्निधानविशेषे प्रधाने लयो भूत्वा, पुनः प्रधानात् महद्रूपेण अभिव्यज्यंते। अस्मात् अन्य क्रमः नास्ति। 'तथा षड् विशेषा लिंगमात्रे संसृष्टा विविच्यंते'(यो.भा.2 19) तत्र महति लयावस्थायां स्थिताः षड्विशेषाः विविच्याः स्युः 'शब्दतन्मात्रं, सर्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गंथतन्मात्रं'(यो.भा.2 19) इति पंचतन्मात्राणि 'पंचविशेषाः'(यो.भा.2.19) भवंति। 'षष्टाश्च विशेषोऽस्मितामात्र इति'(यो.भा.2.19) षष्टा अविशेषा अस्मिता नाम अ कारः भवति। एतत् षट्कं 'महतः षड्विशेषपरिणामाः'(यो.भा.2.19 महतः परिणमंति। 'तथा तेष्वविशेषेषु भूतेद्रिंयाणि संसृष्टानि विविच्यंते (यो.भा.2.19) अनंतरं अविशेषांतर्गतानि इंद्रियाणि, महाभूतानि च उत्पद्यंते तानि भूतेन्द्रियाण्येव षोडशकमिति व्यवह्रियंते। 'तत्राकाशवाय्वग्न्युद भूमयो भूतानि शब्दस्पर्शरूपरसगंधतन्मात्राणामविशेषाणां विशेषाः'(यो.भा.2 19) एतेषां शब्दादि तन्मात्राणि अविशेषाः, अहंकारोद्भवाः। तेभ्यः आक शादि पंचस्थूलभूतानि जनितानि। 'तथा श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि बुद्ध

ार्थं'(यो.भा.2.19) महः सर्वेंद्रियार्थकः। एतानि सर्वाणि अस्मि
यानि एव। तस्मात् परंपरान्याये 'गुणानामेष षोडशको विशेष
मः'(यो.भा.2.19) गुणेभ्यः एव षोडशकमुत्पद्यते इत्युच्यते। एवं
ारैः नानात्वसिद्धेऽपि यथार्थतः 'गुणास्तु सर्वाधर्मानुपातिनो न प्रत्य
ते नोपजायंते'(यो.भा.2.19) तस्मात् सर्वमपि गुणरूपैकत्वमेव। व
युक्ते 'प्रख्या क्रियास्थितिशीलानां गुणानां ग्रहणात्मकानां करण भावे
णामः श्रोत्रमिंद्रियं'(यो.भा.4.14) तथैव पुनः स एव गुणः 'ग्राह्य
नां शब्दतन्मात्रभावेनैकः परिणामः शब्दो विषय इति'(यो.भा.4.
ाशते। नाम 'ग्रहणात्मकानां सत्वप्रधानतया प्रकाशात्मनाहंकाराव
र्याणां करणभावेनैकः परिणामः श्रोत्रमिंद्रियं'(यो.भा.वा.4.14) तथैव '
। गुणानां तमः प्रधानतया जडत्वे न ग्राह्यात्मकानां शब्दतन्मात्रभावेन
णामः शब्दे विषयः'(यो.भा.वा.4.14) अपि च 'शब्दादीनां मूर्तिस
तीयानामेकः परिणामः पृथ्वी परमाणुस्तन्मात्रावयवः'(यो.भा.4.
षां चैकः परिणामः पृथ्वी गौर्वृक्षः पर्वत इति'(यो.भा.4.14) पृ
माणूनामेकेन परिणामेन गो, वृक्ष, पर्वतादिरूप पृथ्वी उत्पद्यते। त
रे भूतांतराः संभाव्याः। 'एवं बहुत्वेऽपि गुणानां परमैकत्वं'(यो.भा.
14) एवं प्रकारेण गुणाः बहवः सत्वेऽपि, परिणामः एका
थं महदादिस्थूलभूतपर्यंतसृष्टिः गुणेभ्यः एव जन्यते इति विदितं भवति

पूर्वोदाहृतसृष्टिः 'सर्वमर्थवत्'(यो.भा.3.44), अर्थवत्त्वं नाम '१
र्गार्थता'(यो.भा.3.44) 'पुरुषार्थ'(यो.भा.वा.1.3) 'पुरुषार्थनिमित्तं'
.वा.1.45) 'भोगापवर्गार्थं दृश्यं'(यो.सू.2.18) 'पुरुषार्थता'(यो.भा.2.
दर्थ एव दृश्यं'(यो.सू.2.21) 'भोगापवर्गहेतुः'(यो.भा.वा.2.24) 'परार्थ
ो.सू.3.35) इत्यादिरीत्या बुहुषु स्थानेषु सूचितम्। तस्य विवरण
ाकयामः।

'अलिंगावस्थायां न पुरुषार्थो हेतुः'(यो.भा.2.19) तस
ायाणांत्ववस्थाविशेषाणामादौ पुरुषार्थता कारणं भवति'(यो.भा.2.
शेषाविशेषलिंगमात्राः त्रयः प्रथमतः पुरुषार्थप्रवर्तकाः भवंति। तस
यः अपि त्रिगुणात्मकेन 'एतद्दृश्यमित्युच्यते'(यो.भा.2.18) 'तौ भो
र्गावर्थः'(यो.भा.2.18) तस्मात् त्रयः अपि पुरुषार्थानां भोगापवर्गाना
ेन दृश्यानीत्युच्यंते। 'परार्थत्वात् परतंत्रं'(यो.भा.2.17), अपि च 'स
तुर्निमित्तं कारणं भवतीति अनित्याख्यायते'(यो.भा.2.19) 'एतद्दृश

भोग्यमिति'(यो.भा.वा.1.4) 'स्वाम्यमिति'(यो.भा.वा.1.7) च उच्यते। तदानीं पुरुषः 'भोक्तृशक्ति'(यो.भा.वा.2.6) इति, 'दृग्शक्ति'(यो.भा.2.17) इति, च उच्यमानशक्त्या, दर्शनार्थं अनादिवासनास्रवन्त्या च सः भोक्ता, द्रष्टा, दृक्, स्वामी इत्युच्यते। तादृशकर्तृणः पुरुषस्य विद्यमानेषु भोगापवर्गप्रयोजनेषु प्रथमतः सः वसनाबद्धयुक्तः। तस्मात् अविद्या प्राकृत बद्धजीवः। अतः एतत् दृश्यं दर्शनार्थं नाम भोगार्थमुपयुक्तं भवति। 'तत्रेष्टानिष्टगुणस्वरूपावधारणमविभागापन्नं भोगः'(यो.भा.2.18) नाम गुण विकारैः पुरुषेण ऐक्यदृष्टिः स्यात्। स भोगः 'भोगः सुखाद्याकारः शब्दाद्यनुभवः'(यो.भा.वा.2.21) इति निर्वचनम्। एतदेव 'पुरुषः स्वामी दृश्येन स्वेन दर्शनार्थं संयुक्तः तस्मात्संयोगात् दृश्यस्योपलब्धिर्या स भोगः'(यो.भा.2.23) 'सत्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः' (यो.सू.3.35) इति विवृतः। नाम विरुद्धतत्वयोः सत्वपुरुषयोः मध्ये अत्यंतसंकीर्णता सिद्धे भोक्तृभोग्यरूपाणि, चेतनाचेतनानि च भिन्ना सन्त्यपि, भेदस्य अगोचरेण सत्वस्य कर्तृत्वेन सुखदुःखज्ञानप्राप्तिः भोगः इत्युक्तः (यो.भा.3.35)

एवं बुद्धिस्तप्रतिबिंबरूपपुरुषः अविद्याबद्धो भूत्वा भोग्यप्रवाहे पतितः सन्, तत् तत् वासनाजनितकर्मव्यूहे निबद्धो भूत्वा, धर्माधर्मप्रवृत्ति पाशैः बद्धस्सन्, सुखदुःखादि द्वंद्वचक्रे परिभ्रमति। अनादिपरंपरागतवासना वाहिनीगतसंचितागामिप्रारब्धकर्मभिः 'सति मूले तद्विपाको जात्यायुर्भोगाः' (यो.सू.2.13) 'ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्' (यो.सू.2.14) नाम 'पुण्यहेतुकाः सुखफला, अपुण्यहेतुका दुःखफल'(यो.भा.2.14) एवं प्रकारेण भोगफलं सुखदुःखद्वंद्वमनुभूयते। तथापि 'दुःखमेव सर्वं विवेकिनः'(यो.सू.2.15) कथमित्युक्ते? 'विषयसुखकालेऽपि दुःखमस्यैव प्रतिकूलात्मकं योगिनः'(यो.भा.2.14) विषयसुखानुभवकालेऽपि अंतर्गतवाहिनी दुःखः योगिनां प्रतिकूलात्मकं भवति। तदेव 'दुःखस्रोतः'(यो.भा.2.15) इति पूर्वमेव उक्तम्। दुःखं त्रिविधम्। 'परिणामतापसंस्कारदुःखैर्गुण वृत्ति विरोधाच्च'(यो.सू.2.15) तत्र परिणामदुःखस्य रूपं कथमित्युक्ते? 'सुखानुशयी रागः'(यो.सू.2.7) योगाश्रयेन सुखस्यावरोधे द्वेषः उद्भवति। तज्जनितेन 'दुःखानुशयी द्वेषः'(यो.सू.2.8) इति सूत्ररीत्या दुःखः जन्यते। तदेव परिणामदःखमिति वदंति। सुखान्वेषणेन, सौख्यार्थसमुपार्जनाय, मनो

संपादयति। तस्मात् सिद्धः कर्माशयः लोभमोहफलितः एतादृशस्य दुः तापदुःखमिति व्यवहारः। पूर्वोक्त सुखदुःखानुभवः पुनः संस्काररूपेण सुखदुःखाधिकान् प्रसादयति। तदेव संसारदुःखमित्युच्यते।

एवं स्थितः 'एवमिदमनादिदुःखस्रोतः'(यो.भा.2.15) 'अन सनाविचित्रया चित्तवृत्या समंततोनुविद्धमिवाविद्यया हातव्य'(यो.भा.2 'अहंकारममकारानुपातिनं जातं जातं बाह्याध्यात्मिकोभयनिमित्तस्त्रि स्तापा अनुप्लवंते'(यो.भा.2.15) 'योगिनमेव प्रतिकूलात्मकत्वादुद्वेज (यो.भा.2.15) तथा अनुतापतप्तः विवेकी 'तदस्य महतो दुःखसमुद प्रभवबीजमविद्या'(यो.भा.2.15) महादुःखसमुदायस्य अविद्या एव कारणमिति ज्ञात्वा, 'तस्याश्च सम्यग्दर्शनमभावहेतुः'(यो.भा.2.15) सम्यग्द र्शनमार्गायान्वेषयन् 'संसारः संसारहेतुः मोक्षो मोक्षोपाय'(यो. 15) इति चतुर्विधात्मकं तत्वज्ञानमाश्रित्य, दुःखबहुळत्वसंसारः है कारणमिति, प्रधानपुरुषयोः संयोग एव हेयकारणमिति, हानोपायः स र्शनमिति, संयोग वियोग एव हानरूपमोक्षः इति निर्णीतवान्। त 'ज्ञानधर्मोपदेशेन कल्प प्रळय महाप्रळयेषु संसारिणः पुरुषानुद्धरिष्यामि भा.1.25) इति बद्धकंकंणहस्तस्येश्वरस्यानुग्रहविशेषेण 'आचिनोति शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते॥ भा.वा.2.24) (वायुपुराण) शास्त्रार्थग्रहणेन शिष्यं क्रममार्गानुवर्तिनं कृ स्वयं सन्मार्गानुवर्ती आचार्यः इत्युक्तरीत्या तादृशं गुरुसन्निधिं ग मुमुक्षुः। ततः तस्य भोगे हेयभावस्याभिवृध्या, अपवर्गे आकांक्षा व तस्मात् गुरोः सन्निधौ उचितं साधनानुविधानमनुसर्तुमुद्युक्तो भवति।

साधना

एतावत्पर्यंतमुक्ताः तात्विकविषयाः केवलं सांख्यानुसाराः। पतं मुनींद्रस्य संकल्पः न तु तत्वविचारणाय। तत्वार्थसाध्यो अपवर्गो कैवल्यप्राप्तेः उपायान्वेषणमिति, तस्मात् पातंजलः न तु तात्विक योगशास्त्रनाम्ना प्रसिद्धं साधनशास्त्रमिति उपोद्घाते विवृतम्। अतः पतं प्रोक्तं साधनाविधानं सर्वेसिद्धांतिभिः स्वीकृतमिति. अनादिकालात स

कुर्मः।

'स्वरूपावधारणमपवर्ग इति'(यो.भा.2.18) 'कैवल्यं स्वरूपप्रतिष्ठा' (यो.सू.4.34) इति निर्वचितस्य मोक्षस्य कारणभूतं 'कुशल इत्येव भवति गुणातीतत्वादिति'(यो.भा.2.27) गुणातीतलक्षणेन कुशलत्वस्यार्जनाय उद्युक्तो भूत्वा, 'घोरेषु संसारांगारेषु पच्यमानेन मया जननमरणांधकारे विपरीत वर्तमानेन'(यो.भा.3.51) 'तृष्णायोनयो विषयवायवः'(यो.भा.3.51) कथम नया विषयमृगतृष्णाया विंचिततस्यैकपुनः प्रदीप्तस्य संसाराग्नेरात्मानमिंधनी कुर्यामिति'(यो.भा.3.51) 'स्वस्ति वः स्वप्नोपमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्य'(यो.भा.3.51) इति, 'इत्येवं निश्चितमतिः समाधिं भावयेत्'(यो. भा.3.15) इति निश्चित्य, साधकः समाधिं संस्मरति।

समाधि इत्युक्ते गम्यानां असंप्रज्ञातादि संपूर्णसमाध्यवस्थानां दृष्टेः 'योगः समाधिः'(यो.भा.1.1) इति व्युत्पत्यनुसारेण योगान्वेषी भूत्वा, 'योगः चित्तवृत्तिनिरोधः'(यो.सू.1.2), नाम 'निरुध्यंते यस्मिन् प्रमाणादि वृत्तयो अवस्थाविशेषो चित्तस्य सो अवास्थाविशेषो योगः'(यो.भा.वा.1.2) एतन्निर्वचनांतर्गतचित्तवृत्तीनामवगाहनेनैव तेषां निरोधोपायग्रहणं संभवति।

पूर्वोक्त चित्त एव पूर्वग्रंथे बुद्धिरिति, सत्वमिति च उक्तम्। त्रिगु णात्मकमेतत्। अपि चास्य 'सार्वभौमश्चित्तस्य धर्मः।'(यो.भा.1.1) तस्मिन् 'क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धं'(यो.भा.1.1) तस्मिन् भूमिपंचके विक्षि प्तपर्यंताः भूमयः चित्तं बंधयंति। अतः न तु योगपक्षः। क्षिप्त, मूढ, विक्षिप्ताः योगप्रत्यर्थिनः। त्रीणामनंतरयोः द्वयोः 'यस्तेकाग्रे चेतसि सद्भूत मर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबंधनानि श्लतयति निरोधमभि मुखं करोति'(यो.भा.1.1) तस्मात् एकाग्रविरुद्धाः योगोपयुक्ताः भवंति। क्षिप्तः रजोप्राबल्येन उद्रिक्ततया, अस्थिरतया बाह्यव्यापारसंघटनेन प्रका शते। दैत्यदानवेष्वधिकमेतत् व्यक्तं(यो.भो.1.2) मूढः तामसिकः। उद्रेकेन कृत्याकृत्यविभागनिर्णयशून्येन, क्रोधादिविरुद्धकार्यैः संपूर्णतया रक्षपैशाचादिषु (यो.भो.1.2) गोचरति। विक्षिप्तो नाम सत्वोद्रेकजः। सुखदुःखसाधनाभ्यां व्यक्तं भवति। देवतानामश्रयः। एते त्रयः अपि समाधेः अनुपयोगिनः। सत्वोत्कर्षेण एकाग्रनिरुद्धद्वयं समाधेः उपयुक्तम्। 'एकाग्रे बहिर्वृत्तेः निरोधः' (यो.भो.1.2) इति निर्वचनानुसारेण बाह्यवृत्तेः निरोधो भवति। 'निरुद्धे च सर्वासां वृत्तीनां संस्काराणां च प्रविलय'(यो.भो.1.2) निरुद्धे सर्ववृत्तयः

संस्काराश्च लीयंते।

पंचधर्मिणः चित्तस्य पुनः 'वृत्तयः पंचतय्यः क्लिष्टाऽक्लिष्टाः' (यो.सू.1.5) ते एव 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः'(यो.सू.1.6) इत्यु च्यते। एते प्रमाणादयः वृत्तयः क्लेशहेतुकाः कर्माशयप्रचये क्षेत्रीभूताः क्लिष्टाः'(यो.भा.1.5) पुनः ते एव वृत्तयः 'ख्यातिविषयागुणाधिकारविरो धिन्योऽक्लिष्टा'(यो.भा.1.5) एतेषु वृत्तिषु प्रथमं प्रमाणं 'प्रत्यक्षानुमाना गमाः'(यो.सू.1.7) इति त्रिविधम्। इंद्रियजन्यज्ञानं प्रत्यक्षम्। अनुमानितमनु मानम्। वेदः आप्तवचनं च आगमम्। 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं' (यो.सू.1.8) अस्योदाहरणं द्विचंद्रभ्रांतिः। 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः'(यो.सू.1.9) विषयस्यानपेक्षया शब्दज्ञानमात्रेणैव संपूर्णज्ञानं स्यादि त्यर्थः। 'अभावप्रत्यालंबनवृत्तिर्निद्रा'(यो.सू.1.10) 'अनुभूतविषयासंप्रमोषः स्मृतिः' (यो.सू.1.11) एवं रीत्या बुद्धेः वृत्तयः पंचविधाः। अस्य वृत्ति पंचकस्य निरोध एव योगः इत्युक्तत्वात् निरोधः परिशीलनीयः।

मननात्मकःमनः, अहंकृतरूप अहंकारः, संकल्पो बुद्धिश्च मिलित्वा चित्तः स्यादिति, तत् अतिसूक्ष्मतत्वमिति, तस्य निरोध एव योग इति केषांचन तात्पर्यम्। (रामप्रसाद) 'चित्तनदीनामोभयतो वाहिनी'(यो.भा.1. 12) तत्र कैवल्योन्मुखत्वं कल्याणमित्युच्यते। संसृतिकारकःपापः इत्युक्तः। चित्तसंयुक्तदुष्टवासनाचयनाशाय कल्यणदमस्य कैवल्यप्राप्तेश्च 'अभ्यास वैराग्य'(यो.सू.1.12) द्वौ बहुळोपयुक्तौ। तौ द्विविधाभ्यासादेव विषयसंस्कार निरोधकौ नाम पूर्वोक्तं चित्तवृत्तिपंचकं विषयाभिवृद्धिं न कुर्वन् तन्निरोध करोति इत्यर्थः। 'तत्र स्थितौ यत्नोऽभ्यासः'(यो.सू.1.13) शांतस्थिते चित्तस्य स्थापनाय तीव्रयत्न एवअभ्यासः।'राजसतामसवृत्तिरहितस्य प्रशांत वाहिता विमलता सात्विकवृत्तिवाहितैकाग्रता स्थिति'(यो.भा.वा.1.13 'स्थिति साधानान्यंतरंगबहिरंगाणि यमनियमादीनि'(यो.भा.वा.1.13) स्थिति साधनार्थं यम नियमेति अंतरंगबहिरंगसाधनायाः आवश्यकता वर्तते वशीकारसंज्ञा, परं वैराग्य इति वैराग्यं द्विविधम्। 'दृष्टानुश्राविक विष वितृष्णस्य वशीकारसंज्ञावैराग्यं'(यो.सू.1.15) दृग्गोचर, शास्त्रगोचर विष वितृष्णाभाव एव वशीकारनामकं वैराग्यम्। प्राथमिकमिदम्। 'तत्परं पुरु ख्यातेर्गुणवैतृष्णं'(यो.सू.1.16) पुरुषज्ञानात् गुणतृष्णाराहित्यप्राप्तिरेव प वैराग्यमित्युच्यते। अस्य वैराग्यस्थितेः 'ज्ञानस्यैव पराकाष्ठा वैराग्यं' (य भा.1.16) वैराग्यमेव उत्कृष्ट ज्ञानस्थितिः। अपि च 'एतस्यैव हि नांत

यकं कैवल्यं'(यो.भा.1.16) चित्तस्य वृत्तीनां निरोधः अभ्यासमूलेन तस्य उद्रेकतत्वनिरोधः वैराग्येन च करणीयौ। नाम अभ्यासे चित्तवृत्तयः, वैराग्ये चित्तविकाराश्च निरोधनीय इति रहस्यम्।

तथापि अभ्यासवैराग्योन्मुखचित्तस्य व्याधिस्थ्यानसंशयप्रमादालस्य विरति भ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेंऽतरायाः'(यो. सू.1.30) चित्तवृत्तीनामाश्रयेण चित्तविक्षेप, योगमल, योगप्रतिपक्ष, योगांत रायाः इत्युच्यंते।(यो.भा.1.30) एते सर्वेऽपि 'रजस्तमोबलात्प्रवर्धमानाः' (यो.भो.1.30) विक्षेपनवकानंतरं 'दुःखदौर्मनस्यांगमेवजयत्व श्वासप्रश्वासा विक्षेप सहभुवः'(यो.सू.1.31) साधकस्यावरोधाः।

तथापि 'प्रतिपक्षभावनं'(यो.सू.2.23) इति सूत्रानुसारेण विक्षेप प्रति कूलभाव भावनया जयेयाः एव। 'मैत्री करुणा मदितोपेक्षाणां सुखदुःख पुण्यापुण्यविषयाणां भावनाश्चित्तप्रसादनं'(यो.सू.1.33) सुखात्मकैः मैत्री, दुःखाक्रांतानां विषये करुणा, पुण्यात्मानां संतोषः पापकर्मकारणकारानां विषये उपेक्षाभावना च यस्य योगिनः संति तस्य शुद्धधर्मोदयेन चित्तस्य प्रसन्नता सिद्धयति। एकाग्रतायाः स्थिरत्वमुपलभ्यते। एतादृश प्रति पक्षभाव नायाः अनंतरं प्राणायामः (यो.सू.1.34), चित्तप्रवृत्तिध्यानं(यो.सू.1.35), सत्वाधिक्यचित्तध्यानं (यो.सू.1.36), वितरागयोः सिद्धध्यानं (यो.सू.1. 37), स्वप्ननिद्रास्थितिध्यानं(यो.सू.1.38), इष्टध्यानं (यो.सू.1.39), अणु महत्वध्यानं(यो.सू.1.40) इत्यादिभिः विक्षेपजालं नश्यति। श्रमेन विक्षेप रहितं चित्तं वृत्तिक्षयं प्राप्त्वा, त्रिपुटीसंयुक्तस्थितिमवाप्य, मणि इव परि शुद्धस्सन् प्रकाशते। तदानीं तस्य योगिनः 'विवेकख्याति'(यो.सू.2.26) जनित वशीकारवैराग्यस्योद्भवेन मोक्षमार्गप्रवेशः लभ्यते इति योगस्य तात्पर्यम्।

तस्मात् पूवोक्तरीत्या यमनियमादीनी योगांगानि साधकस्यावश्य कानि भवंति। तेषामभ्यासफलितेन 'योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्ति राविवेकख्यातेः'(यो.सू.2.28) 'यमनियमासनप्राणायामप्रत्याहार धारणा ध्यान समाधयोऽष्टावंगानि'(यो.सू.2.29) इति सूत्ररीत्या योगांगानि अष्टा संति।

तत्र 'अहिंसा सत्यास्तेय ब्रह्मचर्यापरिग्रहाः'(यो.सू.2.30) यम इति व्यवहारः। तेषु 'अहिंसा सर्वधा सर्वदा सर्वभूतानामनभिद्रोहः'(यो.भा.2. 30) सर्वभूतेषु सर्वविधैः सर्वष्वपि कालेषु हिंसाभावस्य राहित्यमेव अहिंसा इत्युच्यते। द्वितीयं सत्यं। 'सत्यं यथार्थे वांङ्मनसे'(यो.भा.2.30)

यथार्थतामनुश्रुत्य मनोवचोः स्थितिः सत्यमिति निर्वाच्यम्। शास्त्रविरुद्ध मार्गेण परेषां धनं न स्वीकरणं अस्तेयमिति विवरणम्। 'ब्रह्मचर्यं गुप्तेंद्रिय स्योपस्थस्य संयमः'(यो.भा.2.30)। 'विषयाणां....अस्वीकरणमपरिग्रहः'(यो. भा.2.30) देश, काल, जाति संबंधराहित्येन एतेषामनुष्ठानं महाव्रतं इत्युक्तम्(यो.सू.2.31)

'शैचसंतोष तपःस्वाध्यायेश्वरप्रणिधानानि नियमाः'(यो.सू.2.32) इति रीत्या बाह्याभ्यंतरपरिशुद्ध्य, 'संतोषस्तुष्टिः'(यो.भा.2.32) इति वचनानुसारेण 'प्राणत्राणमात्रहेतोभ्यधिकस्यानुपादित्सा संतोषः'(यो.भा.वा.2. 32) प्राणत्राणविषये अत्यवसरमात्रोपाधिदृष्ट्या स्थितिः संतोषः, 'तपो द्वंद्व सहनं'(यो.भा.2.32) शीतोष्ण क्षुत्पिपास स्थानासन आकार काष्ठमौनादि द्वंद्वसहनरूप तपः, मोक्षशास्त्राध्ययनं, परमगुरोः ईश्वरस्य प्रणिधानं, सर्व कर्मार्पणानि इत्यादीनां स्थितिरेव नियमधर्मः।

'स्थिरसुखमासनं'(यो.सू.2.46) नाम 'स्थिरं निश्चलं यत्सुखं सुखा वहं तदासनमिति'(यो.भा.वा.2.46) स्थिरं नाम निश्चलत्वम्। सुखप्रदमेव सुखम्। द्वयोः ऐक्यमेव आसनमित्युच्यते। 'तस्मिन् सति श्वासप्रश्वासयो र्गतिविच्छेदः प्राणायामः'(यो.सू.2.49), 'स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः'(यो.सू.2.54) तदानीं 'परमावश्यतेद्रिंयाणां'(यो.सू.2. 55) उत्कृष्ट वशतेंद्रियशक्तिः प्राप्यते। नाम इंद्रियाणां स्वाधीनता सिद्ध्यति। 'देशबंधस्चित्तस्य धारणा'(यो.सू.3.1) नाभिचक्रहृदयपुंडरीक मूर्ध्नमध्ये ज्योतिः नाशिकाग्रजिह्वाग्रादि स्थानेषु, बाह्यवस्तुस्थाने वा वृत्तिरूपेण चित्तलग्नमेव धारणा इत्युच्यते। 'तत्र प्रत्ययैकतानता ध्यानं'(यो.सू.3.2) धारणा स्थाने अनेकप्रवाहरूपचित्तस्थितिरेव ध्यानमित्युच्यते। नाम मैत्र्यादि लक्षणैः परि शुद्धे चित्ते यमनियमान्वितः, जितासनः, प्राणायामाभ्यासी, इंद्रीयबाधादि वर्जितः, ऋजुकायः, जितद्वंद्वः योगी इत्युच्यते(यो.भा.3.1)। नाम अष्टांग योगपूर्वपंचकसिद्धिं प्राप्तवान् योगी, समाधिदृष्ट्या धारणधिभ्यः नाशिका ग्रादि ध्यानं करणीयम्। धारणायां दृढचित्तस्स्न् ज्ञानैक्यता सिद्धिरेव ध्यान मित्युच्यते। ततः 'तदेवार्थमात्रा निर्भासं स्वरूपशून्यमिव समाधिः'(यो.सू.3. 3) ध्यानगत ध्येयाकाराकारितवृत्तेः प्राप्तिरेव समाधिः इत्युच्यते। ध्यान धारण समाधि त्रये एकविषयत्वं प्रकाशते। तदेव 'संयमं' इति नाम्ना व्यवह्रीयते। तस्य साधक एव 'संयमि' इत्युक्तः।

पूर्वोक्त अष्टांगयोगसाधनामूलेन कानिचन फलितानि सिद्ध्यंति।

अहिंसाप्रतिष्ठाकारणेन साधकस्य सन्निधाने सर्वेऽपि प्राणिनः परस्पर वैर त्यागमाचरंति(यो.सू.2.35)। सत्यव्रतप्रतिष्ठाकारणेन, सत्यसंकल्पो भूत्वा, वरप्रदाता योगी भवति(यो.सू.2.35)। अस्तेयप्रतिष्ठितस्य सर्वरत्नसंपन्नता सिद्ध्यति(यो.सू.2.37)। ब्रह्मचर्यप्रतिष्टायाः शक्तेः निरवधिकाभिवृध्या 'ज्ञान माधातुं समर्थो भवति'(यो.भा.2.37) ज्ञानप्रदानाय अर्हः स्यात्। अपरि ग्रहेण जन्ममूलग्रहणं सिद्ध्यति। बाह्यशौचेन स्वांगेषु असह्यता, अंतरशौचेन सौमनस्यं नाम चित्तशुद्धिः, एकाग्रता, इंद्रियजयः, आत्मदर्शनयोग्यता च लभ्यंते। संतोषेन सर्वोत्कृष्टसुखलाभः सिद्ध्यति। तपसा अशुद्धिक्षयः, कायेन्द्रियासिद्धिश्च लभ्यते। तत्फलितेन दूरश्रवणादि सिद्धयः लभ्यंते। स्वाध्यायफलितेन इष्टदेवतासंप्रयोगः प्राप्यते। ईश्वरप्रणिधानेन समाधिलाभो स्यात्। आसनसिद्धेः द्वंद्वजयः स्यात्। प्राणायामाभ्यासेन विवेकज्ञानावरण कर्माशयादिकनाशः संभवति। तस्मात् धारणाभिवृद्धिः स्यात्। प्रत्याहारे इंद्रियजयः सिध्यति। संयमनामकत्रयेण प्रज्ञाभिवृद्धिः स्यात्। एतत् धार णादित्रयं संप्रज्ञातं नाम समाधेः पूर्वपंचकात् सन्निहितम्। एतावत्पर्यंतं योगो नाम समाधिसाधनस्योपयुक्तानि अष्टांगानि क्लुप्ततया विवृतानि। अनंतरं तत्फलितानि संप्रज्ञात असंप्रज्ञातादि समाधिस्थितीः परीशीलयामः।

समाधेः रहस्यम्

'अथ योगानुशासनं'(यो.सू.1.1) 'योगश्चित्तवृत्तिनिरोधः'(यो.सू.1.2) इति सूत्रयोः योगपदेन ग्रंथस्योपक्रम्य, 'योगः समाधिः'(यो.भा.1.1) इत्युत्पत्तेः अनुसारेण समाधेः संस्मरणं कृत्वा, 'तस्यापि निरोधे सर्वनिरोधान्निर्बिजः समाधिः'(यो.सू.1.51) इति निर्बीजेन असंप्रज्ञातसमाधिनिर्वचनेन अध्यायमुपसंहरन्, तस्य प्रथमप्रकरणस्य समाधिप्रकरणमिति नाम प्रसाद्य, तत्सिद्धेः द्वितीयस्य साधनप्रकरणमिति निर्वचनमुक्त्वा, तत्फलितान् सामान्य सिद्धीः तृतीये विवृण्वन्, तस्य विभूतिप्रकरणमिति नाम प्रसाद्य, पुनः तत्र समाधेः परमफलितस्य कैवल्यस्य विवरणे चतुर्थस्य कैवल्यप्रकरणमिति पतंजलिना उक्तम्। अतः पातंजलं नाम सर्वयोगग्रंथोऽपि संपूर्णतया समाधिपरमेव भवतीत्यत्र नास्ति संदेहः। तस्मादस्मिन् ग्रंथे सर्वेऽपि चर्चा विषयाः समाधिसिद्धेः एव दृष्टिं प्रसारयंति। अतः समाधिः साधनामार्गे तत्तत्साधनाफलितेन सिद्धान् उक्त्वा, 'ते समाधानुपसर्गाव्युत्थाने सिद्धयः'

(यो.सू.3.37) इति, 'सर्वनिरोधान्निर्बीजसमाधिः'(यो.सू.1.5) सर्वविषय निरोधादेव असंप्रज्ञातसमाधिः संप्राप्यते इति चोक्तवान्। अतः साधकलोकः क्षणिकेषु अल्पेषु सिद्धिषु दृष्टिः न प्रसारयन्, परमावधेः 'कैवल्यं स्वरूपप्रतिष्ठा'(यो.सू.4.34) इति परमपुरुषार्थसिद्धेः यत्नं करणीयम्।

'यस्त्वैकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबंधनानि श्लथयति निरोधमभिमुखं करोति स संप्रज्ञातः'(यो.भा.1.1) 'सर्ववृत्तिनरोधेत्वसंप्रज्ञातः समाधिः'(यो.भा.1.1) सर्ववृत्तिनिरोधस्थितिरेव असंप्रज्ञातमिति, निर्बीजसमाधिः इति वचनतात्पर्यानुसारेण मुख्यतः समाधिः द्विविधा विराजते। 'तदा द्रष्टु स्वरूपेऽवस्थानं'(यो.भा.1.3) 'स्वरूप प्रतिष्टा तदानीं चित्तशक्तिर्यथा कैवल्ये'(यो.भा.1.3) चित्तवृत्तिनिरोधरूप समाधौ पुरुषः कैवल्यस्थिताविव स्वरूपावस्थितो भवति। तस्मात् पुरुषार्थस्य कैवल्यस्य सन्निहितसंबंधी स्यात्। अतः समाधेः विचारणावश्यकता विदितं भवति।

समाधिद्वये 'संप्रज्ञातपूर्वकत्वादसंप्रज्ञातस्य'(यो.भा.वा.1.17) इति, 'प्रथमं संप्रज्ञातोपवर्णनं'(यो.भा.वा.1.17)। अतः 'सम्यक् संशयविपर्ययरहितत्वेन प्रज्ञायते प्रकषते ज्ञायते भावस्य स्वरूपं एन स संप्रज्ञातः'(यो.भो. 1.7) इति भोजस्य निर्वचनम्। एतदेव 'समापत्ति' इति 'क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्सदंजनता समापत्तिः'(यो.सू.1.41) विवरणम्। अत्र बाह्यवस्त्वपेक्षायाः सत्वात् समापत्तिर्नाम संप्रज्ञातः 'एव सबीजः समाधिः'(यो.सू.1.46) सबीजसमाधिः इत्युक्तः।

'स च संप्रज्ञातश्चतुष्प्रकार इत्याः'(यो.भा.वा.1.1) इति रीत्या 'चतुर्थोऽपसंख्याता समाधिरिति'(यो.भा.1.1) प्रकारेण संप्रज्ञातः 'वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः'(यो.सू.1.17), 'वितर्कश्चित्तस्यालंबने स्थूल आभोगः'(यो.भा.1.17), 'सूक्ष्मो विचारः'(यो.भा.1.17), 'आनंदो आह्लादः'(यो.भा.1.17), 'एकात्मका संविदस्मिता'(यो.भा.1.17) सवितर्के 'चतुष्टयानुगतः'(यो.भा.1.17) इति वाक्यमनुश्रुत्य, चतुः अंतर्गताः सन् 'वितर्क विकलः सविचारः'(यो.भा.1.17) इति वितर्कादन्यत्रयः सविचारः विचार विकलः सानंदः विचारशून्य सानंद सास्मितयुग्मः सानंदेन व्यवहारः 'चतुर्थस्तद्विकलोऽस्मितमात्र'(यो.भा.1.17) अस्मितानंदरहितः अस्मितामात्रस्थितः। एतेषां सर्वेषामपि एकालंबनमेव नाम एकविषयत्वमेव

वर्तते।

'वितर्कं विवृणोति'(यो.भा.वा.1.17) प्रथमतः वितर्कः विवृणोतीति आरभ्य वाचस्पतिः 'स्वरूपसाक्षात्कारवती प्रज्ञा अभोगः'(यो.भा.वा. 1.17) अभोगो नाम बाह्यविषयस्वरूपप्रज्ञासाक्षात्कार एव स्यादिति, स्थूल विषयस्य संबंधित्वात् स्थूलमिति लिखितवान्। अतः पांचभौतिकविषयिक मिति प्रकाशते। पुनः चित्तभावना द्विविधा। ईश्वर, पंचविंशतितत्वरूपैः वर्तते। तत्र जडाजडरूपेण द्वितीयं पुनः द्विविधं भवति। तत्र पुरुषः अजडात्मकः। चतुर्विंशतिकं तु जडात्मिकम्। जडे चतुर्विंशतिके पंच महाभूतानि, दशेन्द्रियाणि च मिलित्वा स्थूलानि स्युः। शब्दादि तन्मात्राणि बुद्धिसूक्ष्माः अतः सवितर्के स्थूलानां भूतेन्द्रियाणां लक्ष्यं कृत्वा, एतेषां पूर्वापरानुसंधानुपूर्वकशब्दार्थशोधनं कृत्वा, कार्यकारणभावान् विमर्शेन ग्रहणं सात्विकमित्युच्यते। 'एवं चित्तस्यालंबने सूक्ष्मः आभोगः स्थूलकारणभूत सूक्ष्मपंचतन्मात्रलिंगालिंगविषयो विचारः'(यो.भा.वा.1.17) पुनः 'इंद्रिये स्थूल आलंबने चित्तस्याभोगोह्लादः आनंदः'(यो.भा.वा.1.17) 'सत्वं सुखं'(यो.भा.वा.1.17) इति रीत्या अस्यां स्थितोः सत्वाधिक्यता स्यात्। तथापि लेशमात्रेण रजस्तमांसि भासेते। 'ततः परं रजस्तमोलेशानभिभूतं शुद्धसत्वमालंबनीकृत्य या प्रवर्तते भावना तस्यां ग्राह्यस्य सत्वस्यान्यग्भावाच्चितिशक्तेरुद्रेकात्सत्तामात्रावशेषत्वेन समाधिः सास्मित इत्युच्यते'(यो.भा.वा. 1.17) एवं प्रकारेण संप्रज्ञातः चतुर्विधाः इति विदितं भवति।

चतुर्विधरूपं संप्रज्ञातमेव गृहीतृ, ग्रहण, ग्राह्य विषयान् अनुसृत्य, त्रिविधसमावदः भवति। सवितर्क, सविचारद्वये ग्राह्यालंबनोपरक्तं चित्तं 'ग्राह्यमापन्नं ग्राह्यस्वरूपाकारेण निर्भासिते'(यो.भा.1.41) तत् ग्राह्यं स्थूलं सूक्ष्मं वा लौकिकं वा स्यात्। अस्यैव ग्राह्य समापत्ति इति व्यवहारः। 'तथा ग्रहणेष्वपींद्रियेष्वपि द्रष्टव्यं'(यो.भा.1.41) तथैव ग्राह्यसमापत्तिः भवति। चित्तःइंद्रियसमापत्या तदाकाराकारितं भवति। सानंदसमापत्त्योः अत्रान्वयः। 'तथा गृहीतृ पुरुषालंबनोपरक्तं गृहीतृपुरुषसमापन्नं गृहीतृपुरुष स्वरूपाकारेण निर्भासते'(यो.भा.1.41) अस्यैव गृहीतृसमापत्तिः इति व्यवहारः।

पुनः ग्राह्यसमापत्तीति सवितर्कसविचारद्वयं निर्वितर्कनिर्विचाराभ्यां मिलित्वा चतुर्विधाः। तत्र प्रथम 'तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्कसमापत्तिः'(यो.स.1.42) 'स्मृतिपरिशद्धौ स्वरूपशन्येवार्थमात्रनिर्भासा

शब्दानुमानज्ञानविकल्पानामभावेन, स्वरूपमात्रेणवस्थितिमवाप्य, स्वरूपा काशस्थितौ विराजते। तस्मात् निर्वितर्कज्ञानं स्वतंत्रं, स्वापेक्षिकं, स्थिर मिति, 'ऐतयैव सविचारा निर्विचारा च सूक्ष्मविषयाव्याख्याता'(यो.सू.1.44) पूर्वोक्तरीत्या सविचारनिर्विचारौ सूक्ष्मविषयाणामन्वयः इत्युक्ते, सूक्ष्म विषयादिकं तन्मात्रादिकं देशकालनिमित्तानुसारेण कस्मिन् वस्तुनि संतीति विचारः इत्यर्थः। अत्र सूक्ष्मवस्तु एव विषयः। तद्विना सूक्ष्मपरमाणवः विषयाः इति त्रिकालातीतेन दृष्टसमये 'प्रज्ञा च स्वरूपशून्येवार्थमात्रा यदा भवति तदा निर्विचारेत्युच्यते'(यो.भा.1.44) तथापि पूवोक्तरीत्या 'तत्र महद्वस्तुविषया सवितर्का निर्वितर्का च सूक्ष्मवस्तुविषया सविचारा निर्वि चारा च'(यो.भा.1.44) सवितर्कनिर्वितर्कयोः महद्विषयत्वं, सविचारनिर्वि चारयोः सूक्ष्मवस्तुविषयत्वं च वर्तेते। अस्मिन् सवितर्कादि चतुष्टये बाह्य वस्तुविषयस्य सत्वात् 'ता एवं सबीजः समाधिः'(यो.सू.1.46) इति व्यव हारः। इथ्थं क्रमक्रमाभिवृद्धिं दृष्ट्वा, समाधिसौधयोः अधिरोहणचित्तः निर्विचारेण, तत्फलितेन 'निर्विचारवैशारद्ये अध्यात्मप्रसादः'(यो.सू.1.47) एतादृशं स्थितिं प्राप्तवान् योगी 'प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान्'(यो.भा.1.47) दयादृष्टिभिः पश्यति। अपि च 'रुतंभरा तत्र प्रज्ञा' (यो.सू.1.48) किंचिदपि अनृतत्वं न गोचरति। तत्र अविद्या विपर्ययाधि कानुभवः लेशोऽपि न संभवति। तस्मादेव 'आगमेनानुमानेन ध्यानाभ्यासे रसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमं॥'(यो.भा.1.48) इत्यु क्तम्। अपि च अस्मात् 'तज्जः' संस्कारोऽन्यसंस्कारप्रतिबंधी'(यो.सू.1.50) नाम 'समाधिप्रज्ञा प्रभवः संस्कारो व्युथानसंस्काराशयं बाधते'(यो.भा.1.50) समाधिप्रज्ञासंभवेन संसारकारणसंस्कारपुंजाः नश्यंति। ग्राह्यसमा पत्तेः अग्रे विद्यमाने निर्विचारविशेषे एव एते रुतंभरादिसमाधिविशेषाः फलंतीति ग्राह्यम्। अनेन बाह्यापेक्षिकत्वं क्षिणोतीति ग्राह्यम्।

साधकास्थितीनामनुसारेण 'चत्वारः खल्वमी योगिनः प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रांतभावनीयश्चेति'(यो.भा.3.51) विभक्ताः। तत्र प्रथमः प्राथमिको भूत्वा, अभ्यासेन प्रवृत्तिमात्रस्यात्। द्वितीयस्य मधु भूमिका स्थितस्यैव रुतंभराप्रज्ञा वर्तते। तृतीयः प्रज्ञाज्योतिस्थितः सर्वभूते न्द्रियजयः। कृतफलितेभ्यः रक्षणं कर्तव्यसाधनसाध्यत्वं चास्य वर्तेते। तुरीयः अतिक्रांतभावनीयः चित्तलयकार्यमात्रशेषो भूत्वा सर्वोत्तमो स्यात्।

मतः योगारंभकदशा। तृतीये भूतेन्द्रियसंपत्या संतृप्तः। चतुर्थे परंवैराग्य संपन्नः, असंगश्च। द्वितीये तु साधकस्थितिमात्रमेव। अतः साधना मुख्या तिमुख्यम्।

पुनः एतानेव अनुभवस्थितिमनुसृत्य 'तस्य सप्तधा प्रांतभूमिः प्रज्ञा'(यो.सू.2.27) साधकस्य प्रज्ञा सप्तसोपानैः वर्तते। ताः स्थितयः 'विवेकख्याति'(यो.सू.2.26) प्राप्य, वशीकारवैराग्यसंपन्नस्य लभ्यंते। रज स्तमोरहितस्यापि एते स्थितयः सिध्यंति। हेयत्वस्य संपूर्णग्रहणं प्रथम भूमिका। हेयवस्तुकारणानां क्षयः द्वितीयः। निरोधसमाधिरिति संप्रज्ञातेन हेयत्वस्य विनाशदर्शनं तृतीयम्। विवेकख्यातिद्वारेणहेयत्वहानकार्यस्य संपूर्तिः चतुर्थः। चत्वारी अपि पुरुषप्रयत्नेन प्राप्ताः प्रज्ञानमुक्तस्थितयः। चतुष्टया द्वारा एव प्रज्ञाकार्येभ्यः विमुच्यते। अनंतरं प्रयात्नापेक्षारहिताः चित्तविमुक्ति दमाः अनंतरं 'चरिताधिकारा बुद्धिः'(यो.भा.2.27) तत्र 'कृतभोगापवर्ग कार्येत्यर्थः'(यो.भा.वा.2.27) गुणनिवृत्या 'न चैषां प्रविलीनानां पुनरस्त्यु त्पादः प्रयोजनाभावादिति'(यो.भा.2.27) सप्तमभूमिकायां 'गुणसंबंधातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इति'(यो.भा.2.27) पुरुषः गुणाति रिक्तः, स्वरूपमात्रज्योतिः अमलः केवलश्च। एतादृशमेव कुशल इति व्यवहरंति। सिद्धः इति वदंति।

सप्तभूमिकासु आद्यचतुष्टयेन संप्रज्ञातस्य संबंधः। उत्तर त्रयः असंप्रज्ञातपक्षः। अपि च साधकचतुष्टये प्राथमकल्पकमधुभूमिका प्रज्ञा ज्योतिस्थितयः संप्रज्ञातरूपाः। अतिक्रांतभावनीयः असंप्रज्ञातरूपः। तस्मा देव संप्रज्ञातसमाधिः 'संपन्नयोर्मधुभूमिकप्रज्ञाज्योतिषोर्मध्यमयोर्योगिनोश्चित्त सत्वं संगृहीतम्'(यो.भा.1.2) इति वाचस्पतिना विवृतम्। द्वयोः स्थित्योः रजोलेशेन 'रजसः प्रवर्तकत्वादस्तिधर्मादिप्रवृत्तिः' (यो. भा. वा.1.2) धर्म प्रवृत्तिः प्रकाशते।

जन, तपो, सत्यरूपैः त्रिविधात्मकं ब्रह्मलोकेषु तृतीये सत्यलोके अच्युत, शुद्धनिवास, सत्यभा, संज्ञासंज्ञेति चतुर्विधदेवताकायेषु अच्युताः सवितर्कध्यानसुखिनः, शुद्धनिवासिनः सविचारध्यानानंदाः, सत्यभारूपाः आनंदमात्रध्यानतुष्टाः, संज्ञासंज्ञानिनः अस्मितामात्रध्यानप्रियाः। एते ब्रह्मलोक वासिनोऽपि संप्रज्ञातसमाधेरतयत्वात् कैवल्यासिद्धाः एव स्युः। तस्मात् कैवल्यप्राप्तिं, सन्निहितम् असंप्रज्ञातं च विचारयामः।

'न तत्र किंचित्संप्रज्ञायत इत्यसंप्रज्ञातः'(यो.भा.1.2) तदेव 'सर्व

वृत्तिनिरोधे त्वसंप्रज्ञातसमाधिः'(यो.भा.1.1) इति व्यवहारः। पुनः तदेव 'सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसंप्रज्ञातः'(यो.भा. 1.18) इति निर्वाचितम्। 'तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः' (यो.सू.1.51) इति सूत्रकारेणोक्तम्। अस्यैव भोजदेवः 'प्रकृष्टमशुक्लकृष्णं धर्मं परमपुरुषार्थसाधकं मेहति सिंचतीति धर्ममेघः'(यो.भो.4.28) इति नामकरणं कृतवान्।

एषा स्थितिरेव 'तदा द्रष्टुः स्वरूपेऽवस्थानं'(यो.सू.1.3) इति विवृतम्। चित्तप्रशांतस्थितेः अवरोधदायकानां सर्ववृत्तीनां निरोधेन 'रजोलेश मलापेतं स्वरूपप्रतिष्ठं सत्वपुरुषानख्यातिमात्रं' तस्मादेव शुद्धसत्वप्रधानं च भूत्वा 'तारकं सर्वविषयं सर्वधा विषयमक्रमं चेति विवेकजं ज्ञानं'(यो.सू. 3.54) 'अतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि'(यो.भा.1.2) इति सूत्रेण उक्तरीत्या, चित्तेन निरोधितस्सन्, 'संस्कारोपगं भवति'(यो.भा. 1.2) पूर्वसंस्काराधारमात्रेण असंप्रज्ञातः भवति। तस्मात् 'तस्य प्रशांत वाहिता संस्कारात्'(यो.सू.3.10) 'तदा द्रष्टः स्वरूपे अवस्थानं'(यो.सू.1. 3) इति अन्वयः। एतद्विवृण्वन् 'कैवल्यं प्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये'(यो.भा.1.3) इति व्यासः विशदीकृतवान्। अस्यां स्थितौ 'आरो पितं शांतघोररमूढस्वरूपं निवर्तयति'(यो.भा.वा.1.3) 'निरोधसमाधिमपेक्ष्य संप्रज्ञातोऽपि'(यो.भा.वा.1.3) निरोधितं स्यात्। 'पुरुषार्थवती बुद्धिः'(यो. सू.4.34) इतिरीत्या पुरुषार्थशालिनी बुद्धिः तत्र निवर्तते। अतः भोगाप वर्ग प्रवृत्तिः नास्तीति स्पष्टं भवति। अपि च 'निर्बीजः समाधि'(यो.सू. 1.51) इत्युक्तत्वात् अत्र केवलसमाधिप्रज्ञानिरोध एव न, प्रज्ञाकृतसंस्कारा णामपि प्रतिबंधकमिति विदितं भवति। समाधिकालेऽपि, केचन संस्काराः संतीति अनुमानप्रकारेण व्यक्तं भवति। तथापि अत्र चित्तस्य व्युत्थान विद्यमानसमये, निरोधावस्थायां च कैवल्यपूर्वअसंप्रज्ञातः, तत्रस्थाः त्रिविध संस्काराश्च प्रधाने लियंते। एते संस्काराः क्रमेण बुद्धि प्रवृत्तीः नाशयन्, बुद्धि प्रवृत्तिभिः सह कैवल्यपूर्वसंस्कारेषु लयः कुर्वंति। तथा बुद्धेः लुप्ततया अध्यासरहितो भूत्वा, पुरुषः स्वस्वरूपस्थितौ विराजते। सः 'शुद्धः केवलो मुक्त इत्युच्यते'(यो.भा.1.51) अस्यां स्थितौ विद्यमानस्य 'सत्वपुरुषान्यता ख्यातिमात्रस्य सर्वभावाधिष्टातृत्वं सर्वज्ञातृत्वं च'(यो.सू.2. 49), अपि च 'प्रसंख्यानेप्यकुसीदस्य सर्वधा विवेकख्यातेः धर्ममेघः समाधिः'(यो.सू.4.29) इति वचनानुसारेण तत्परं प्रसंख्यानमिति ध्यायिनः

आचक्षते। एतत् 'सर्वां धर्मां ज्ञेयां मेहति वर्षति प्रकाशनेनेति धर्ममेघ इत्युच्यते।'(यो.भा.वा.4.29) इति निर्वचनानुसारेण शुद्धतया पुरुषं प्रकाश यन् स्वस्वरूपस्थित इव धर्ममेघः करोति। तत्र 'सर्वावरणमलापेतस्य ज्ञानस्यानंताज्ज्ञेयमल्पं'(यो.सू.4.31) 'ततः कृतार्थानां परिणामक्रमसमाप्तिर्गु णानां'(यो.सू.4.32) गुणानां पिरणामक्रमसमाप्तेरनंतरं योगी कृतार्थतां आप्नोति।

एतावत्पर्यंतं कैवल्यात्पूर्वं, गुणपयर्यवसानं च असंप्रज्ञातस्य स्वभा वलक्षणानि ज्ञातानि। संप्रज्ञातानंतरस्थितिरियमिति च ज्ञातम्। संप्रज्ञातः 'अभ्यासवैराग्या'(यो.सू.1.12) द्भिः संप्राप्ते, सर्ववृत्तिनिवृत्तिरूप 'परं वैरा ग्यमुपायः'(यो.भा.1.18) इति स्पष्टं भवति। अतः 'निर्धूतरजस्तमोमलस्य बुद्धिसत्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां'(यो.भा.3.49) इत्युक्त त्वात् परमवैराग्यमत्यावश्यकमिति विदितं भवति। तस्मादेव देवताभिः आहूतस्सन्, असंख्याकानां 'देवानां प्रियं'(यो.भा.3.51) सुखं प्रसादयन्त्यपि 'स्वस्ति वः स्वप्नोपमेभ्य कृपणजनप्रार्थनीयेभ्यो विषयेभ्यः'(यो.भा.3.51) अज्ञजनकांक्षितानां, स्वप्नतुल्यानां विषयाणां त्यागं कृतवान् मधुमतिस्थितः एव द्वितीयस्थानमलंकृतवान्। असंप्रज्ञातः, तुरीयश्च अतिक्रांतभावनीयः 'चतु र्थेऽपि परवैराग्यसंपत्तेरासंगशंकादूरोत्सारितैरेवेति'(यो.भा.वा.3.51) इत्युक्त रीत्या, स्वस्य वैराग्यातिशयप्रभावे निर्बीजसमाधिस्थितः मुख्यो स्यात्।

तथापि असंप्रज्ञातः प्रथमतः 'स खल्वयं द्विविधः उपायप्रत्ययो भवप्रत्ययश्च'(यो.भा.1.19) तत्रापि 'भवप्रत्ययो विदेहप्रकृति लयानां'(यो. सू.1.19) 'विदेहानां देवानां भवप्रत्ययः'(यो.भा.1.19) इत्युक्तरीत्या विदे हानां देवतानां भवप्रत्ययः अन्वयः। कथमित्युक्ते? एते स्वसंस्कारमात्र चित्तास्सन्, चित्तकारणेन 'कैवल्यपदमिवानुभवन्तः'(यो.भा.1.19) संसार विपाकमाप्नुवंति। तथैव प्रकृतिलयावपि किंचिदर्थकांक्षाः भूत्वा, प्रधाने स्थित्वा कैवल्यतुल्यस्थितिं, यावत् चित्तसंस्कारौ व्युत्थानस्य गच्छतः ताव त्पर्यंतमनुभवंति। उभावपि कैवल्यमप्राप्य, संस्कारशेषवशात्, पुनर्जन्म आप्नु वंति इति तात्पर्यम्। तथापि संप्रज्ञातसिद्धानामिव लोकांतर्गताः न। 'विदे हप्रकृतिलयास्तु मोक्षपदे वर्तन्ते इति न लोकमध्ये न्यस्ता इति'(यो.भा.3. 26) कुतः इत्युक्ते? 'बुद्धिवृत्तिमंतो हि दर्शितविषया लोकयात्रां वहंतो लोकेषु वर्तंते'(यो.भा.वा.3.26) अतः 'न चैवं विदेहप्रकृतिलयाः सत्यपि साधिकारत्व इत्यर्थः'(यो.भा.वा.3.26) पूर्वोक्तरीत्या 'अस्मिन्नेव समाधौ ये

बद्ध धृतयस्तत्वांतरं प्रधानपुरुषरूपं न पश्यंति ते विगतदेहाहंकारत्वाद्विदेह शब्दवाच्य:'(यो.भो.1.17) इति भोजस्य वाक्यानुसारेण विदेहा: सानंदसमा पत्तिस्थिता: इति ग्राह्य:। तथैव 'अस्मिन्नेव समाधौ ये कृतपरितोषा: पर मात्मानं पुरुषं न पश्यंति तेषां चेतसि स्वकारणे लयमुपागते प्रकृतिलया इत्युच्यंते'(यो.भो.1.17) इति भोजस्य वचनम्। तस्मात् प्रकृतिलयौ सास्मि तामग्नाविति व्यक्तं भवति।

'तत्रोपाय प्रत्यया योगिनां भवति'(यो.भा.1.19) उपायप्रत्यय: कैवल्यसन्निहितानां योगिनामन्वय:। उपायप्रत्ययसाधनाया: 'श्रद्धावीर्यस्मृति समाधिप्रज्ञा'(यो.सू.1.20) दय: आवश्यका:। 'श्रद्धाचेतस: संप्रसाद:'(यो. भा.1.20) श्रद्धा चित्तस्य संप्रसादस्थिति: इत्यर्थ:। श्रद्धा जननीव योगिं रक्षति। इत्थं श्रद्धालो: विवेककांक्षाया: समुत्पन्ने 'वीर्यमुपजायत'(यो.भा.1. 20) 'तस्मात् स्मृतिरूपतिष्ठते'(यो.भा.1.20) तेन सह 'चित्तमनाकुलं समाधीयते'(यो.भा.1.20) तस्मात् प्रज्ञाविवेक उपवर्तते'(यो.भा.1.20) अनं तरं 'यथार्थं वस्तु जानाति'(यो.भा.1.20) एतासु स्थितिषु वैराग्यप्रदर्शनेन 'असंप्रज्ञात: समाधिर्भवति'(यो.भा.1.20) नाम 'तीव्रसंवेगानामासन्न:' (यो. सू.1.21) यस्य वैराग्यं तीव्रातितीव्रतया वर्तते तस्य असंप्रज्ञात: सन्नि हित:। वैराग्यस्य तीव्रतामनुसृत्य 'मृदुमध्यादिमात्रत्वात्ततोऽपि विशेष:'(यो. सू.1.22) इति सूत्रप्रकारेण मृदु, मध्य, अधिमात्रत्वमिति रीत्या वैराग्यं त्रिविधं भवति। मृदुतीव्रसंवेगानां असंप्रज्ञात: आसन्न:। मध्यतीव्रसंवेगानां आसन्नतरम्। अधिमात्रतीव्रसंवेगानामासन्नतमम्। इत्थं समाधिलाभमाप्नुवंति। तस्मात् असंप्रज्ञातसमाधि प्राप्ते: वैराग्यमेव शरण्यमिति ग्राह्यम्। अत: एतत् 'संसारसागरात्तारयतीति तारकं'(यो.भा.वा.3.54) 'तारयत्यागाधात्संसार सागराद्योगिनिमित्यान्वर्थक्या संज्ञया तारकमित्युच्यते' (यो.भो.3.54) अत: असंप्रज्ञात: तारकमिति वक्तव्यम्।

उपरिविवृता समाधि: केवलं चैतन्यविहीन जडता इति केषांचन भाव:। तन्नसत्यमिति रामप्रसाद: समाधिगतचैतन्यं वचनै: विवृणोति– What is the State of mind in Samadhi and Nirodha? Is it a state of perfect quiescence of the mental body निरुद्धो नाम समाधिस्थितौ मनस: स्थिति: क:? सूक्ष्मशरीरे परिशुद्धनिश्चलतां प्राप्तो वा? इति पर्या लोचनं कृत्वा, न निश्चल: तस्य स्थिति: इति वदन् It is a state of great molecular motion in the mental body itself सूक्ष्मशरीरे अणु

स्पंदनम् अत्यधिकस्थितौ वर्तते इति, तथापि स्थूलदेहः जडएवेति This vibration of the molecules of the mental body, becomes by practice, rythemic and this rythemic flow is the mental peace in Samadhi साधनया तत् स्पंदनं क्रमेण प्रवर्ततेति, तथा क्रमस्पंदनवाहिनी एव समाधौ चित्तशांतिः इति च लिखितवान्। तस्मात् That which appears to be the Stillness of Samadhi is perhaps the highest activity possible समाधिस्थ प्रशांतता अत्यधिकचलनेन वर्तते। समाधि एव न Even what is called one pointedness is itself a state of utmost activity (Patanjali's Yoga Sutras, ix) एकाग्रता इत्यपि अधिकस्पंदनैवेति सः उक्तवान्।

कैवल्यम्

एतावत्पर्यंतं ग्रंथभागे, मुख्यतः असंप्रज्ञातसमाधिनिर्वचनभागे वयं कैवल्यस्य अत्यंतसन्निहितस्थितेः आगताः। स्वस्वरूपस्थितयः केवलीभाव तत्वानि द्वावपि साम्यत्वं प्राप्तौ। तथापि कैवल्यं तु किंचिदधिकतरस्थितेः सत्वात् तस्य विवरणज्ञानमावश्यकं भवति। अतः मुक्तेः विषयं परिशील यामः।

'भोगापवर्गार्थं'(यो.सू.2.18) इति द्विविधपुरुषार्थयोः किंचित् सूक्ष्म दृष्ट्या दृष्टं चेत् भोग्यं सर्वमपि दृश्यरूपेण 'भोगापवर्गार्थं दृश्यं'(यो.भा. 1.3) इति रीत्या पुरुषार्थानामन्वीयते। तथापि 'तदर्थ एव दृश्यस्यात्मा' (यो.सू.2.21) इत्युक्तत्वात् पुरुषस्य नित्यत्वात् तस्य स्वस्वरूपसिध्यर्थं भोग्यं, भोगोऽपि अपवर्गार्थमेव भवतीति सुव्यक्तम्। यथार्थतः पुरुषार्थद्वयं न। अपवर्गार्थः एक एव स्यात् इति तात्पर्यम्। तस्मात् 'तदर्थावसायो मोक्ष'(यो.भा.2.18) अर्थादीनां राहित्यमेव मोक्ष इति निर्वचनम्। अपि च 'संसारः संसारहेतुः मोक्षः मोक्षोपायः'(यो.भा.2.15) इति शास्त्रप्रोक्तव्यूह चतुष्टयेऽपि भोगकारणं भूत्वा, भोग्यः संसारः हेयो भूत्वा, हेयहानानंतर स्थितः मोक्षत्वात् अपवर्ग एव परमपुरुषार्थः भवति।

'अपसृज्यते अनेनेत्यपवर्गः'(यो.भा.वा.2.18) इत्युत्पत्त्यर्थेन परमपुरुषार्थो भवति अपवर्गः। पुरुषः स्वस्य बंधहेतोः भोग्यात् मोचनमिति, 'अपवर्गो विवेकख्यातिपूर्विका संसारनिवृत्तिः'(यो.भो.2.18) इति निर्वचनम्।

अपि च एतत् 'दोषबीजक्षये कैवल्यं'(यो.सू.3.50) इति, 'सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति'(यो.सू.3.55) अपवर्गरूपमेव कैवल्यमेव कैवल्य मिति चोक्तम्। 'पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्टा वा चितिशक्तिः'(यो.सू.4.34) चितिशक्तेः स्वस्वरूपस्थितिप्राप्तिरेव कैवल्य मिति पूर्व वाक्ये सूत्रकारः कैवल्यस्य निर्वचनं कृतवान्। 'स्वरूपप्रतिष्ठा कैवल्यं' (यो.भा.1.3) इत्यपि भाष्यकारस्य भावः। कैवल्यस्थितेः 'तद भावात्संयोगाभावो हानं तद्दृशेः कैवल्यं'(यो.सू.2.25) अविद्यायाः क्षयेन संयोगाभावेन कैवल्यं सिध्यतीति एतद्विवृण्वन्'दृश्यस्थाभिकारविवृत्तेर्भवत्येव कैवल्यं' (यो.भो.2.26) इत्युक्तवान् भोजः। तस्मात् 'कैवल्यमात्यन्तिकी दुःखनिवृत्तिः'(यो.भो.3.50) इति स्पष्टं कृतवान्। 'पुरुषस्यात्यंतिको गुण वियोगः कैवल्यं'(यो.भा.3.50) इति श्रीव्यासः उक्तवान्। तदानीं 'पुरुष स्वरूपमात्र ज्येतिरमलः केवली भवति'(यो.सू.3.55) पुनः 'चित्तसत्वस्य स्वकारणेऽनुप्रवेशात् कैवल्यमुत्पद्यते'(यो.भो.3.55) इत्यादिभिः वाक्यैः अप वर्ग एव कैवल्यमिति स्पष्टं भवति। अपि च 'भोगविवेकख्यातिरूपपरि णतबुद्धिनिवृत्तिरेव मोक्षः'(यो.भा.वा.2.24) इति, 'चित्तनिवृत्तिरेव मोक्षः' (यो.भा.2.24) इति, 'बुध्यादिविविक्तस्यात्मनः स्वरूपस्थानं मोक्षः'(यो.भा. वा.2.23) इति, 'स्वरूपावस्थानमेवात्मनो मोक्ष इति'(यो.भा.वा.2.15) आत्मनः स्व स्वरूपस्थितिरेव मोक्षः इति च बहुभिः वाक्यैः मोक्षो नाम पूर्वार्थवत् वर्तते। अपि च मुक्तिपदमपि अत्रान्वयतीति ग्राह्यम्। इत्थं कैवल्यादिपद निर्वचनमूलेनैव व्यक्तं भवति। क्लुप्ततया विचारयामः।

'तदभावात्संयोगाभावो हानं तदृशेः कैवल्यं'(यो.सू.2.55) सर्व संसारकारणस्य अविद्यायाः क्षयात्, पूर्वे भोगार्थं विद्यमान सत्वपुरुष कल्पित संयोगस्य नाशेन सर्वनिरुद्धस्थितिः संभवति। तदानीं पुरुषः कैवल्यस्थितौ वर्तते। तदानीं 'तावत्पर्यंतं विद्यमान हेयसंसारात् पुरुषः मुच्यते'(यो.भो.2.18) सत्वपुरुषैकत्वभावात् मुक्तो भूत्वा, सत्वपुरुषान्यता ज्ञानस्य'(यो.भा.2.2) प्राप्तत्वात् भ्रांतिरहितो स्यात्। तस्मिन् 'तद्वैराग्यादपि दोषबीजक्षये कैवल्यं'(यो.सू.3.50) इति सूत्रविधान, सर्वज्ञत्वादि कांक्षा दोषाणामभावेन कैवल्यपरो स्यात्। तस्मात् सः दुःखोपरम(यो.भा.वा.2. 25) संभवेन दुःखकारणेभ्यः गुणेभ्यः 'आत्यंतिकवियोग'(यो.भा.3.50) माप्नोति। पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः'(यो.सू.4.34) 'ततः कृतार्थानां

परिणामक्रमसमाप्तिर्गुणानां'(यो.सू.4.32) इति धर्ममेघे एव विज्ञापितम्।

'सत्वपुरुषयोः शुद्धसाम्ये कैवल्यं'(यो.भो.3.55) इति सूत्रोक्तरीत्या पुरुषः परिशुद्धस्सन् 'सर्वकर्तृत्वाभिमाननिवृत्या स्वकारणेऽनुप्रवेशः शुद्धिः' (यो.भो.3.55) तदानीं पुरुषः 'स्वरूपप्रतिष्ठा'(यो.सू.4.34) 'स्वरूपा वस्थान'(यो.भा.वा. 2.15) 'स्वरूपावधारण'(यो.भा.वा. 2.18) 'स्वरूपोप लब्धिः' (यो.भा.वा.2.23) 'स्वरूपमात्रः'(यो.भा.3.55) इत्यादीनामन्वयाना मनुसारेण स्वरूपस्थितो स्यात्। सः केवलीभावेन एको स्यात् इति तात्पर्यम्।

'ततः क्लेशकर्मनिवृत्तिः'(यो.सू.4.30) धर्ममेघेन क्लेशकर्मादीनां नाशेन 'जीवन्नेव विद्वान् विमुक्तो भवति'(यो.भा.4.30) तादृश विद्वान् सिद्धः इति, कुशलः इति च व्यवहारः।

'नात्र दर्शनं मोक्षकारणमदर्शनाभावादेव बंधाभावः। स मोक्ष इति' (यो.भा.2.23) तस्मात् कैवल्यस्य कारणं किमपि भवति। तथापि साधना दिभिः सर्वैः, वृत्तिरूपनिरोधे कैवल्यं ज्योतिरिव प्रकाशते इति भावः। साधनानि बंधनिवृत्यर्थकमेव, न तु मोक्षप्राप्त्यर्थकमिति रहस्यम्। अतः मोक्षः स्वतस्सिद्धः, न तु साध्यः इति भावः।

'कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधाराणत्वात्'(यो.सू.2.22) कैवल्यं प्राप्तवतः दृश्यं परिहारमेव। लोके बंधावस्थायां विद्यमानानां इतर पुरुषाणां भोगापवर्गार्थं एकस्य मुक्तेः लोकः संपूर्णतया न रिक्तो भवति। केचन मुक्तिं प्राप्तवंतः 'एकस्य मुक्तौ वा न सर्वमुक्तिप्रसंगः'(यो.भो.2. 22) तथापि सर्वमुक्तिः न सिद्धः खलु। इति उक्तरीत्या सर्वमुक्तेरसंभवात् दृश्यं संपूर्णं न नश्यति। मुक्तस्य मात्रं निष्प्रयोजकं भवतीति ग्राह्यम्।

ईश्वरः

योगशास्त्रे ईश्वरस्य स्थानमुद्दिश्य उपोद्घाते किंचिदुक्तेऽपि, तमु द्दिश्य सविवरणं विचारयामः। 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः'(यो.सू.1.24) इति प्रसंगः पूर्वं सृष्टिविवरणसंदर्भे किंचिदुक्तः। सामान्यपुरुषाणामिव सः क्लेशकर्मवासनासंबंद्धः न इत्यर्थः। तस्मात् तस्य संकुचितत्वाभावात् 'तत्र निरतिशयं सर्वज्ञबीजं'(यो.सू.1.25) सर्वज्ञत्वनिर्वच नेन 'यदिदमतीतानागतप्रत्युत्पन्न प्रत्येकसमुच्चयातींद्रियग्रहणमल्पं बह्वीति सर्वज्ञबीजमेतद्विवर्धमानं यत्र निरतिशयं सर्वज्ञः'(यो.भा.1.25) इति व्यास

भगनानुक्तवान्। 'एतद्विवर्धमानं यत्र निष्क्रांतमतिशयात् स सर्वज्ञः'(यो.भा.वा.1.25) इति वाचस्पतिरपि उक्तवान्। तस्मात् 'यत्र काष्ठाप्राप्तिः ज्ञानस्य स सर्वज्ञः स च पुरुषविशेषः इति'(यो.भा.1.25) पतंजलेः मतम्। सत्वपुरुषान्यताख्यातिमात्रज्ञानिनः पुरुषस्यैव सर्वज्ञत्वं विद्यते चेत्, तादृश सिद्धादपि ईश्वरस्य सर्वज्ञत्वमनन्ताधिकमिति तात्पर्यम्। किमर्थमित्युक्ते? ईश्वरस्य अविद्या क्लेशादयः, कुशलाकुशलरूपकर्माणि तत्तत्फलविपाकः, तदनुगुणवासनाचयश्य न संति। अतः 'योत्यनेन भोगेनापरामृष्टः स पुरुषविशेषः ईश्वरः'(यो.भा.1.24) एतादृशस्थितौ एव विद्यमानानां मुक्तानाम्, ईश्वरस्य च द्वयोः भेदः वर्तते। 'कैवल्यं प्राप्तास्तर्हि संति च बहवः। केवलिनः। तथापि 'ते हि त्रीणि बंधनानि छित्वा, कैवल्यं प्राप्ता'(यो.भा.1.24). 'ईश्वरस्य च तत्संबंधो न भूतो न भावे'(यो.भा.1.24) 'स तु सदैव मुक्तः सदैव ईश्वरः'(यो.भा.1.24) अपि च 'तच्च तस्यैश्वर्य साम्यातिशयविनिर्मुक्तः'(यो.भा.1.24) 'सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः। अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य।'(यो.भा.1.23) इति वायुपुराणवचनानुसारेण सः अद्वितीयः। अपि च 'शुद्धः प्रसन्नः केवलोनुपसर्गः'(यो.भा.1.29) इत्युक्तरीत्या, 'शुद्धः कूटस्थनित्यतयादव्ययरहितः'(यो.भा.वा.1.29) ईश्वरः। सः 'प्रसन्नः क्लेशविवर्जितः'(यो.भा.वा.1.29) 'केवलो धर्माधर्मोपेतः'(यो.भा.वा.1.29) 'जात्यायुर्भोगा'(यो.भा.वा.1.29) दयः तस्येश्वरस्य न संति।

अतः ईश्वरः 'ज्ञानधर्मोपदेशेन कल्पप्रळय महाप्रळयेषु संसारिणः पुरुषानुद्धरिष्यामि'(यो.भा.वा.1.25) इति अनुग्रहभावेन सृष्टिं विस्तारयति। तस्मात् 'ईश्वर ईशानशील इच्छामात्रेण सकलजगदुद्धरणक्षमः'(यो.भो.1.24) इत्युक्तः। तथा अनादिकालात् सः ज्ञानधर्मोपदेशकः। अतः 'पूर्वेषामपि गुरुः कालेनानवच्छेदात्'(यो.सू.1.26) इति अतिप्राचीनगुरुलोकस्यापि ईश्वरः परमगुरुः भवति। ब्रह्मादि देवताः अपि कालबद्धाः भवंति (यो.भा.वा.1.26) तस्मात् 'आद्यानां स्रष्टाणां ब्रह्मादीनामपि स गुरुः उपदेष्टा'(यो.भो.1.26) प्रथमजनितानां ब्रह्मादीनामपि ईश्वर एव उपदेष्टेति विदितं भवति।

तथापि 'प्रणिधानात् भक्तिविशेषादावर्जितईश्वरस्तमनुगृण्हात्यभिध्यानमात्रेण'(यो.भा.1.23) 'तदभिध्यानमात्रादपि योगिन आसन्नतमः समाधिलाभ समाधिफलं च भवति'(यो.भा.1.23) प्रणिधानं नाम भक्तिविशेष एव न, 'तपः स्वाध्यायेश्वरप्रणिधानानि'(यो.सू.2.1) इति क्रियायोगसूत्रभाष्ये 'ईश्वर

प्रणिधानं सर्वक्रियाणां परमगुर्वर्पणं तत्फलसंन्यासो वा'(यो.भा.2.1) इति, 'शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः'(यो.सू.2.32) इति, नियम सूत्रभाष्ये 'ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणं'(यो.भा.2.32) इति, 'समाधिसिद्धरीश्वरप्रणिधानात्'(यो.सू.2.45) इति सूत्रभाष्ये, 'ईश्वरा र्पित सर्वभावस्य'(यो.भा.2.45) इति प्रणिधानशब्दस्य व्यासः विवृतवान्। वाचस्पतिमिश्रोऽपि प्रणिधानपरविवरणे परमगुरवे भगवते ईश्वराय 'कामतो अकामतो वाऽपि यत्करोति शुभाशुभम्। तत्सर्वं त्वयि सन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥'(यो.भा.वा.2.1) इति वाक्यमुदाहृत्य, सर्वकर्मत्यागः, अपि च 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्म फलहेतुर्भूर्मा ते संगो स्त्वकर्मणि॥' इति प्रमाणानि सूचयित्वा, कर्मफलत्यागं ज्ञापयति। तथैव 'तत्र प्रणिधानं भक्तिविशेषो विशिष्टमुपासनं सर्वक्रियाणां तत्रार्पणं विषय सुखादिकं फलमनिच्छस्सर्वाः क्रियास्तस्मिन् परमगुरावर्पयति तत्प्रणिधानं' (यो.भो.1.23) इति भोजदेवस्य वचनम्। भक्तिविशेषः प्रणिधानम्, श्रेष्ठो पासना। सर्वाः क्रियाः ईश्वरायार्पयन्, विषयसुखापेक्षाभावेन, सर्वाः क्रियाः परमगुरोरर्पणमेव प्रणिधानमिति भोजस्य तात्पर्यम्। Selves neither credit nor blame, but to give both up to the Lord and be at peace. (यो.सू.2.1) ईश्वराय कर्मफलत्यागो नाम दूषणभूषणयोः अस्वी करणेन द्वयमपि ईश्वरार्पणं कृत्वा शांतिप्राप्तिरेवेति विवेकानंदस्य निर्व चनम्। अपि च प्रणिधान पदं प्र=संपूर्णतया, नि=स्वाधीनम्, धान=स्थापनं अथवा स्थितिः। नाम संपूर्ण प्रपत्तिः, शरणागतिः इति अर्थं ज्ञापयति। तस्मात् 1-23 सूत्रे, ईश्वरस्य सर्वव्यापकत्वस्फुरणेन, 2-45 समाधिसंदर्भे ईश्वरस्य सर्वाधिष्ठानत्वस्फुरणेन, 2-1, 2-32 नियमसंदर्भे निष्कामकर्म रूपेण च 'ईश्वरप्रणिधान' पदं ज्ञानभक्तिकर्मपरेण अन्वीयते।

ईशानत्वात् ईश्वरनाम सिद्धम्। तथापि 'तस्य वाचकः प्रणवः' (यो.सू.1.27)। प्रणवः नाम 'प्रकर्षेण नूयते स्तूयते अनेनेति नौति स्तौ तीति वा प्रणवः'(यो.भो.1.27) इति निर्वचनम्। प्रणवः ईश्वरस्याभिधा नत्वात् तस्य साक्षात्काराय मुख्यसाधनं भवति। तस्मात् 'तज्जपस्तदर्थ भावनं'(यो.सू.1.28) इत्यस्मिन् सूत्रे साधनाविधानं विवृतम्। प्रणवं तदर्थ पूर्वकेण, अभिधेयसहितस्फुरणेन स्मरणीयम्। जपः नाम 'भावनं पुनःपुनः चित्ते निवेशनं'(यो.भा.वा.1.28) तथा भावयुक्त जपफलितेन 'चित्तमेकाग्रं संपद्यते'(यो.भा.1.28) 'ततः ईश्वरः समाधितत्फललाभेन तमनुगृण्हाति'

(यो.भा.वा.1.28)। समाधये तत्फलितसिद्धये च योगिनमनुगृण्हाति ईश्वरः। प्रकृतिपुरुषयोः संयोगेन, ईश्वरप्रणिधानरूपेण, तस्य कृपाविशेषेणैव विनि योगो भूत्वा, पुरुषं स्वस्वरूपस्थाने स्थापयंति।

इत्थम् ईश्वरः योगशास्त्रे सृष्टेः उपादानकारणं, निमित्तकारणं च न भवति। पुरुषस्य तरुणोपायोपदेष्टा मात्रेण प्रकृतिबंधात् विमोचनाय मात्रमेव उपयुक्तो भवति। तस्मात् तस्य सृष्टेश्च संबंधः अभावः एव। केवलं भक्तत्राणपारीणशीलो, ईश्वरो प्रकाशते इति योगशास्त्रस्य मुख्योद्देशः।

समाप्तिवचनम्

मनोवाक्कायानामुपयुक्तान् योग, व्याकरण, वैद्यग्रंथान् विरच्य, तेषां समन्वये एव Surrendering the fruits of work to God is to take to our- सर्वतोमुखाद्यात्मिकाभिवृद्धिरिति निर्धारणं कृतवान् श्री पतं जलिऋषिवरेण्यः, योगशास्त्रेऽपि योगे असंप्रज्ञातसमाधिद्वारे कैवल्यसाधनस्य 'विवेकख्यातिरविप्लवा हानोपायः'(यो.सू.2.26) दुःखः हानोपायः अत्यंत ज्ञानादेव संभवतीत्यादिभिः सूत्रैः ज्ञानमार्गं, 'ईश्वरप्रणिधानाद्वा'(यो.सू.1. 23) ईश्वरे भक्तिविशेषेण इत्यादिभिः सूत्रैः भक्तिमार्गं योगांगानां यम नियमादिकमूलेन कर्ममार्गं च उपदिशन्, तषां समन्वयं कुर्वन्, तेषामावश्य कतां स्पष्टयन्, सर्वमार्गसमन्वयमपि कृत्वा, मुमुक्षुलोकस्य महोपकारं कृत वानित्यत्र नास्ति संदेहः। तादृश सर्वसमन्वय, सर्वसमत्वरूपिणः, महात्मनः प्रसादितवती भारतांबा धन्या। तादृशं गुरुलोकं प्राप्तवतः भारतीयाः धन्यातिधन्याः। तथाप्यसंतृप्त्या, अस्माकं महर्षिगणेन अस्माकं वारसत्वेन प्रसादितं एतत्सर्वोत्तमज्ञानविधानमाप्यायतया अनुष्ठानेन, अनुभवेन, आनंदानु भूताः साधकाः अत्यधिकतरधन्याः, धन्यातिधन्याश्च। एवं रीत्या सर्वेऽपि भारतीयाः आर्षसंप्रदायानुगतविज्ञानधारमास्वाद्य, सर्वमानवकोटिनः आदर्श प्रायाः भवंतु।

हरिः ॐ तत् सत्